THE

CHAMPU-JIVANDHARA

OF

HARICHANDRA

EDITED BY

T. S. KUPPUSWAMI SASTRI, TANJORE.

TANJORE:

PRINTED AT THE SRI KRISHNA VILASA PRESS

1905.

All Rights Reserved.] *[Copy Right Registered.*

PRICE ONE RUPEE.

Dedicated

WITH KIND PERMISSION

TO

EUGEN HULTZSCH Esquire, Ph. D.,

Government Epigraphist; Fellow of the University of Madras;
Corr. Member of the Batavia Society of Arts and Sciences;
and of the Royal Society of Sciences at Gottingen.

AS A TOKEN OF HIGH REGARD AND ESTEEM FOR HIS
INDEFATIGABLE RESEARCHES IN THE FIELD
OF SANSKRIT LITERATURE.

BY T. S. KUPPUSWAMI SASTRI,
The Editor.

॥ श्रीः ॥

महाकविहरिचन्द्रविरचिता

जीवंधरचम्पूः ।



यस्य श्रीनखकान्तिनाकसरितः कूर्मायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मरालायते ।
पश्यन्निर्जरयोषिदम्बकततिर्मीनप्रपश्चायते
क्षोणीशाञ्जलयः पयोजमुकुलन्त्यव्यात्स वोऽन्त्यो जिनः ॥१॥

श्रीपादाक्रान्तलोकः परमहिमकरोऽनन्तसौख्यप्रबोध-
स्तापध्वान्तापनोदप्रथितनिजरुचिः सत्समूहाधिनाथः ।
श्रीमान्दिव्यध्वनिप्रोल्लसदखिलकलावल्लभो मन्मनीषा-
नीलाब्जिन्या विकासं वितरतु जिनपो धीरचन्द्रप्रभेशः ॥२॥

हरीशपूज्योऽप्यहरीशपूज्यः सुरेशवन्द्योऽप्यसुरेशवन्द्यः ।
अनङ्गरम्योऽपि शुभाङ्गरम्यः श्रीशान्तिनाथः शुभमातनोतु ॥३॥

आयतदिव्यशरीरं शिवसौख्यकरं सुदृग्भिराश्रास्यम् ।
रतिरागहीनमीडेऽपूर्वं श्रीवर्धमानकंदर्पम् ॥ ४ ॥

लोकोर्ध्वभागविजने मुक्तिकान्ताविराजितान् ।
नष्टकर्माष्टकान्सिद्धान्विशुद्धान्हृदि भावये ॥ ५ ॥

भजे रत्नत्रयं प्रत्नं भव्यलोकैकभूषणम् ।
तोषणं मुक्तिकान्तायाः पूषणं ध्वान्तसन्ततेः ॥ ६ ॥

वाणी कर्मकृपाणी द्रोणी संसारजलधिसंतरणे ।
वेणीजितघनमाला जिनवदनाम्भोजभासुरा जीयात् ॥ ७ ॥

अरन्ध्रसद्वृत्तमणीमनन्तगुणगुम्फिताम् ।
अपूर्वमालां मन्येऽहं पूर्वाचार्यपरंपराम् ॥ ८ ॥
गद्यावलिः पद्यपरंपरा च प्रत्येकमप्यावहति प्रमोदम् ।
हर्षप्रकर्षं तनुते मिलित्वा द्राग्बाल्यतारुण्यवतीव कान्ता ॥ ९ ॥
या कथा भूतधात्रीशं श्रेणिकं प्रति वर्णिता ।
सुधर्मगणनाथेन तां वक्तुं प्रयतामहे ॥ १० ॥
मदीयवाणीरमणी चरितार्था चिरादभूत् ।
वव्रे जीवंधरं देवं या सर्वज्ञिननायकम् ॥ ११ ॥
जीवंधरस्य चरितं दुरितस्य हन्तृ
प्राप्ता मलीमसतमापि मदीयवाणी ।
धीरान्धिनोति नियतं मलिनाञ्जनश्री-
र्बिम्बाधरीनयनपङ्कजसंगतेव ॥ १२ ॥

अथ लवणरत्नाकरनिर्लोलकल्लोलशयकुशेशयप्रक्षिप्तमुक्ताविद्रुमराजीविराजितवेलालंकृते, सकलद्वीपमध्यमध्यासीनेऽपि शोभातिशयेन तेषामुपरि वर्तमाने, स्वमहिमनिराकृतसुरायिपलोकं गगनतलचुम्बिजम्बूविटपिकपटेन मस्तकमुद्धृत्य प्रतिक्षणमीक्षमाण इव, अपारसंसारमंतमसान्धीकृतजीवलोकस्य पुरुषार्थचतुष्टयप्रकाशनायेव दिवाकरयुगलनिशाकरयुगलव्याजेन प्रदीपचतुष्टयमाबिभ्राणे, मूर्तीकृतलावण्य इव महीमहिलायाः, रङ्गस्थल इव श्रीलासिकालास्यस्य, प्रतिच्छन्द इव नाकलोकस्य, सकललेखलोचनमीनानामालम्बनकूपे जम्बूद्वीपे, भरतखण्डमण्डनायमानकमलवनमधुलुब्धभृङ्गमालाव्याजेन सकललोकलोचनबन्धनार्थमायसश्रृङ्खलामिव बिभ्राणम्, परिपाकपिशङ्गकलममञ्जरीपुञ्जपिञ्जरीभूततया पत्त्रिकुलपातभयात्कपीवल्स्थगितपीताम्बरमिव बिभ्राणम्, तत्र तत्र समर्पितैरभ्रंलिहैर्वीजावापप्रभृति तपनकलितसंतापजनित-

वैरतया तदीयपदवीमुपरुन्धद्भिरिव निजसौन्दर्यसंदर्शनार्थमागतैः कुलाचलैरिव उदयास्ताचलमध्यसञ्चारखिन्नस्य सरोजबन्धोर्विश्रमाय वेधसा विरचितैरिव धरार्धैर्धान्यराशिभिरुल्लासितम्, अतिदूरप्रवृद्धशाखावलयविलसितकिसलयकेतवेन हस्तमुदस्य विचित्रपतत्रिविरुतैः कल्पपादपाञ्जेतुमिवाह्वयमानैर्जन्मप्रभृति जलसेकाद्युपकारेण वर्धकेभ्यो वलाहकेभ्यः फलपुष्पादीनि समर्पयितुमिव मेघमण्डलमवलम्बमानैरुपवनतरुषण्डैर्मण्डितम्, विकचनीलोत्पलनयनाभिः पद्ममुखीभिर्भृङ्गजालनीलालकाभिर्मुदितमीनलाञ्छनमकरीशोभितचारुचक्रपयोधराभिर्वनपुलिनजघनाभिस्तटिनीवधूटीभिः परिवृतमास्ति निस्तुलं हेमाङ्गदं नाम मण्डलम् ।

तत्रास्ति राजनगरी जगति प्रसिद्धा
यत्सालनीलमणिदीधितिरुद्धमार्गः ।
राहुभ्रमेण विवशास्तरणिः सहस्रैः
पादैर्युतोऽपि न हि लङ्घयति स्म साल्म् ॥ १३ ॥

अभ्रंलिहसौधध्वजपटपवनोद्भूतसप्ताश्वरथ्य-
श्रान्तेः सौदामिनीश्रीतुलिततनुलतामानिनीमानितायाः ।
यस्या माणिक्यगेहप्रसृतरुचिनरीकल्पितोद्यद्वितानै
र्नियन्नीलाश्मसालद्युतिरमरपुरे वन्दनस्तम्बभूव ॥ १४ ॥

यस्या हरिन्मणिमयालयकान्तिजालै-
र्व्याप्ते वलाहककुलेऽपि सहस्रराश्मिः ।
दूर्वाम्बुबुद्धिपतदात्मरथाश्वरोध-
क्लेशासहः किमकरोद्गमनेऽयने द्वे ॥ १५ ॥

यत्सुन्दरीवदनचन्द्रविलोनचन्द्र-
कान्ताश्मसौधगलितं सलिलं पिपासुः ।

एणाङ्गरङ्गुरतिवेगवशात्समेत्य
भीतो रयेन निरयात्कृतसौधसिंहात् ॥ १६ ॥
यस्यामनर्घ्यनृपमन्दिरदेहलीषु
गारुत्मतैर्मृगगणा बहु वञ्चिताः प्राक् ।
दृष्ट्वापि कोमलतृणानि न संस्पृशन्ति
स्त्रीमन्दहासधवलानि चरन्ति तानि ॥ १७ ॥
उदग्रहर्म्यावलिमाश्रितानां यत्राङ्गनानां नयनोत्पलश्रीः ।
गङ्गां सखीं स्वामवलोकितुं द्राक्स्वर्गं गता सूर्यसुतेव भाति ॥१८॥
यत्रासादपरंपराप्रतिफलद्देवाङ्गनास्वाङ्गना-
भेदं दृष्टिनिमेषकौशलवशाज्जानाति यूनां ततिः ।
यद्धैडूर्यशिरोगृहस्थसुदतीवक्त्रेन्दुबिम्बं विधो-
र्बिम्बं चैव समीक्ष्य संशयमगात्स्वर्भानुरभ्राजिरे ॥ १९ ॥
यत्सौधानवलोक्य निर्जरपतिर्द्राङ्निर्निमेषोऽभव-
द्यस्या वीक्ष्य सरोजशोभिपरिखां गङ्गा विषादं गता ।
यत्रत्यानि जिनालयानि कलयन्मेरुः स्वकार्तस्वरं
स्वीचक्रे च बलद्विषं सुरपुरी यां वीक्ष्य शोकाकुला ॥२०॥
शास्ति स्म शस्तमहिमा महनीयवृत्ति-
स्तां भूपमौलिमणिरञ्जितपादपीठः ।
सत्यंधरक्षितिपतिर्भुवि यस्य कीर्तिः
प्रत्यर्थिभिः सह दिगन्तमवाप शुभ्रा ॥ २१ ॥

यश्च किल संक्रन्दन इवानन्दितसुमनोगणः, अन्तक इव महिषीसमधिष्ठितः, वरुण इवाशान्तरक्षणः, पवन इव पद्मामोदरुचिरः, हर इव महामेनानुयातः, नारायण इव वराहवपुष्कलोदयोद्धृतधर-

णीवलयः, सरोजसंभव इव सकलसारस्वतामरसभानुभृत्, भद्रगुणोऽप्यनागो, विबुधपतिरपि कुलीन., सुवर्णधरोऽप्यनादित्यागः, सरमार्थपोपकवचनोऽपि नरसार्थपोपकवचनः, आगमाल्याश्रितोऽपि नागमाल्याश्रितः ।

कीर्तिर्यस्य दिगङ्गनाकुचतटीपाटीरसंवादिनी
तेजःश्रीः किल तत्र कुङ्कुमकृतालंकारशङ्कावहा ।
आज्ञा यस्य महामहीशमकुटीप्याकल्पमालायते
यत्सेवा सकृदर्थिनां परिचिता स्वर्गद्रुवर्गायते ॥ २२ ॥

यस्मिञ्छासति महीमण्डलं मदमालिन्यादियोगो मत्तदन्तावलेषु, परागः कुसुमनिकरेषु, नीचसेवना निम्नगासु, आर्तवत्वं फलितवनराजिषु, करपीडनं नितम्बिनीकुचकुम्भेषु, विविधार्थचिन्ता व्याख्यानकलासु, नास्तिवादो नारीमध्यप्रदेशेषु, गुणभङ्गो युद्धेषु, खलसङ्गः कलमकुलेषु, अपाङ्गता कुरङ्गाक्षीलोचनतरङ्गेषु, मलिनमुखता मानिनीस्तनमुकुलेषु, आगमकुटिलता भुजङ्गेषु, अजिनानुरागः शूलपाणौ, सोपसर्गता धातुषु, दरिद्रभावः शातोदरीणामुदरेषु, द्विजिह्वता फणिषु, पलाशिता विपिनतरुषण्डेषु, अधररागः सुदतीमुखकमलेषु, तीक्ष्णता कोविदबुद्धिषु, कठिनता कान्ताकुचेषु, नीचता नाभिगह्वरेषु, विरोधः पञ्जरेषु, अपवादिता नीरोप्यकाव्येषु, घनयोगमग्नो वर्षावसानेषु, कलिकोपचारः कामसंतापेषु, कलहंसकुलं क्रीडासरसीषु परमेवं व्यवस्थितम् ।

वक्त्रं चन्द्रप्रभं यद्भुजयुगमजितं यस्य गात्रं सुपार्श्वं
कृत्यं स्वाधीनधर्म्यं हृदि पुरुचरितं शीतलं सुव्रताढ्यम् ।
राज्यं श्रीवर्धमानं कुलमतिविमलं कीर्तिवृन्दं त्वनन्तं
सोऽयं प्रत्यक्षतीर्थेश इव विजयते विश्वविद्याविनोदः ॥२३॥

यत्पाणिपल्लवधृतासिजलान्निमग्न-
च्छत्रव्रजात्समुदितां जलबिन्दुराजिम् ।
तारावलीति तु वदन्ति जना मृषैत-
त्तत्रान्यथा मकरमीनकुलीरकाः के ॥ २४ ॥

यस्य च वदनतटे कोपकुटिलितभ्रुकुटिवाटितेऽशरणतया वनं प्रति धावमानानां प्रतिपक्षपार्थिवानां वृक्षराजिरपि वातान्दोलितशाखाहस्तेन पतत्रिविरुतेन च राजविरोधिनोऽत्र न प्रवेष्टव्या इति निषेधं कुर्वाणा तामतिक्रामत्सु तेषु राजापराधभयेनेव प्रवातकम्पमाना विशङ्कटकण्टकेन केशेषु कर्षतीति शङ्कामङ्कूरयामास । यस्य प्रतिपक्षलोलाक्षीणां काननवीथिकादम्बिनीशम्पायमानतनुसंपदां वदनेषु वारिजभ्रान्त्या पपात हंसमाला, तां कराङ्गुलीभिर्निवारयन्तीनां तासां करपल्लवानि चकर्षुः कीरशावकाः, हा हेति प्रलपन्तीनां कोकिलभ्रान्तिभाविताः शिरस्सु कृशायितं कुर्वन्ति स्म करटाः, ततश्चलितवेणीनामेणाक्षीणां नागभ्रान्त्या कर्षन्ति स्म वेणीं मयूराः, ततो दीर्घं निःश्वासमातन्वतीनां तद्गन्धलुब्धमुग्धमधुकरा मदान्धाः समापतन्तः पश्यन्तोऽपि नासाचम्पकं न निवृत्ता बभूवुः, गुरुतरनितम्बकुचकुम्भभारानतानां वेधसा स्तनकलशमृष्टं काठिन्यं पादपद्मेषु वाञ्छन्तीनां धावनोद्युक्तमनसां चलितपादयुगलमसृतनखचन्द्रचन्द्रिकासु संमिलिताश्चकोरा उपरुन्धन्ति स्म मार्गम्, ततो भुवि निपत्य लुठन्तीनां सुवर्णसवर्णमुरोजयुगलं पक्वतालफलभ्रान्त्या कदर्थयन्ति वानराः, इति राजविरोधिनामरण्यमपि न शरण्यम् । किंच ।

यस्य प्रतापतपनेन चतुर्षु दिक्षु
निःशोषिताः किल पयोनिधयः क्षणेन ।

प्रत्यर्थिभूपसुदतीनयनाम्बुपूरैः
संपूरिताः पुनरतीत्य तटं ववल्गुः ॥ २५ ॥

यस्य च रिपुमहिला वनमध्यमध्यासीना वनमोहनसंजातमञ्जुलमालतीलतानुकारिण्यः स्वशिशुभ्यः पूर्ववासनावशेन क्रीडाराजहंसमानयेति निर्भर्त्सयद्भ्यो बाष्पाम्बुपूरपूरितवदनकमलनयनमीनप्रतिबिम्बपरिष्कृतस्तनान्तरसरोवरमतिफलितचन्द्रमसं निर्दिश्यायं ते हंसो ममापि विरहाग्निव्यालीढवपुस्तथेति परिसान्त्वयामासुः, कदाचिन्मामकीनक्रीडामयूरं दर्शयेति रोदनपरवशेभ्यः स्वार्भकेभ्यो मयूरीपुरतो नृत्यकलाविलासिनं कलापिनं निर्दिश्य तवायं शिखी ममापि तथेति सगद्गदमालपन्तिस्म ।

तस्य सत्यंधरस्यासीत्कान्ता कान्त्यधिदेवता ।
वेला लावण्यपाथोधेर्विश्रुता विजयाख्यया ॥ २६ ॥

सौदामिनीव जलदं नवमञ्जरीव
चूतद्रुमं कुसुमसंपदिवाद्यमासम् ।
ज्योत्स्नेव चन्द्रमसमच्छविमेव सूर्यं
तं भूमिपालकमभूषयदायताक्षी ॥ २७ ॥

अस्याः पादयुगं गलश्च वदनं किंचाञ्जसाम्यं दधुः
कान्तिः पाणियुगं दृशौ च विदधुः पद्माधिकोल्लासताम् ।
वेणी मन्दगतिः कुचौ च बत हा सन्नागसंकाशतां
स्वीचक्रुः मुदृशोऽङ्गसौष्ठवकला दूरे गिरां राजते ॥ २८ ॥
अमूर्तैरप्यनङ्गस्य सत्सु सञ्जीवनेष्विव ।
अन्येष्वन्तःपुरेष्वेषा राज्ञः प्राणा इवाभवत् ॥ २९ ॥

शृङ्गारसागरतरङ्गपरंपरां तां
देवीं सुखेन रमयन्नधिपो नराणाम् ।

आनन्दसिन्धुजठरे विलुठन्सदायं
गीर्वाणराजपदवीं च तृणाय मेने ॥ ३० ॥

अथैकदा भूपालमणिरयमग्रगण्योऽपि प्राज्ञपरिषदामधिपतिरपि राजनयविदामधिकोऽपि परावरतत्त्वयाथात्म्यवेदिनामुदाहरणमपि सकलसमुचिताचाराणाम्, कामपरतन्त्रितचित्ततया कृत्याकृत्यमजानानः, कर्मसारथिचोदित इव सज्जनवनविलसदङ्गाराय काष्ठाङ्गाराय काश्यपीं दातुमियेष । ततो विदितवृत्तान्ता मूर्तिमन्त इव राजतन्त्रमन्त्रा विवर्ता इव प्रजाभागधेयानां प्रकारा इव कुलप्रतिष्ठायाः परिणामा इव क्षमानुरागाणां पारदृश्वानः शास्त्रपाथोनिधीनाममात्यमुख्याः स्वयं संमन्त्र्य नरपतिमभ्येत्य समुचितं विज्ञापयामासुः ।

देव त्वयि प्रथितनीतिपयोधिचन्द्रे
विज्ञापनं न घटते ध्रुवमस्मदीयम् ।
विश्वप्रसिद्धसुरभौ मृगनाभिपुञ्जे
मल्लीसुमेन सुरभीकरणं यथेह ॥ ३१ ॥
अथापि रसनाकण्डूखण्डनाय विनिर्मिता ।
विज्ञप्तिः श्रोतुमधुना श्रीमन्तं संप्रतीक्षते ॥ ३२ ॥

देव श्रीमदीयभुजपरिघालालिता भूमिभामिनी भुजान्तरारोपणम्, नन्दनवनोल्लासिता हरिचन्दनलतेव वनान्तरम्, चूतवनकलिता मल्लीवल्लीव स्नुहिवनम्, कमलवनालया लक्ष्मीरिवार्कवनम्, अरविन्दस्यन्दिमकरन्दमुदिता चञ्चरीकपङ्क्तिरिव गोक्षुरकवनम्, सज्जनसंदोहसमभ्यस्यमाना विद्येव कुदृष्टिजनं नार्हति । अयं किल राजधर्मः श्रीमद्भिरवश्यं ज्ञातव्यो, यन्निजहृदयमपि सर्वथा न विश्वसनीयं किमुत जनान्तरम्, किंतु सर्वेषामपि स्वीयत्वेन विश्वसनीयत्वेन च ज्ञातव्यो यथा चन्द्रसूर्यौ ।

धर्मार्थयुग्मं किल काममूलमिति प्रसिद्धं नृप नीतिशास्त्रे ।
मूले गते कामकथा कथं स्यात्केकायितं वा शिखिनि प्रणष्टे ॥ ३३ ॥

ऊर्वश्यामनुरागतः कमलभूरासावकीर्णी क्षणा-
त्पार्वत्याः प्रणयेन चन्द्रमकुटोऽप्यर्धाङ्गनोऽजायत ।
विष्णुः स्त्रीषु विलोलमानसतया निन्दास्पदं सोऽप्यभू-
-द्बुद्धोऽप्येवमिति प्रतीतमखिलं देवस्य पृथ्वीपते ॥ ३४ ॥

इत्यादिनीतिप्रचुरा वाणी राज्ञो न संस्थिता ।
कामजर्जरिते चित्ते क्षीरं छिद्रघटे यथा ॥ ३५ ॥

तदनन्तरमयं क्षितिपतिरिक्षुचापशरलक्ष्यतया मोहाक्रान्तचेतनः काष्ठान्तरविदितदुराचारं काष्ठाङ्गारमाहूयानीय च विजनं देशमेत-मुवाच ।

कामसाम्राज्यमस्माभिः पाल्यते यन्निरन्तरम् ।
तत्पाल्यतामिदं राज्यं भवतावहितात्मना ॥ ३६ ॥

इति नरपतिवाणीमाहरन्नेप तोषा-
त्प्रतिवचनमुवाच श्रीमता न्यस्तभारम् ।
नृप न हि परिशक्नोम्यद्य वोढुं समस्तं
वृषभ इव करीन्द्रेणार्पितं तुङ्गभारम् ॥ ३७ ॥

तुरगस्य खरो यथा विलासं गरुडस्येव गतानि कुक्कुटः ।
चटकः कलहंसकस्य यद्वत्तव मार्गं न हि गन्तुमुत्सहे ॥ ३८ ॥

इति सप्रश्रयमालपन्तं कुतुककोरकितस्वान्तं भूपतिर्वचनान्तरमत्र न वक्तव्यमिति नियम्य, धन्योऽस्मीति तन्निदेशं शिरसि निदधानं राज्यभारे नियोज्य, प्रतिदिनमेधमानरागलतालवालायितहृदयो विष-यसुखविवशः कानिचिद्दिनानि निनाय ।

अथ कदाचिद्दवसन्नायां निशायां वारुणीसुवासिनीकज्जलकालि-

तरानतकरण्डक इव ग्रहराजदर्शनभयेन सत्वरं निर्गच्छन्त्या निशास्वैरिण्या निपतिततारटङ्क इव नभोवारणकुम्भस्थलकलितमौक्तिकपत्र इव अपरसिन्धुपयःपूरणार्थं यामिनीकामिनीकरकलितस्फाटिकघट इव वरुणदिशावशावल्लभशुण्डादण्डच्युतसपङ्कविस इव मदनसायकशाणोपल इव पश्चिमदिशाविशालाक्षीपुष्पकन्दुक इव चरमधराधरदन्तावलकुम्भस्थलसंभाव्यमानशम्बरारिवज्रखेट इव निशाकरे, वीरजिनपतिकोपाग्निदग्धाङ्गमनङ्गं कलङ्कच्छलेन निजाङ्कमारोप्य संजिजीविषयेव संजीवनौषधानि गगनकाननेषु मार्गयित्वा तत्परिमार्गणायेव चरमशिखरिशिखरमधिरूढे, तत्र विरलतया वर्तमानैः संध्यारुणतमःकालेयपङ्कैरङ्कितगगनपर्यङ्कतले निशाचन्द्रयोः क्रीडासंमर्दविलुलितकुसुमनिकरेष्विव म्लानतामुपगतेषु तारकानिकरेषु, निजकान्तं निःश्रीकमालोक्येव नैजतेजोविरहितेष्वौषधिनिचयेषु, अनेन कुमुदबन्धुना निजवसतिः कमलावलिर्विध्वस्तेति कोपादिव निशाकान्तानिष्क्रान्तायां कमलायाम्, निजनायकविरहानलधूमरेखां निर्गच्छद्भृङ्गमालाव्याजेनोद्गमन्तीषु कुमुदिनीषु, संभोगस्वेदसलिलैः प्रशान्तं मनसिजाग्निं विकचकमलरजःकणैरुद्दीपयितुमिव वहति प्रभातिके मारुते,

निद्रावती सा नरपालकान्ता स्वप्नं ददर्श स्वशुभाशुभान्तम् ।
अस्वप्नगम्यं किल भावि तस्याः स्वप्नेन गम्यं बत संबभूव ॥३९॥

ततः पुरंदराशायां सन्ध्याबन्धूकसच्छविः ।
रुरुचे गगनाम्भोधिविद्रुमोद्यानरानिवत् ॥ ४० ॥

अथाविरासीद्दिवसाधिनाथः प्राचीवधूटीगृहरत्नदीपः ।
व्योमश्रियः सन्मणिकन्दुको वा सन्ध्याङ्गनाया मुखकुङ्कुमं वा ॥४१॥

पूर्वपयोराशितैलोपान्तविराजमाने पतङ्गपातभयेनेवोपरिविन्यस्तगगनमरकतपात्रविशोभिते प्रदीप इव, पूर्ववारिधिविद्रुमच्छटाकान्ति-

शरीभिरिव प्राच्यपयोनिधिसकाशाद्गगनजलधिशोषणायोद्गताभिरिव वाडवाग्निज्वालाभिः प्रभाराजिभिरनुरक्तमण्डले चण्डकरे उदयधराधर-शिखरमधिरूढे,

तावन्महीपालकमन्दिरान्तः पिकप्रतिस्पर्धिमनोज्ञकण्ठाः ।
प्राबोधिकाः पेठुरुपेत्य देव्याः प्रबोधनार्थं ध्वनिभिर्गभीरैः ॥४२॥

देवि प्रभातसमयोऽयमिहाञ्जलिं ते
पद्मैः करैर्विरचयन्दरफुल्लरूपैः ।
भृङ्गालिमञ्जुलरवैस्तनुते प्रबोध-
गीतिं नृपालमणिमानसहंसकान्ते ॥ ४३ ॥
देवि त्वदीयमुखपङ्कजनिर्जितश्री-
श्चन्द्रो विलोचननितं दधदेणमङ्के ।
अस्ताद्रिदुर्गसरणिः किल मन्दतेजा
द्राग्वारुणीभजनतश्च पतिष्यतीव ॥ ४४ ॥
बलरिपुहरिदेषा रक्तसन्ध्याम्बरश्री-
रविमयमणिदीपं रथ्यदूर्वासमेतम् ।
गगनमहितपात्रे कुर्वती भास्वताढ्ये
प्रगुणयति निकामं देवि ते मङ्गलानि ॥ ४५ ॥
देवि त्वदीयकचडम्बरचौर्यतुङ्गा
भृङ्गावली सपदि पङ्कजबन्धनेषु ।
राज्ञा निशासु रचिताद्य विसृष्टहृष्टा
त्वां स्तौति मञ्जुलरवैररिकुरुष्व ॥४६ ॥

पयोजधूलीपरिधूसराङ्गः पक्षौ विधूयाथ वियोगखिन्नः ।
कोऽ स्वकान्तां परिरभ्य तस्या वक्त्रे स्वचञ्चुं कलयन्विभाति ॥४७॥

हंसतूलमयीं शय्यां हंसीव सिक्तातनिम् ।

चान्द्री कलेव शुभ्राभ्रपाङ्क्तिं देवि जहीहि भो ॥ ४८ ॥

इत्यादिप्रबोधिकपद्यालापैर्मङ्गलवाद्यनिनादैश्च कादम्बिनीकलकलैः केकिकान्तेव स्वयेन प्रबुद्धपूर्वापि सा प्रबुद्धा विधाय च प्रत्यूषकृत्यमभ्यग्रमभ्येत्य कृतवैभातिकविधये महासुधिये गुणमन्धराय सत्यंधराय निजकान्ताय महीकान्ताय स्वप्नोदन्तमिमं निवेदयामास ।

आर्यपुत्र जितामित्र दृष्टाः स्वप्नास्त्रयो मृशम् ।
वाचालयन्ति मां चूतकोरकाः कोकिलामिव ॥ ४९ ॥

आर्यपुत्र सुत्रामविभव विभावर्याः पश्चिमे यामे कश्चन तरुरशोकोऽपि केनचित्कुठारपाणिना छेदनशोकं प्रापितो जातश्च हाटकमकुटघटितो बालाशोकविटपी तत्परिसरेऽष्टापि माला दृष्टा इति ।

तमिमं स्वप्नोदन्तमाकर्ण्य, विचिन्त्य च शुभाशुभोदर्कफलम्, आत्मापायशङ्काशङ्कुनिचितचेतनो हर्षशोकरसोन्मग्न इव चन्दनविषरसाभ्यां मनस्यालिप्त इव कमलिनीकण्टककमलदलकलितपक्षः सितपक्ष इव स्थितोऽपि, अहार्यधैर्यचातुर्यावगाढमतिरयमम्भोनिधिगम्भीरः कुम्भिनीपतिरशुभफलमाद्यस्वप्नं मनसिकृत्य शुभफलं स्वप्नद्वयमन्तःकृतक्षुद्रदन्तो दन्तावल इव दन्तयुगलमुदबभयामास ।

पुत्रं नृपालतिलकं कुलरत्नदीपं
प्राप्तोऽपि देवि सुरराजदिशेव सूर्यम् ।
दृष्टो यतः समकुटो नवबालवृक्षः
कान्ता भवन्ति खलु तस्य तदृष्टमालाः ॥ ५० ॥

श्रुत्वा च देवी श्रवणायताक्षी पत्युर्वचः सा पुनरानभाषे ।
निद्रासते मे हृदयं प्रियाद्यस्वप्नस्य साध्यं प्रतिपादयाद्य ॥ ५१ ॥

इति निजवल्लभामभ्यमोदासीन्येनोत्तरयति महीवल्लभे, तदिङ्गितज्ञा मा कुरङ्गलोचना, तरङ्गितदुःखपूरपरिप्लुतान्तरङ्गा करिनिनम्बिनीव

गिरिनितम्बान्निनासनान्निपत्य भुवि लुठन्ती, स्वात्मनि दुष्पूरतया बाष्पव्याजेन प्रवहता दुःखपूरेण बहिःप्लावितयेव चेतनया विमुमुचे । तावन्निजकान्ताचेतनापरिमार्गणायेव गतया संज्ञया विनिर्मुक्तो नरनाथोऽपि कथंचिल्लब्धसंज्ञः प्राज्ञाग्रेसरः कथंकथमपि राज्ञीमुत्थाप्य तीरातीतशोकपारावारमध्ये प्लवविप्लवविवशायास्तस्याः पोतायितं वचनजातमुत्तरङ्गयामास ।

स्वप्नेन दृष्टेन सरोजनेत्रे किं मां विनष्टासुमितस्ततोऽपि ।
संत्रातुकामाः खलु साधुवृक्षं नराः कदाचिन्न हि निर्दहन्ति ॥९२॥

किं कल्पते कुरङ्गाक्षि शोचनं दुःखशान्तये ।
आतपक्लेशनाशाय पावकस्य प्रवेशवत् ॥ ९३ ॥

ततो विशालाक्षि निशाकरास्ये घर्मो विपन्नाशनमातनोति ।
सूरो यथा स्फारहिमप्रणाशं चन्द्रो यथा संतमसस्य नाशम् ॥९४॥

इत्यादिसान्त्ववचनैः कान्तां परिसान्त्वयन्लब्धाश्वासया तया समं यथापुरं नरपतिर्विषयसुखपारवश्येन रममाणः कानिचिदहान्यतिवाहयाञ्चक्रे ।

ततश्च विषयसुखपरवशस्य विशांपतेः स्वमवृत्तान्तप्रबोधनायेव सा नरपालसती, महाकविभारतीव गभीरार्थम्, शारदाब्जसरसीव राजहंसम्, रत्नाकरवेलेव मणिम्, पुरन्दरहरिदिवेन्दुमण्डलम्, गिरिगुहेव सिंहकिशोरम्, हेमकरण्डिकेव रत्नम्, सिन्धुशुक्तिकेव मुक्ताफलम्, गर्भं बभार ।

तदा हि तस्या वदनाम्बुजातं गर्भार्भकस्येव यशोविलासैः ।
अल्पैरहोभिः परिपाण्डरत्वमवाप चन्द्रेण च सर्वसाम्यम् ॥९५॥

यथा यथासौदुदरं विवृद्धं तथा तथास्याः कुचकुम्भयुग्मम् ॥
श्यामाननत्वं समवाप राज्ञा स्वमस्य पाकादनुतापकर्त्रा ॥ ९६ ॥

संवृद्धमुदरं वीक्ष्य तत्ततौ मलिनाननौ ।
न सहन्ते हि कठिना मध्यस्थस्यापि संपदम् ॥ ५७ ॥
श्यामाननं कुचयुगं दधती वधूः सा
पाथोजिनीव मधुपाञ्चितकोशयुग्मा ।
पङ्क्तास्यहंसमिथुना सरसीव रेजे
लोलम्बचुम्बितगुलुच्छयुगी लतेव ॥ ५८ ॥
अन्तःस्थशिशुगाम्भीर्यं दृष्ट्वास्या नाभिमण्डलम् ।
लज्जयेवाद्य तत्याज गाम्भीर्यं भूभुजा समम् ॥ ५९ ॥
मध्यदेशश्चकोराक्ष्याः शिशुना वलिना तदा ।
भक्त्वा वलित्रयं राज्ञस्तापेनाभूत्समं गुरुः ॥ ६० ॥
नीलाब्जानि जितान्यासञ्जय्यमद्य सिताम्बुजम् ।
इतीव देव्या नयनयुगलं धवलं बभौ ॥ ६१ ॥

तावत्सदोहलां महिलामिमां दृष्ट्वा स्मृत्वा च दुःस्वप्नफलं पश्चात्तापपराहतस्वान्तो महीकान्तोऽयमात्मरक्षणपरायणश्चिन्तामेवमकरोत्। दुष्कर्मपरिपाकपराभूततया मया विषयानुरागापथ्यसेवनेनातिलङ्घितानि सचिववचनसंजीवनौषधानि । अथवा कृतमनयास्थानपतितया गतजलसेतुबन्धनसकाशया वाञ्छया । किंतु फलकालिककल्किकापत्यवाञ्छेवोपलास्यतां मानेति ।

एवं विचिन्त्य धरणीरमणस्तदानीं
वंशस्य रक्षणविधौ परिकल्पचित्तः ।
आस्थां यशस्युपरतिं च शरीरवृत्तौ
कुर्वन्नचीकरदमात्य इह क्रियन्तम् ॥ ६२ ॥
मेघावलिः सुफलगी स्वममाननाम्नां
वर्षासु मत्तशिखिनां शिखिनां सहेतु ।

इत्थं विचिन्त्य किल कल्पितकैकियन्त्रं
राज्ञा विनुन्नमनरद्वनसंनिधाने ॥ ६३ ॥
राजा च राजवदनां महिषीं विधाय
यन्त्रे तदीयवनकेशविनिर्जिताभ्रम् ।
संद्रष्टुकाम इव दोहदकालली लां
संभोक्तुमभ्रसरणौ विजहार धीरः ॥ ६४ ॥

तावत्सं दुराचारः काष्ठाङ्गारः, काष्ठान्तरेषु शान्ताङ्गारसकाशभासं रानवः कृतघ्न इत्याद्ययशोविलासं समार्जयन्, संमार्जयंश्च सकलहितवृत्तिम्, राजद्रोहनियन्त्रितचित्तो निजान्तःकरणे चिन्तयामास । लोके पराधीनं जीवितं परमोत्कृष्टपदवीमवाप्तमपि सरसमोचाफलनैसर्गिकमधुरक्षीरादुपचारपरिलालितपञ्जरबद्धशुकशावकजीवनमिव विनिन्दितम्, निजबलविभवसमार्जितमृगेन्द्रपदसंभावितस्य कुम्भीन्द्रकुम्भस्थलपाटनपटुतरखरनखरस्य मृगेन्द्रस्येव स्वतन्त्रजीवनमतिनिन्दितमभिनन्दितमनवद्यमतिहृद्यम्, इति ।

इत्थं मनसि संचिन्त्य कृतघ्नः सचिवैः सह ।
संमन्त्रयितुमारेभे राजद्रोहपरायणः ॥ ६५ ॥
भवतां वचनमां पदं प्रदातुं मम वाणी पुर एव संनिधत्ते ।
नवनाटकरन्तुमंकुथानां पुरतो रङ्गभुवं गता नटीव ॥ ६६ ॥
राजद्रोहसमुद्यतं प्रतिदिनं दैवं हि मां बाधते
द्रोहं राज्ञि समाचरेति तदिदं किं वा मुखान्तं भवेत् ।
यद्वा दुःखफलं गमेति हृदयं डोलायते मन्त्रिणा-
स्तत्कर्मत्रिविधैर्विनिश्चयमिनैर्निश्चेयमन्यादृशैः ॥ ६७ ॥
यातुं निर्वहणावधि स्थिरतया परिनिन्दितम् ।
दैवस्य भयादहं यदि निद्रां प्रापते ॥ ६८ ॥

इत्थं कृतावहित्थात्काष्ठाङ्गारवचनबन्धात्सत्कुलप्रसूता इव वचनीयात्, यमिजना इव प्राणिगणपरिपीडनात्, हरिणशावका इव दावानलज्वालात्, राजहंसा इव घनाघनघनगर्जितात्, दरिद्रा इव दुर्भिक्षयोगात्, सभास्तारास्तत्र तत्रसुः ।

तत्र राजनयरानितचित्तो धर्मदत्तसचिवस्तमूचिवान् ।
स्वामिभक्तिपरिवर्धितवाणीमात्मजीवितविनाशकृपाणीम् ॥ ६९ ॥
प्राणा नृपालाः सकलप्रजानां यत्तेषु सत्स्वेव च जीवनानि ।
भूपेषु या द्रोहविधानचिन्ता सर्वप्रजास्वेव कृता भवित्री ॥ ७० ॥
समस्तपातकानां हि सामानाधिकरण्यभूः ।
राजद्रुगेव भविता सर्वद्रोहित्वसंभवात् ॥ ७१ ॥
राज्ञो विरोधो वंशस्य विनाशाय भविष्यति ।
ध्वान्तं राजविरोधेन सर्वत्र हि निरस्यते ॥ ७२ ॥
हर्षाय लोकस्य धराधिनाथः क्षिप्राति नित्यं परिपालनेन ।
छायाश्रितानां परिपालनाय तरुर्यथामोति रविप्रतापम् ॥ ७३ ॥

इति नीतिविदां वरिष्ठस्य सचिवश्रेष्ठस्य वचनं पित्तोपहत इव मधुरतरक्षीरं राजद्रोहगुरुद्रोहादिषु बद्धान्तरङ्गः काष्ठाङ्गारः स्वहितं मनसि न चकार, चकार च विकारजनितविद्वेषम् ।

स्यालस्तदीयो मथनाभिधानो वाणीं कृतघ्नस्य हितामसंस्त ।
काकः स्फुरन्निम्बफलप्रसूतिमास्वादनीयां बहुमन्यते हि ॥ ७४ ॥

अथ सोऽपि काष्ठाङ्गारस्तत्काल एव नरपालनिर्यासनिग्रः कृतघ्नः करटतटविलुठन्मदधाराव्यानेन वह्नीः कल्लोलिनीरुद्धमाद्रिरिव धराधरैर्गन्धसिन्धुरैः सैन्यसागरतरङ्गैरिव रङ्गत्तुरङ्गै रयविजितरविरथैरमित्ररथैर्भुजचन्दनतरुकोटरान्निर्गच्छन्तीर्भुजगीरिव कृपाणीलताः समुद्वहद्भिः पादातैः परिशोभमानां सेनां नरेन्द्रमन्दिररोधनाय समादिदेश ।

समुज्जृम्भे संभूतस्तदा दुन्दुभिनिस्वनः ॥
धुन्वन्निव धरामर्दीश्चालयन्दलयन्नभः ॥ ७५ ॥

ततो नटद्भटाटोपघटितभुजास्फोटचटुलरवनिष्ठुरेण मदवारणकण्ठ-रवघण्टाघोषभैरवेण कण्ठीरवरवकुण्ठनपटुपोषितहयहेषितभीषणखरत-रखुरपुटवट्टनकुट्टिमजनितकठोरध्वनिनिर्भरेण पदातितातिपादाहति-प्रोद्भूतभूरिभ्रूवभीकरेण सन्ततपरिस्पन्दन्मदमन्दवेगस्यन्दनचक्र-चीत्कारमेदुरेण धानुष्ककरकलितधनुष्टंकारकर्कशेन प्रतिध्वानित-कुलाचलकन्दरकुलेन कोलाहलेन भरितं तस्य बलं भूपतिभवनमुपरु-रोध ।

दौवारिकस्य वचनादुपरोधकृत्य-
माकर्ण्य कर्णपरुषं पुरुषाधिराजः ।
रोषेण चूर्णितशुचा स हि धीरधीरः
पश्चाननासनतलादुदतिष्ठतायम् ॥ ७६ ॥

तावत्प्रतिष्ठमानं प्राणकान्तमनुसृत्य कृतप्रयाणान्प्राणान्परिमार्गितु-मिव भूमौ निपतितां तां निर्भरगर्भभरतान्तामालोक्य पुनर्न्यवर्तिष्ट नरवरिष्ठः ।

प्राबोधयच्च एतस्मीशः कथंचिल्लब्धचेतनाम् ।
देवीं ज्ञानं हि दुःखाब्धितरणे तरणीयते ॥ ७७ ॥
शम्पानिभा संपदिदं शरीरं चलं प्रभुत्वं जलबुद्बुदाभम् ।
तारुण्यमारण्यसरित्सकाशं क्षयिष्णुनाशो हि न शोचनीयः॥७८॥
संयुक्तयोर्वियोगो हि संध्याचन्द्रमसोरिव ।
रक्तयोरपि दंपत्योर्भविता नियतेर्वशात् ॥ ७९ ॥
बन्धुत्वं शत्रुभूयं च कल्पनाशिल्पिनिर्मितम् ।
अनादौ सति संसारे तद्भयं कस्य केन न ॥ ८० ॥

इति नरनाथवचनपरिपाटी निष्टप्तलोहपतितवारिधारेव शोकानलज्वालालीढे देव्या मनसि किंचिदप्यार्द्रतामनासादयन्ती निर्दग्धभूम्युप्तबीजराजिरिव विफला बभूव ।

राजा सगारोप्य शिखण्डियन्त्रमापन्नसत्त्वां सरसीरुहाक्षीम् ।
संभ्रामयामास च मेघमार्गे हा हा बत क्रूरविधेर्विपाकः ॥८१॥

अथ कलापियन्त्रे बलाहकमार्गमधिरूढे, मृगेन्द्र इव गिरिकन्दरान्मन्दिरान्निर्गत्य, निखिलपरिवारविकलो वसुधापतिरसहाय एव रणाङ्गणमवतीर्य, धैर्यावगाढहृदयस्तत्राभ्यमित्रीणं शात्रवमन्त्रिणं संगरसंनद्धं निध्याय, क्रोधपरतन्त्रितचित्तो योद्धुमुपचक्राम ।

चण्डवात इवाम्भोदान्मण्डलाधिपतिर्भटान् ।
निनाय कान्दिशीकत्वं पञ्चाननपराक्रमः ॥ ८२ ॥
जिगाय मन्त्रिणं वीरो जनानामधिपस्ततः ।
जन्याजिराभ्रतिग्मांशुर्जयश्रीप्राणवल्लभः ॥ ८३ ॥

अथ काष्टाङ्गारोऽपि संगरे निजामात्यभङ्गं निशम्य, तरङ्गितक्रोधकुटिलितभ्रुकुटीविटङ्कः सामजसमानवाजिपादातशबलेन बलेन सनाथो नरनाथमभिगम्य, बहुधा युद्ध्वा, वैराग्यायत्तचित्ततया प्राणिगणवधविरतं तं वयस्य इव स्वःस्थतां निनाय ।

स्वर्गं भूपो ययौ सद्यो राज्यलक्ष्मीं भेरीशब्दः श्रुतेर्ध्वं च देव्याः ।
मोहं शोकं पण्डिताः स्त्रीविरक्तिं जन्यं शान्तिं योगपद्यात्प्रपेदे ॥८४॥

ततश्च कुणपकबलनार्थं मिलितनिःशङ्ककङ्ककाकसङ्कुलमभ्यर्णसंज्वलच्चिताचक्रज्वालासंतप्ततया निजाग्रभागसमारोपितपाटच्चरगलनिर्गलनिर्गलल्लोहितधारासंसर्गसंजातचुंकारिधूम्यसच्छादितैः शूलैः समाकीर्णं सामिदग्धं शवं चिताहुतवहादाकृष्य खण्डशो विच्छिद्य खादन्तीनां डाकिनीनां कोलाहलेन कटाग्निदह्यमाननृकरोटिपटुचटात्कारेण च

भीकरं तत्पुरप्रेतागारमवलोकमाना सा नरदेवमहिषी मूर्छापहृतचेतना बभूव ।

अजानती कश्मलपारवश्यात्प्रसूतिपीडां नरपालजाया ।
मासे तदा वैजनने दिनेऽस्मिन्प्रासूत सूनुं तपनं यथा द्यौः ॥८५॥

तदा जनकराज्यश्री द्रष्टुं मूर्तिमिवास्थिता ।
सुतस्य भाग्यसंपद्वा देवता काचिदागता ॥ ८६ ॥

दिशि दिशि विसरद्भिः पुत्रतेजोविलासै-
र्बहलतिमिरजाले नाशिते तत्क्षणेन ।
विलसितमणिरूपा देवताकल्पितरूपा
सुतरुचिपरिभृता मङ्गलार्था बभूवु ॥ ८७ ॥

तस्या मुखेन्दोरवलोकनेन शोकाम्बुधिर्वृद्धिमवाप देव्या ।
अभ्यग्रभावः किल बान्धवानां सुखस्य दुःखस्य च वृद्धिहेतुः ॥८८॥

हा मनोज्ञाकाररूप हा महागुणमणिद्वीप हा मानसविहारराजहंसस्वरूप हा मदनकेलिचतुरभूप मम प्राणैकरूप क्वासि क्वासीति विलपन्तीं शोकविषमोहिताङ्गीं लताङ्गीं तां देवतापि लोकोत्तरतोक्तोत्तममहिमवर्णनपीयूषपरिषेचनेन समुज्जीवयन्ती सुवर्णसवर्णेषु तदीयाङ्गेषु लसदूर्णाप्रमुखविलक्षणलक्षणप्रदर्शनेन प्रत्याययन्ती तनुजवर्धनोपायचिन्तासंतमसदूरीकरणधीरतरमित्थं गिरमुत्थापयामास ।

पुत्रस्य वर्धनविधौ विजहाहि चिन्तां
संवर्धयिष्यति सुतं तव कश्चिदेनम् ।
चन्द्रश्चकोरमिव चूततरुर्यथा वा
बालं पिकं कमलिनीविसरो मरालम् ॥ ८९ ॥

तदास्व एवात्र मृतं तनूजं विमृज्य गन्धोत्कटवैश्यनाथः ॥
योगीन्द्रवाक्यस्मरणेन सूनुं गवेषयन्लोचनगोचरोऽभूत् ॥ ९० ॥

तं दृष्ट्वा देवतावाक्यं प्रमाणं निश्चिकाय सा ।
संवादेन हि सर्वेषां प्रामाण्यमवगम्यते ॥ ९१ ॥

ततो महीकान्तकान्ता, निजान्तरङ्गरविकान्तजाज्वल्यमानप्रियविप्रयोगशोकानलकीलाकलापं तनयसुन्दरवदनचन्दिरालोकेन शमयिष्यन्ती, सरोजलोद्धृतशफरीव विना शिशुना स्थातुं क्षणमपारयन्त्यपि देवतावचनजनितविस्रम्भभावेन गत्यन्तराभावेन च गन्धोत्कटश्रेष्ठिसमर्पणाय कथं कथमप्यनुमतिमापाद्यमाना, स्वभावत एव समुद्रमपि निर्निद्राणतेनसां पुत्रं पित्रीयमुद्रया समुद्रं विधाय, विधाव च पुरतो, देवतया सह सहसान्तरधात् ।

पितृवनवनमध्ये बालसूर्यप्रकाशं
सुतमतिवितताभ्यां लोचनाभ्यां पिबन्तः ।
तृषित इव सरोऽम्भश्चातको यद्वदभ्र-
प्रसृतजलकणालिं नातृपद्वैश्यनाथः ॥ ९२ ॥

अयं च, एधोऽन्वेषिजन इव महानिधिं महीशसुतमासाद्य, सद्य एवाङ्कुरितपुलकापदेशेन हृदयालवालसंजातमङ्गलमोदलताकोरकानिव बिभ्राणः, प्रीतेः परां कोटिमात्मजं चादधानः, तदङ्गस्पर्शसुखपारवश्येन प्रमदजलनिधिमग्न इव, हृदयान्तरे मलयजरसलिप्त इव, हिमवालुकादीर्घिकानिमज्जन्मूर्तिरिव, मोहाक्रान्त इव, निद्राण इव, मत्त इव, परिमूढेन्द्रियगण इव, निर्मीलितचैतन्य इव, आनन्दपरंपरायाः परां काष्ठामातिष्ठमानो, जीवेत्याद्याशीर्वचनमाकर्ण्य, तमनङ्गरूपधेयं महाभागधेयमङ्गजं तन्नामधेयेनालंचकार ।

ततः स्वकीयावसथं समेत्य वणिक्पतिः कुद्ध इवाबभाषे ।
जीवन्तमप्यात्मजमद्य मत्ते विना परीक्षां मृतकं किमात्थ ॥९३॥

यद्वा संभ्रान्तचित्तानां वनितानां स्वभावतः ।

युक्तं न किं कुमारस्य मारान्तत्वप्रकल्पनम् ॥ ९४ ॥

इत्यादिवचनसायकेन निजनायकेन समर्पितं नयनानन्दनं नन्दनं सुनन्दापि समाददाना तदङ्गसौष्ठवकलावलोकनजनितदृष्टिदोषपरिहारायेव तरलतरकटाक्षनीलोत्पलदाममेचकरुचिवीचिकाविचितमातेने ।

पायंपायं नयनचषकै रूपलावण्यलक्ष्मीं
सौधीं धारां प्रकृतिमधुरां वैश्यजायापती तौ ।
स्पर्शंस्पर्शं कुसुममृदुलं विग्रहं तस्य सूनो-
स्तृप्तिं प्राप्यानितरसुलभां प्रापतुर्विस्मयाब्धिम् ॥ ९५ ॥

देवता च महिषीतनुवल्लयाः साम्यमाश्रमलतास्विव द्रष्टुम् ।
बान्धवालयपराङ्मुखीमिमां दण्डकावननिवासमनैषीत् ॥ ९६ ॥

अथ समीहितार्थसिद्धिजनिततोषकलितायां देवतायां सव्याजमन्तर्हितायामियं च राजपत्नी नैजमानससरोवरे सन्ततविकचजिनपादपयोजविशोभिते नन्दनराजहंसं संक्रीडयामास ।

या हंससतूलशयनस्थलतान्तवृन्त-
क्लेशासहा पुरि पुराजनि काननान्ते ।
दर्भेषु हन्त शयनं बहुमन्यते स्म
सा मालतीकुसुमकोमलगात्रयष्टी ॥ ९७ ॥

पुरेऽपि मानिनीवारतोषितायाः सतीमणेः ।
काननेऽजनि नीवारोऽप्याहारोऽस्याः किमद्भुतम् ॥ ९८ ॥

तावन्नन्दनसमागमसंजातमोदबन्धोत्कटेन तंतन्यमानं महोत्सवसार्थमात्मार्थं गणयता सकलसद्धर्मपरमकाष्ठाङ्गारेण काष्ठाङ्गारेण दापितमर्थजातं तत्क्षणजातैस्तदाज्ञासमानीतैरितरैरपत्यैः सह लब्ध्वायमूरुनयोतिरितरात्मजैः समं निजात्मजमावेशेषेण वर्धयामास ।

यथा यथा जीवकयामिनीशो विवृद्धिमागाद्विलसत्कलापः ।

तथा तथावर्धत मोदवार्धिरुद्वेलमूरव्यनिकायभर्तुः ॥ ९९ ॥

उत्तानशयने बिभ्रन्मुष्टिं तुष्टिकरः सुतः ।
उद्यत्कुड्मलयुग्मश्रीपद्माकरतुलां दधौ ॥ १०० ॥

मुग्धस्मितं मुखसरोजगलन्मरन्द-
धारानुकारि मुखचन्दिरचन्द्रकाभम् ।
पित्रोः प्रमोदकरमेष बभार सूनुः
कीर्तेर्विकासमिव हासमिवास्यलक्ष्म्याः ॥ १०१ ॥

पयोधरं धयन्सूनुः पयो गण्डूषितं मुहुः ।
उद्गिरन्कीर्तिकल्लोलं किरन्निव विदिद्युते ॥ १०२ ॥

सञ्चरन्स हि जानुभ्याममले मणिकुट्टिमे ।
प्रतिबिम्बं परापत्य बुद्ध्या संताडयन्नभौ ॥ १०३ ॥

क्रमेण सोऽयं मणिकुट्टिमाङ्गणे नखस्फुरत्काश्चिन्नरीभिरश्चिते ।
स्खलत्पदं कोमलपादपङ्कजक्रमं ततान प्रसवास्तृते यथा ॥१०४॥

तावत्सुनन्दापि जलगर्भेव कादम्बिनी, रत्नगर्भेव वसुमती फल-गर्भेव वल्लरी तेजोगर्भेव शुनासीरकाष्ठा श्रेष्ठिसती शनैरन्तर्वत्नीधुरामा-बिभ्राणा क्रमेण नवमासेष्वतीतेषु नन्द्याढ्यं नाम नन्दनं जनयामास ।

तत्सौभ्रात्रेण विभ्राजन्मन्मनालापलालितः ।
जीवकस्तनयैरन्यैर्मुदा चिक्रीड पांसुषु ॥ १०५ ॥

अथ पञ्चमे वयसि सञ्चरन्प्रत्यक्षपञ्चशरः समुदञ्चितव्यक्त-वचनप्रपञ्चः स्वयमागतस्य सकलकलाकल्लोलिनीशैलस्यार्यनन्दि-नामधेयस्यानार्यवर्यस्योपकण्ठे कण्ठीरवकिशोराकृतिरयं प्रत्यूहव्यूह-परिहाराय परिकल्पितसिद्धनमस्यः सिद्धमातृकाप्रसिद्धां सरस्वतीं परि-शीलयामास ।

लेभे जीवंधरो वाणीं क्रमनिर्जितसिन्धुरः ।

नमस्यन गुरुं सोऽयं मनस्यमितभक्तितः ॥१०६॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे सरस्वतीलम्भो नाम प्रथमो लम्बः ।

द्वितीयो लम्बः ।

अथ हृद्यतमं किंचन विद्यासदनमासाद्य वयस्यसंसदवतंसितं, जीवंधरः सकलकलाकलापैरपरकलाविलुब्धैरिव स्वयं निवासगृहतया परिगृहीतादखिलपण्डिताखण्डलादस्मादाचार्यवर्यादखिलाः कलाः, वसन्तादिव वनप्रियः कलरवलीलाः, घनसमयादिव कोकिनरुणः केकाः, अध्यगीष्ट ।

तच्चित्ताम्बुजमापेदे सूर्योलोकाद्विनिद्रताम् ।
प्रासूत च कलाजालमकरन्दझरीं ततः ॥ १ ॥

समस्तविद्यावनितासमागमे निरस्तविघ्ना गुरुभक्तिरेव ।
विलोभनीयस्य वधूभिरन्तत' सुतस्य तस्य प्रबभूव दूती ॥ २ ॥

पराभूते जीवंधरशशभृता पर्वशशिनि
कलाचातुर्गुण्याद्विलसदमृतं वाचमगमत् ।
मुखं कान्तिः प्राप्ता सकलजगदानन्दकरता
तदीयाङ्गं प्रापत्पदनखमभूत्सोऽपि शशभृत् ॥ ३ ॥

इति निजविद्याललितलतामस्य हृदयालवालपल्लविनामवलोक्य, प्रीते' परा काष्ठामधिनिश्चमान' प्रसन्नचित्तवृत्तिरयं सूरि', एकदा-जिनेन निजप्राप्तमाप्तमन्तमन्तेवासिनमित्थमचीकथत् ।

श्रुताम्बुधे' पारगत शृणु त्वं प्रवीण कस्यापि चरित्रभाव्यम् ।
भवाप्य य श्रोत्रपथेन चित्त दधानटीनर्तनमत्रधार ॥ ४ ॥

विद्याधराणां विनिवासलोके कालं नृपः कश्चिदजीगमद्यः ।
कृत्येन नाम्नापि च लोकपालो विद्याधरोऽभूद्विबुधेश्वरोपि ॥ ५ ॥

एकदा महीपतिरयमुदयशिखरिशेखरं हरिदश्व इव हर्यक्षासनमलङ्कुर्वन्, गगनजलधिजलनीलीपटलमिव वियद्वनविहरमाणस्तम्बेरमिव सुरलोकसमारोहणार्थमाकलितसोपाननीलोपलमिव कंचन जलधरं नीलमपि नयेनेन पीतमातन्वन्, क्षीबाणां क्षितिपानामैश्वर्यं क्षणक्षीणमिति बोधयन्तमिव तत्क्षणमन्तर्हितमवलोक्य निजनन्दनक्षिप्तराज्यभारो विजृम्भितवैराग्यसाम्राज्यप्रतिष्ठामधितिष्ठन्, सकलसांसारिकदुःखशमनदीक्षां जैनीं दीक्षामाससाद ।

तपांसि भूपः स हि तप्यमानस्तपस्यया प्रापितरुग्विलासः ।
विपाकतः सञ्चितकर्मणां तद्भुगन्तरं भस्मकमाटिटीके ॥ ६ ॥

तदनु दिने दिने प्रवर्धमानं भस्मकरोगमल्पेन तपसा निस्फुलिङ्गेनेवार्द्रेन्धनं खद्योतेनेव संतमसं नखराञ्चिकयेव महारण्यं शमयितुमशक्नुवानः, पूर्वं राज्यमिव तपःसाम्राज्यमपि परित्यजन्, पापण्डितपसा सगाच्छादितः, सैराहारान्नाफल इव गुल्मान्तर्हितो विष्किरान्समाददानो यथेष्टमवर्तिष्ट ।

तदनु नगरारामं सोऽयं जगाम बुभुक्षया
क्वचिदविरलैरक्ताशोकोल्लसन्नवपल्लवैः ।
विशदवियतः सन्ध्यारागाञ्चितस्य सुलक्षणं
क्वचन कुसुमैरन्यारामान्हसन्तमिव स्थितम् ॥ ७ ॥

यस्मिन्पिके पञ्चममञ्जगानं समाश्रिते मन्दमरुद्धकुंसः ।
आनाटयत्यातनभृङ्गनादकलारवां लोलतावधूटीम् ॥ ८ ॥

यश्च किल कुत्रचिन्निरन्तरनिम्नतत्पुष्पपरिष्कृततया वनदेवतासमागमनाय विस्तृतदुकूलसंस्तरणमिव बिभ्राणः, क्वचन कुसुमावपान-

मत्तमधुपान्धीकृततया समुदञ्चिताञ्जनपुञ्जमिव संदधानः, क्वचिद्-निविततकङ्केल्लीपल्लवतल्लजरुचिझरीविराजिततया निजानुरागं प्रकटय-न्निव, क्वचन विकचकोकनदकान्तिसंक्रान्तसरोवरशोभिततया कुङ्कुम-क्षोदझरमिव समाकलयन्, कुत्रचन डोल्यर्थमिव लताप्रतानमातन्वन्न-दृश्यत ।

सुतान्तेरस्तत्र समाचरन्तं क्रीडां भवन्तं स हि संददर्श ।
नक्षत्रवृन्दैः परिशोभमानं यथा सुराणां पथि बालचन्द्रम् ॥ ९ ॥
कियद्विदूरं पुरमित्यनेन पृष्टो गिरं त्वं मधुरामुवक्थ ।
मुखेऽम्बुजभ्रान्तिपतद्भिरेफांस्तन्वन्सितान्दन्तमणिप्रभाभिः ॥१०॥
नगरोपवने बालक्रीडासमवलोकनात् ।
पुरमासन्नवृत्तीति वृद्धो नानुमिनोति कः ॥ ११ ॥
धूमदर्शनतो वह्निं नावगच्छति कः पुमान् ।
शीते वाते समायाते कः समीपे जलस्थितिम् ॥ १२ ॥

इत्यादिवचनपीयूषधारासेकेन त्वदीयरूपलक्षणसंपदवलोकन-जनितसुखबीजेन च हृदयालवालजनितप्रीतिप्रतानिनीं तावकान्वय-निश्चयेन पुष्पितां चिकीर्षुं दुर्धर्षजाठरदहनबाधां शिशमयिषुमाहा-रयाञ्चापरनन्त्रितमानसमेनं कुहनातापसं भवान्भवनमानीय तदीय-भोजनकृते पौरोगवमादिदेश ।

तदनु त्वयि भोजनाय यत्नं कृतवत्यारभतान्नमेष भोक्तुम् ।
नव वाङ्मयगोस्तनीविमिश्रं मुखशोभामृतपानकं पिपासुः ॥१३॥

तावदर्भकस्वभावेन सर्वमुष्णमिदं कथं भुञ्जेऽहमिति रोदनव-शेन नयनकञ्जयुगसञ्जातमकरन्दपूरकानुकारिणीभिरश्रुधाराभिर्नयन-कमलवास्तव्यलक्ष्मीवक्षःस्थलस्थपुटितमालामुक्ता इव किरन्तं भवन्तं समीक्ष्य, भिक्षुरयं निश्चानिशायिमनिर्माल्यमाहितस्य भृशमपरोदन-

निदानस्यापि तव रोदनं कथमिति चित्रमित्तीयते चित्तमित्याबभाषे ।
श्रुत्वा वाणीं तस्य मन्दस्मितेन तन्वन्निर्यत्क्षीरधारेति शङ्काम् ।
इत्थं वाचामाचचक्षे भवान्वै मोचामाध्वीमाधुरीमादधानाम् ॥ १४ ॥

श्लेष्मच्छेदो नयनयुगलीनिर्मलत्वं च नासा-
शिङ्घाणानां भुवि निपतनं कोष्णता भोज्यवर्गे ।
शीर्षाबद्धभ्रमकरपयोदोषबाधानिवृत्ति-
रन्येऽप्यस्मिन्परिचितगुणा रोदने संभवन्ति ॥ १५ ॥

इति वचनमयसुधां श्रवणपुटे सिञ्चता भिक्षोरपारबुभुक्षासमीक्षणजनितवैलक्ष्यप्रापितजोषभावेन करुणावरुणालयेन भवता वितीर्णम्, शयकुशेशयकररुहरुचिसुरसरिड्डिण्डीरखण्डायमानम्, करकल्पतरुस्तबकशङ्कावहं नखचन्द्रैः सह परिचयाय समागतचन्द्रबिम्बसंभावनासंपादकम्, आशातरङ्गिणीशोषणशारदसमयखण्डायितं करकबलमास्वाद्य, सद्य एव तृप्तिमापन्नः कर्मन्दो, संदीपितजठरदहनशमनेन महोपकारं मन्यमानः, परमनन्यसामान्यसौजन्यतया परमोत्कृष्टफलां कलां तुभ्यं प्रतिपादयामास ।

विद्यावल्ली पात्रसुक्षेत्रदत्ता प्रज्ञासिक्ता सूक्तिभिः पुष्पिता च ।
आशायोपित्कर्णभूषायमाणां कीर्तिं प्रोद्यन्मञ्जरीमादधाति ॥१६॥

विद्याकल्पतरुः समुन्नतिमितः प्राप्तोऽपि गम्यो नतेः
पुष्पाण्यत्र समेत्य मञ्जुलमहोऽमुत्र प्रसूते फलम् ।
किंचायं खलु मूलमाश्रितवतां संतापमन्तस्तनो-
त्यूर्ध्वं संचरतां नृणां पुनरसौ तापं धुनीतेतमाम् ॥१७॥

इति गुरोरुदन्तमाकर्ण्य कर्णरसायनम्, मौनमेवोत्तरमादधानो, यदनवनजे मानससरसि च प्रश्रयमृणालीगर्भमुखमादधतीं शेष्योपाख्यायिकामरालीं खेलयन्, गुरुशुद्धिविज्ञानेन लब्धमणिपरिशुद्धिज्ञानं-

नेव मोदजलधेः परं पारं गतोऽपि, गुरूपदिष्टे सागारधर्मसागरे मममज्ज सज्जनहृदयचन्दनो नन्दनः ।

तदनु विजनं देशं नीत्वा गुरुः सुतपुङ्गवं
व्यवृणुत गिरा राजोदन्तं दुरन्तमिदंतया ।
विदितजनकोदन्तः सत्यंधरस्य सुतस्तदा
सुलभजनुषा रोषेणासीज्जगन्ति दहन्निव ॥ १८ ॥

एवं गुरुवचनेन स्वस्य राजपुत्रत्वं काष्ठाङ्गारस्य राजहन्तृत्वं च निश्चित्य, समेधमानक्रोधघनक्षयस्येव संदीपितशराग्नेरपि तमेनमिन्धनं चिकीर्षुः, क्रोधान्धगन्धसिन्धुर इव गुरुणा दुर्निवारसरभससन्नाहः सात्यंधरिः, बन्धुरयुद्धारम्भसंरम्भान्न विरराम । गुरुरपि तदीयदुर्धर्षामर्षविस्तारितसमरसंरम्भमवलोक्य, न पुनरयमन्यथा विरमतीति निश्चयमणिं हृदयपुटपेटके निधाय, वत्स वत्सरमेकं क्षमैव मह्यं गुरुदक्षिणा विधेयेति, कथंकथमपि सात्यंधेरायोधनसन्नाहसंधानं निवारयामास ।

न कार्यः क्रोधोऽयं श्रुतजलधिमग्नैकहृदयै-
र्न चेद्यर्था शास्त्रे परिचयकलाचारविधुरा ।
निजे पाणौ दीपे लसति भुवि कूपे निपततां
फलं किं तेन स्यादिति गुरुरथोऽशिक्षयदमुम् ॥ १९ ॥

इत्यादिनीतिपदवीमाशास्य, तमाश्वस्य, विश्वातिशायिनं पन्थानमास्कन्दितुममन्दादरमेदुरे तस्मिन्गुरुवरे गतवति तपोवनम्, पश्चिमपयोधिवेलावनमिव भास्वति, जीवंधरस्तत्स्मरणसंधुक्षितगुरुविरहशोकाशुशुक्षणिं तत्त्वज्ञानपयःपूरेण निर्वापयामास ।

तावत्तारुण्यलक्ष्मीर्नृपतनयतनुं प्राप वल्लीं यथा वा
पुष्पश्रीः पारिजातस्थितिमिव विबुधाशास्यवासन्तलक्ष्मीः ।

गङ्गेवाम्भोनिवेलां शरदिव शशिनो मण्डलीमब्धिपालीं
प्रातः सूर्यप्रभेवामलकुमुदवनीं शारदी कौमुदीव ॥ २० ॥
सौन्दर्यस्य परा काष्ठा शृङ्गारस्य परा गतिः ।
खनिः कलानां यस्यासीन्मूर्तिर्गनन्ददायिनी ॥ २१ ॥

यस्य च रूपमादिमोदाहरणं रूपसंपन्नदेहानाम्, अधिदैवतं कान्तिसंपदाम्, संजीवनौषधं सौन्दर्यस्य, सङ्केतसदनं शृङ्गारस्य, जीवितरसः सारस्यसारस्य, केलीभवनं कलानाम्, शिक्षास्थानं नर्मविलासानाम्, शृङ्गाटकं संगीतविद्यानाम्, आकर्षणौषधमायतार्क्षीनयनानाम्, बन्धनगृहं युवतिजनमानसानाम्, सेचनकं सकलजनलोचनानाम्, अगोचरपदं कविवचनानाम्, अङ्कुरक्षेत्रं कीर्तिस्फूर्तीनाम्, आवासस्थलं जयलक्ष्मीविलासानाम्, आस्थामन्दिरं लक्ष्मीसरस्वत्योः, सञ्चरदिव सकलनयनसुखम्, सचेतनमिव महीमाहिलाभाग्यम्, साकारमिव प्रतापपटलम्, सजीवमिव गाम्भीर्यम्, सङ्घीभूतमिव शौर्यम्, सारूप्यमेयमिव कुरुवंशभागधेयम्, वेधसः सकलशिल्पैनैपुण्यप्रदर्शनमुदजृम्भत ।

अथैकदा व्याधजनाधिराजो मर्त्यार्कृतिं प्राप्त इवान्धकारः ।
क्रूरेण नाम्नापि च कालकूटः सेनायुतो गाः सकला जहार ॥ २२ ॥

तदनु गोपाक्रोशपशविदितवृत्तान्तः काष्ठाङ्गारोऽपि, असमानकृतामवज्ञां मृगाधिप इव शृगालकृतामसहमानः, अन्तर्दीप्यमानक्रोधानलज्वालाभिरिव पाटलरुचिभिराक्रान्तवदनः, शालवनिनम्बिनीगर्भसमाविर्भूतार्भकनिर्भेदनपटुतरैर्भैरीभांकारैरितरोहितपारावाररवम्, कालकूटापदेशेन पुञ्जीभूतस्य तिमिरस्य संहरणाय विधात्रा विनिर्मितैरनेकविवस्वन्मण्डलमण्डितैरुदयाचलैरिव कनकखेटककलितकुम्भस्थलैर्दन्तावलैः, संदानितलोहखलीनवदनाविलनिर्गलच्छालाजलफेनिलानन-

नया जन्याजिरकरिष्यमाणसपत्नयशःपानमनुकुर्वद्भिरिवार्वद्भिः, रथकज्यया, पादातेन च, समभिक्रमनीकम्, कालकूटबलपाटनाय प्राहिणोत्।

वरूथिनीं वीक्ष्य स कालकूटः स्वकं पुरोधाय बलं चचाल।
प्रत्यर्थिसैन्यं परितो दिधक्षुः कोपाग्निना मृत्युरिव क्षणेन ॥२३॥

तदनु मिलितं सैन्यद्वन्द्वं बलादुपचक्रमे
समरमतुलं पत्त्रिव्रातैर्विदीर्णपरस्परम्।
चलदसिलतापातैर्भिन्नेभकुम्भविनिर्गल-
न्मणिगणविभापूरैर्दीप्तं रजोऽन्वितमप्यलम् ॥ २४ ॥

तदानीम्, अमित्रकरकलितमण्डलाग्रखण्डितगण्डतलनिःसरदसृग्धारारानितगगनतायां गैरिकधातुनिःसृतनिर्झरशोभितोभयभागधराधरानुकारिण्याम्, गनकीलालपङ्किलसमराजिरे निजखुरनिमज्जनशङ्कयेव गगनगमनतुङ्गेषु निपादिजनविषादभङ्गेषु तुरङ्गेषु नाम्नैव कृत्येन चंमदोत्कटकरटिघटायां हरिरिति विख्यातिं प्रख्यापयत्सु, करलाघवनगेनालक्ष्यशरसन्धानमोक्षणकालेषु सदा समारोपितशरासनतयालेख्यलिखितेष्विव धानुष्केषु पदगगनतलचराचरकरालकरवालखण्डितमस्तनिकरेष्वतिदूरमुत्पत्य गगननलधिशतपत्रशङ्काकरेषु, पुरुषद्वयसमवहच्छोणितवाहिनीसेतुशङ्कासंपादकभिन्नमतङ्गजगात्रपरंपराबन्धुरायामायोधनधरायाम्, व्याधयोधनिरन्तरनिर्मुक्तनाराचधारापूरितान्तरेषु दिशि दिशि कान्दिशीकतां प्रापितेषु काष्ठाङ्गारिकसैनिकेषु, व्याधसेना व्याजेष्ठेति घोषो घोषान्तरमुत्तरङ्गयामास ।

तदोरुजानामधिभूः स्वमित्रैरालोच्य निश्चित्य च नन्दगोपः ।
विवक्षितं तस्य नृपस्य कर्णपथमनृतं चतुरश्चकार ॥ २५ ॥

तदनु पुलिन्दमंदोहतो गोविमोक्षणं विधास्यते दास्यते गोपेन्द्रनन्दगोपनन्दिनी सप्तनामीकरपुत्रिकाभिः साकमिति पटुतरं पुटभेदन-

चत्वरे काष्ठाङ्गारेण कारितां वोपणां निशम्य विशालतरकुतुकः सात्यंधरिस्तद्वोपं निवारयामास ।

सहायताधिष्ठितपार्श्वभागो जीवंधरो मन्दिरतः प्रतस्थे ।
द्विपैरनेकैः परिवार्यमाणो हिमाद्रिरन्ध्रादिव यूथनाथः ॥ २६ ॥

ततो निजयशःकलशार्णवतरङ्गैरिव चामरयुगलपरिशोभितपार्श्वतया नभःसरणिसञ्चरणयोग्यौ पक्षाविव बिभ्राणैः लपनबिलतलविगलितफेनशकलदन्तुरितपुरोभागतया रयविजितपवनसमानीतमुक्तोपहारानिवाङ्गीकुर्वाणैः स्यदनिरीक्षणक्षणहीणान्हरिदश्वहरिताश्वान्गगनकाननदुर्गेषु धावमानानन्वेष्टुमिव गगनसरणिमुत्पतद्भिर्जयोदर्कैः कर्कैः परिष्कृतावथानलंकुर्वन्तः, शताङ्गचक्रक्षुण्णक्षितितलोद्धूतधूलिकापालिकां सकलजगदन्धंकरणधुरीणां पताकापटपवनेन धून्वन्तः, देहबद्धा इव वीररसाः, मूर्ता इवोत्साहाः, जयलक्ष्मीनिवासमन्दिरकनकमाकारायिताङ्गदविभ्राजितभुजदण्डाः, लक्ष्मीविहारलीलाडोलायितमुक्तादामविराजितवक्षःस्थलाः, ते जीवंधरप्रमुखाः, कार्मुकटङ्कारक्ष्वेलारवमुखरितदिशावकाशाः संयदङ्गणं समाजग्मुः ।

प्रविदारणमाविरास तत्र प्रथमं बाणगणैः परस्परम् ।
अरुषा च रुषा क्षणं विहीनं विशिखादप्यभवच्छिखी यतः ॥२७॥

नखांशुमयमञ्जरीसुरभिलां धनुर्वल्लरीं
समागतशिलीमुखां दधदयं हि जीवंधरः ।
अनोकह इवाबभौ भुजविशालशाखाञ्चितो
निरन्तरजयेन्दिराविहरणैकसंवासभूः ॥ २८ ॥

कुण्डलीकृतशरासनान्तरे जीवकाननममर्षपाटलम् ।
स्पर्धते परिधिमध्यमास्थितं चन्द्रबिम्बमिह सन्ध्ययारुणम् ॥२९॥

जीवंधरेण निर्मुक्ताः शरा दीप्ता विरेजिरे ।

विलीनान्समिति व्याधान्द्रष्टुं दीपा इवागताः ॥ ३० ॥

तदनु जिष्णुचापचुम्बिजीवंधराम्बुधरनिरवग्रहनिर्मुक्तशरधाराभिः कालकूटबलप्रतापानले शान्ततां नीते, निशितशस्त्रनिकृत्तकुञ्जरपदकच्छपाः, भल्लावलूनहयमल्लाननपयोजपरिष्कृताः मदवारणकर्णभ्रष्टचामरहंसावतंसिताः, कीलालवाहिन्यः समीकधरायां परःसहस्रमजायन्त ।

जित्वा किरातबलमेष यशःप्रसूने-
राशाविशालनयनाः सुरभीचकार ।
क्षीराम्बुदानिव सदा स्रवदत्पयोभिः
सिक्तान्तिकान्पशुगणानहरच्च धीरः ॥ ३१ ॥

पुरा खलु यः शम्बरारातिश्चापलालिजीवंधरश्च जगति विश्रुतो बभूव, सोऽयमधुना शबरारातिश्चापलालिजीवंधरश्च संवृत्त इति, न बिन्दुमात्रेणापि विशेषः । पूर्वं सारसशरोऽयमधुना सरसशर इत्याकारतो विशेषेऽप्याकारसाम्यमखण्डितमुल्लसत्येवास्येति विचित्रमेतत् । अथ पौराणां हर्षातिरेक एतावानिति गगनतलप्रसारितवेजयन्तीभुजाभिबोधयदिव मोदोत्तरमेतत्पुरं प्रविश्य स्वयं विशिखाधारस्यापि विशिखाधेयतामास्कन्दतः सकलवयस्यमण्डलमध्यमध्यासीनस्य जीवंधरस्य देहसहकारे शौर्यस्थैर्यधैर्यमञ्जरीमञ्जुले कीर्तिसौरभ्याकर्षिताः पौरजानपदनयनपुष्पंधया निरन्तरमापितुः ।

नन्दगोप इति विश्रुतमेषः संमदाम्बुनिधिमाशु निपीय ।
वारिपातमकरोत्करपद्मे जीवकस्य शुभलक्षणजुष्टे ॥ ३२ ॥

जीवंधरोऽपि नन्दगोपेन पातितामच्छवारिधारां तत्सहचरीं मन्दस्मितप्रकाशितकुन्दकुड्मलरुचिवीचिस्नापितामिव 'पद्मास्यो योग्यः' इति शुद्धवर्णां वचोधारां पातयन्नेवोरीकुर्वन्, दूरीकृतरुष्टः 'मम

पद्मास्यस्य च भावभेदो न तु जीवभेदः' इति मैत्रीविभवं विभावयन्,तत्परिणयमहोत्सवारम्भं मत्रा मित्रामित्रजनानन्ददोग्ध्यां कन्दलयामास ।

शुभे मुहूर्ते स हि नन्दगोपसुताकराब्जग्रहणं चकार ।
वह्निं पुरस्कृत्य विधिं विधाय पद्मास्यनामा परिणीतियोग्यः ॥३३

गोविन्दायास्तनुतनुलतां चञ्चलामत्यनीकां
कान्त्या पुष्यत्कनककदलीकन्दलीगर्भगौरीम ।
हेलोन्मीलत्कुचयुगलमन्मौक्तिकस्तबकाभिः
स्पष्टाभ्यर्णां स हि बहुमुदा चक्षुषा पश्यति स्म ॥३४॥

यस्याः पादौ मृदुलकमलस्पर्धिशोभाविलासौ
जङ्घे मारत्रिभुवनजये काहलीवद्यभाताम् ।
नाभिः पञ्चायुधरसभरीकूपिकेवाविराजी-
द्भङ्गं राकासितरुचितुलासंगमङ्गीचकार ॥ ३५ ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पूजीवंधरे
गोविन्दालम्भो नाम द्वितीयो लम्बः ॥

तृतीयो लम्बः ।

अथ दिने दिने प्रवर्धमानानुरागः पद्मास्यनामा राजहंसतरुणस्त्रिवलीलहरीविराजिते नाभिमहावर्तशोभिते गोविन्दानामतरङ्गिण्या उदरह्रदे कंचन कालं रममाणः, काञ्चीविहङ्गविरुतमुखरिते नननितम्बविम्बपुलिने कतिपयसमयं स्थितिमापन्नः, करेण मेचकचूचुकलोलम्बचुम्बितवक्षोरुहकमलकुड्मलं स्पृशन्, आनन्दलहरीभिरभ्युक्षितः, कुचचक्रवाकमञ्जुले सुरभिलश्रीखण्डद्रवपङ्किले कञ्चुलीकोमलशैवलपेशले वक्षःस्थलकमलाकरे विहरमाणश्चिरमिन्द्रियग्रामं तर्पयामास ।

जीवंधरोऽपि कमनीयकलावधूटी-
कीर्त्यङ्गनां जयरमां च समानवृत्त्या ।
उल्लासयन्सकललोचनभागधेय-
माविभ्रदाकृतिमनन्दमुदावतस्थे ॥ १ ॥

तस्मिन्पुरे वैश्यजनस्य नेता श्रीदत्तनामा वसति स्म कश्चित् ।
यस्यस्तहेहो धनलाभहेतू प्रासाददेशो रमतां चिराय ॥ २ ॥

कदाचिदसौ रत्नवाणिज्यपरायणो रत्नद्वीपं गन्तुकामः प्रस्थानमाचरन्क्रमेण लङ्घितानेकजनपदनगरग्रामः, स्फुटितशुक्तिमौक्तिकवितानतारकितं मकरमीनकुलीरराशिसमाश्रितमपरमिव गगनतलं निशि निपीतनिशाकरकरनिकरं डिण्डीरखण्डकपटेनोद्गमन्तमिव, क्वचिच्चलाचलकुलाचलैरिव कल्लोलयद्भनमनुभवद्भिस्तिमितिमिङ्गिलैः पुरैरिवोपास्यमानम्, क्वचन माणिक्यराशिरश्मिलहरीपरीतजलमामिषशङ्कयाभिधावद्भिः पुनः पावकभिया धावमानैर्मनिराकुलीनम्, कुत्रचिद्देदीप्यमानफणामणिभिस्तरङ्गसंगतैर्भुजङ्गैर्निबिडिततया परिणाहादिगुणेन विजितं विश्वेनमाकाशमूर्मिहस्तविधृतदीपिकाभिरन्वेषमाणमिव, कुत्रचन विततनिद्रुमवनराजिविराजिततया प्रत्यक्षीकृतौर्वानलमिव, क्वचन गङ्गासिन्धुप्रमुखनदीकान्ताः समागताः प्रसारितलहरीबाहाभिराश्लिष्यन्तमिव, पुरःप्रकाशन्तमुदन्वन्तं ददर्श ।

यत्राम्भोमनुनास्तटोत्थपवनप्रोद्भूतवीचीवन-
ध्वान्तप्रस्तदृशः प्रमर्दितमिलच्छैवालमाला बभुः ।
कुम्भीन्द्राश्च महाप्रमाणनधिलं भूमीधरोद्धारि-
भ्रान्त्या विश्वपुनर्निवृत्तिमगमंस्तज्जलमालासहाः ॥३ ॥

तं वारांनिधिमारीक्ष्य नयनेन वणिग्वरेण्यः ।
विस्मयान्वितमानसो रत्नमनसङ्गिन ॥ ४ ॥

तदनु पोतमारुह्य द्वीपान्तरं गत्वा तत्र विचित्रैरुपायैर्बहूनि द्रविणानि संपाद्य संपदा शम्पायुधमन्तरिक्षाकूपारसञ्चरणक्षमैरावणस्कन्धाधिरूढमनुकुर्वन्निव महायानपात्रमारुह्य सांयात्रिकपतिरसाववारान्तमाडुढुके ।

ततो घनघनारवस्फुटितसर्वदिग्भित्तिकः
पपात तरणौ तदा बहलवर्षबिन्दूत्करः ।
निजप्रतिभटस्फुटप्रचुरमौक्तिकाडम्बरा-
सहिष्णुरिव गोचरो न हि विपत्क्षणः प्राणिनाम् ॥ ५ ॥

सांयात्रिकोऽसौ सकलांस्तरिस्थान्पुरैव शोकाम्बुधिमग्नदेहान् ।
संतारयामास स तत्त्वबोधपोतप्रदानेन परावरज्ञः ॥ ६ ॥

शनैः शनैर्नावि नष्टायां दिष्टेनैव संनिधापितं दृष्टं कूपखण्डमारुह्यात्मानं लब्धप्राणं मन्यमानो नष्टशेवधिरपि संतुष्टहृदयः किंचन द्वीपमासाद्य तत्र यादृच्छिकमिव गतं कंचन विद्याधरं प्रति चापलवशेन निजोदन्तं प्रतिपादयामास ।

श्रुत्वाथ तेन च मिषेण स नीयमानो
रूप्याचलं स्मितनिभं धरणीरमण्याः ।
शृङ्गैर्नभोनिकषणोपललीढलुङ्गै-
र्लेखाचलं परिहसन्तमिमं ददर्श ॥ ७ ॥

यत्सानुनीलमणिदीप्तिपरंपराभिः
पञ्चाननस्य शिशवो बहु विभ्रलब्धाः ।
सत्येऽपि कन्दरमुखे परिशङ्कमाना
निश्चित्य गर्जनकृतध्वनिभिर्विशन्ति ॥ ८ ॥

स्वं वीक्ष्य वन्याद्विरदो नितम्बे यस्य बिम्बितम् ।
समेत्य दन्तैस्तं हन्ति मदिनां का विवेकिता ॥ ९ ॥

मृगाधिपा यत्र गजभ्रमेण घनावलिं गर्जनसंभ्रमेण ।
उत्पत्य वेगान्नखरप्रहारैर्विदार्य कोपेन समुत्सृजन्ति ॥ १० ॥

यश्च किल, क्वचित्खगाङ्गनासङ्गदुकूलभ्रमनिषेवितसितजीमूतपरिवृतः, क्वचन हरिन्मणिमयतटनिःसृतविभाविभावितातिग्मरुचिबिम्बे गगनसरसि सरोजिनीहरितपलाशशङ्कां तटचरनभश्चराणामुपजनयन्, कुत्रचिन्महीरुहपरंपरासु कादम्बिनीशङ्क्या कलधौततलस्फुटनटनपटुबर्हिप्रतिबिम्बकपटेन स्थलसमुत्फुल्लनीलाञ्जनमालासंदेहं दधानः, क्वचन सरसि समुद्भूतसारसराजहंसकूजितैर्लतावलसितान्तमकरन्दपानमत्तेन्दिन्दिरमनोहरझंकारैरुपवनतलालङ्कारसहकारप्रवालचर्वणगर्वितकलकण्ठकण्ठरवैश्च हृदिशयं निर्निद्राणं कुर्वाणः, कुत्रचन मञ्जुलवञ्जुलनिकुञ्जविहरमाणखगकञ्जनयनाजनरत्यन्तश्रमहारिसमीरकिशोरमनोरमः समदृश्यत ।

दुर्वर्णभूधरे तत्र सर्वं स्वागतिकारणम् ।
अभाणीत्खेचरः सोऽयं स्पष्टमेव वणिक्पतेः ॥ ११ ॥
श्रेण्यां धरस्यास्य हि दक्षिणस्यां गान्धारदेशस्य ललामभूता ।
पुरी निरालम्बतयान्तरिक्षाच्च्युता सुराणां नगरीव भाति ॥१२॥
यामन्वर्थाभिधेयेन नित्यालोकेति खेचराः ।
वदन्ति नीरदा यस्या गवाक्षद्वारचारिणः ॥ १३ ॥
यत्सालमाला स्फुरदंशुजाला पयोधरप्रोल्लसदम्बरश्रीः ।
वक्षःस्थलीव प्रमदाजनानां मनो जरीहर्ति च निर्जराणाम् ॥१४॥
यद्गोपुराग्रसुत्राममणिपुत्रिविराजिते ।
धृतसूक्ष्मदुकूलेव शारदाम्बुजमालया ॥ १५ ॥
गरुडवेग इति क्षितिपालकः सकलखेचरसेवितवैभवः ।
इह पुरीमनुशास्ति यथा दिवं सुरपतिः कमनीयशोभनः ॥१६॥

शरीरिणी कान्तिपरंपरेव सदेहबन्धा शशिनः कलेव ।
जनश्चला विद्युदिवापरेव श्रीधारिणी तस्य चकास्ति पत्नी ॥१७॥

गन्धर्वदत्ता तस्यास्ति तनया विनयोज्ज्वला ।
या मन्मथमहाहर्म्यवलभीमणिदीपिका ॥ १८ ॥
अस्या बाल्ये कुवलयदृशो विग्रहं त्यक्तुकामे
तारुण्ये चागमनरसिके मन्मथद्वारचारे ।
मौढ्ये याते चतुरिमरसेऽप्यागते तत्कृशाङ्ग्या
मध्यं सूक्ष्मं जघनवलयं भूधराभं विभाति ॥ १९ ॥
मुखेन्दुर्लोलाक्ष्याः सितरुचिरुचिं निन्दतितरां
भ्रुवौ चापाटोपं सपदि झषकेतोः कलयतः ।
कुचौ मन्दं मन्दं लिकुचतुलनां कन्दलयतः
शनैः पादन्यासो मदकरमरालीं विजयते ॥ २० ॥

सा राजपुरे साराकारा स्वयमद्वितीयापि वच्छकीविनयिनो यूनो द्वितीया भविष्यतीति दैवज्ञोपज्ञवचनविस्रम्भविजृम्भितचित्तो महीकान्तः कान्तया सह संमन्त्र्य राजपुरोपवनालङ्कारस्य सागरसेननाम्नो जिनराजस्याधिपरिसरं संजातां युवयोः प्रीतिलतां शनैः पल्लवितामद्य फलितां चिकीर्षुस्त्वदागमनाय मां प्राहिणोत् ।

नाम्ना धरोऽहं तव नौविनाशविभ्रान्तिमापाद्य महीभ्रमेनम् ।
आनीतवानित्यभिधाय सोऽयं खगोऽधरोष्ठं घटयाञ्चकार ॥२१॥

श्रीदत्तोऽपि तदाकर्ण्य वदुषा मुमुदेतराम् ।
नष्टस्यार्थस्य संप्राप्तिः कामदोग्ध्री मुदां न किम् ॥ २२ ॥

विद्याधरीकरसरोरुहराजहंस-
युग्मायमानचलचामरवीज्यमानम् ।

राज्यश्रियो नयनयुग्मगलत्कटाक्ष-
धारापरीतमिव खेचरभूमिपालम् ॥ २३ ॥
मदनद्रुममञ्जुमञ्जरीभिः स्फुटलावण्यपयोधिवीचिकाभिः ।
महितं वरवारकामिनीभिर्बहुसौन्दर्यतरङ्गिणीझरीभिः ॥ २४ ॥
खेचरेन्द्रमकुटीतटीलसन्मौक्तिकप्रतिफलत्पदाम्बुजम् ।
हारयष्टिपरिमण्डितोरसं निर्झराञ्चितहिमाद्रिसच्छविम् ॥ २५ ॥
तं ददर्श स्वगाधीशमकुटारूढशासनम् ।
मोदवार्धेः परं पारमपि सांयात्रिकाधिपः ॥ २६ ॥

तमेनं सभाजिरविरानितमणिमयासनमलङ्कुर्वन्तं मूर्तीकृतमिव सौहार्दं सांयात्रिकं स्मितसंभाषितादिभिः संतर्पयन्, निजनन्दिनी-स्वयंवरवृत्तान्तं कर्णामृतं मनसो रसायनं च कारयन्, चकार तद्दृशां निजतनयां विदितनयां ध्वजिनीं च कलितादरो विद्या-धरपतिः ।

विद्याधरेशस्य निदेशमेत्य सेनां पुरोधाय परीतमानम् ।
सांयात्रिकोऽसौ मुदमाप पूर्वं पश्चात्तयामा निजराजधानीम् ॥२७॥

तदनु विविधरत्नचयविनिर्मितम्, राजपुरलक्ष्मीमुखावलोकनार्थं परिकल्पितमणिमुकुरायमाणम्, गगनविसृत्वरैर्मरकतपद्मरागालोकैर्घ-नाघनघनरहितेऽपि नभःस्थले सुरचापशङ्कामादधानम्, कुङ्कुमरस-प्रचुरपयःसंसेकशीतलम्, तत्र तत्र विकीर्णकुसुमकुलसुरभिलम्, वीणाविजयिनो जनिष्यमाणकीर्तिलतावीजराजिमिव मुक्तामयरङ्ग-वल्लीमाबिभ्राणम्, स्वयंवरमण्डपं परिकल्प्य, राजानुमतिपूर्वकं तदुद्घन्तं कटकेषु घोषयामास ।

तदेतदाकर्ण्य महीक्षितस्ते स्ववाहिनीभिस्ततदिक्प्रदेशाः ।
पुरीं पताकाभिरिवाह्वयन्तीं नरा इवाब्धिं शतशः समापुः ॥२८॥

मञ्चेषु तत्र घनरत्नमयेषु भूपाः
क्षीरोदवीचिनिकरेष्विव चन्द्रबिम्बाः ।
रूप्याद्रितुङ्गशिखरेष्विव पञ्चवक्त्रा
भान्ति स्म पञ्चशरवञ्चननारुरूपाः ॥ २९ ॥

ततः सकलनेत्रकुरङ्गाणां वागुरायमाणतनुलता, मूर्तेव मदनसाम्राज्यपदवी, राजधानीव शृङ्गारमहीपालस्य, वेला लावण्यसुधापयोनिधिवीचीनाम्, सर्वस्वमिव नवयौवनस्य, सञ्जीवनमिव सौभाग्यस्य, मूर्त्यन्तरमिव लक्ष्म्याः, अमृतवर्तिरिव भूपतिदृशाम्, विशालनयनविलासविजितनीलोत्पला गन्धर्वदत्ता याप्ययानमारुह्य स्वयंवरमण्डपमवततार ।

ततः करसरोरुहममृतकान्तिपारंपरी-
प्रकल्पनवपल्लवभ्रमसमागतालिस्वरैः ।
परीतवरवल्लकीमृदुलतानगीतादिभि-
र्व्यनेष्ट खगसुन्दरी सकलदेशपृथ्वीपतीन् ॥ ३० ॥

खगेशतनयाकराश्रितविपञ्चिकामाधुरी-
रसं श्रवणभाजनैः सकलगीतविद्याविदः ।
निपीय वनितारदच्छदमिहाधरं मेनिरे
सुधामपि सुरोद्धृतां मधुपपानयोग्यं मधु ॥ ३१ ॥

तदनु प्रत्यक्षपञ्चशरः पञ्चशतमित्रजनपरिवृतो जीवंधरः, स्वयंवरसभामिरं समागत्य, वीणाकलाकुशलान्प्राज्ञाग्रेसरान्गुणदोषपरीक्षायां विधाय, अभिधाय च नियोगिजनानीतासु त्रिचतुरासु वीणासु केशरोमलवादिकं दोषम्, अतिसंतोषपरवशया कन्यया समर्पितां निजकरालङ्कारभूतां सुघोषां नाम वीणां परिजग्राह ।

आदाय तामयमथो करकौशलानि
तन्त्र्यां खगेशतनयो निजचित्तमस्मिन् ।
संगीतधीरपरिषच्छिरःप्रकम्पं
तेने कृतघ्नमुखराजगणोऽपि लज्जाम् ॥ ३२ ॥
कुमारवरवल्लकीगुणरवेण सर्वे मृगा
विहाय मृदु शाद्वलं विदधिरे क्षणात्तब्धताम् ।
स्वरश्च जिनशारदाश्रवसि शीर्षकम्पापत-
द्वदान्यतरुपल्लवे पदमहो निधत्ते स्म सः ॥ ३३ ॥

तावत्सा गन्धर्वदत्ता पराजयमेव जयं मन्यमाना व्रीलातरलनयन-प्रसृतकटाक्षदुग्धधारां दिशि दिशि किरन्ती वेत्रवतीकरकलितां मालिकामादाय जीवकस्य वक्षस्यामुमोच ।

सौभाग्याम्बुधिवीचिकेव विलसद्वक्षःस्थलीसैकते
शंसन्ती सुकृतेन्दुनन्ददुदयं जीवंधरस्वामिनः ।
मालासावचकादुरःस्थलवसल्लक्ष्मीकटाक्षावली
प्रक्षिप्ता विजयाय भाविसमरे मालेव वीरश्रिया ॥ ३४ ॥
वीणा गन्धर्वदत्ताया मधुरा चित्तहारिणी ।
कुलोचिता बभूवेयं कुमारप्राप्तिदूतिका ॥ ३५ ॥
अथ जलदजलध्योर्नादशङ्कां वितन्व-
न्मुखरितसकलाशाचक्रवालान्तरालः ।
निखिलपुरवधूटीचित्तहारी विशेषा-
त्समभवदिह मन्द्रस्तूर्यमूर्च्छद्धिरावः ॥ ३६ ॥

तदा दिनदीपायितेन काष्ठाङ्गारेण कुप्यक्रयविक्रययोग्यो वैश्य-सुतः कथं स्त्रीरत्नयोग्य इति संधुक्षिताः क्षितिपतयो गतमतयः सर्वाभिसारेण चमूं पुरोधाय विमूढमनसः संयुगमारभन्त ।

इह खलु कुमारोऽयं विद्याधरैः स्वबलावृते-
र्जयगिरिरिति ख्याते मत्तद्विपे, विनिविष्टवान् ।
प्रतिभटघटाटोपं भिन्दन्नुदारपराक्रमो
दिशि दिशि सपत्नांस्तांस्तांल्लीनांश्चकार निरंकृतः ॥३७
रत्नस्तम्भविजृम्भितामलरुचां व्याप्ताखिलाशान्तरा-
मेकत्रोदितकोटिसूर्यपटलीसंदीप्तिशङ्कावहाम् ।
शालां तत्र च पद्मरागखचितां वेदीं व्यधात्तत्क्षणं
सर्वेषां हृदयस्थरागलहरीं मूर्तामिवासौ वणिक् ॥ ३८ ॥

तदनन्तरं विद्याधराधिपतिर्गरुडवेगनामा समागत्य वधूवरस्य सुरदम्पतीसन्निभस्य स्फटिकमणिपट्टके विनिवेशितस्य करनखरकान्ति-द्विगुणितभावल्याभिर्भुजवंशविगलन्मुक्ताझरीसंभावनासंपादिकाभिर्बा-हुभुजगफणामाणिक्ययोजितमणिमयकुम्भविगलत्पयोधराभिरभिषेकमङ्ग-लं निर्वर्तयामास ।

क्षीराब्धिडिण्डीरचयायमानं श्लक्ष्णं दुकूलं वसनं वसानौ ।
तौ प्राङ्मुखं भूषणगेहमध्ये निवेशितौ वज्रविकीर्णपट्टे ॥ ३९ ॥
अनयोः कान्तवपुषि भूषणानां च भूषणे ।
आकल्पकल्पना नूनं मङ्गलैकफला भवेत् ॥ ४० ॥
यद्वा भूषणवृन्दस्य शोभासंपादकाङ्गके ।
तयोर्नैपथ्यकलितिस्तु दृष्टिदोषस्य हानये ॥ ४१ ॥
सीमन्तं परिकल्प्य खञ्जनदृशो वक्त्रप्रभानिम्नगा-
मार्गाभं सुममालिकां च विदधे तत्फेनपुञ्जायिताम् ।
आस्ये नीललतिकां सहचरीवक्त्रेन्दुलक्ष्म्यायितां-
मक्ष्णोरञ्जनमाननाक्रमकृतोः सीमन्तरेखामिव ॥ ४२ ॥

सेरन्ध्रीजनकरकल्पिता तस्याः कपोलतलमकरी, मकरकेतोः

पताकेयमिति समागता साक्षान्मन्मथंवेजयन्तीमकरीव, गण्डमण्डललावण्यसरोवरे निपततां युवनेत्रपततां बन्धनाय वेधसा विरचितः पाश इव, व्यराजत ।

तस्याः कपोलललितौ मृगनाभिकल्पन-
पत्रच्छलेन कचबृन्दतमःकिशोरौ ।
द्राग्बाधितुं रवियुगं किल कर्णशोभि
ताटङ्कयुग्ममधिकं रुरुचे मृगाक्ष्याः ॥ ४३ ॥
जगत्त्रयजयायास्या बलगतः पुष्पधन्वनः ।
सचाणतूणवद्रेजे पुष्पचारु कचव्रजम् ॥ ४४ ॥
तस्याः शरीरगतनुचापयष्टेर्मौर्वीव रेजे फणितुल्यवेणी ।
सखीप्रकल्पा मुखपद्मगन्धलोभागता भृङ्गपरंपरेव ॥ ४५ ॥

एवमलङ्कृताभ्यां ताभ्यां यथास्थानं जलेन विनिवेशिताभ्यां परिष्कृता मणिदीपमङ्गलद्रव्यशोभिता मणिवेदिका सुरदम्पतीसंगता रत्नसानुतटीव व्यरोचत ।

वधूवरमिदं तुल्यवयोरूपपरिष्कृतम् ।
सिद्धस्नानाम्भसा पूतमलंचक्रे महासनम् ॥ ४६ ॥

तावत्कोणताडितनिस्साणप्रमुखवादित्ररववाचालितदिक्तटे मारसतीपदनूपुररवानुकारिमधुरगानचतुरवाराङ्गनानर्तनविलसिते वन्दिजनसन्दोहमुखारविन्दमकरन्दायितबिरुदपदसंदानिते शुभंयुगुणगुम्फिते मुहूर्ते विद्याधरेश्वरः करेण शयकान्तिपल्लवैरिवाशोकपल्लवतल्लजे परिष्कृतमुखभागं कनकंकरकं बभार ।

राज्ञा करांभोजविकासनाय संप्रापसूराभसुवर्णकुम्भतः ।
न्यषादि धारा कुरुवीरहस्ते दीर्घं भवन्ताविह जीवतामिति ॥ ४७ ॥
जग्राह पाणौ कुरुवंशदीपो जीमूतकेतुः खेचरनन्दिनीं ताम् ।

निमीलितासश्च बभूव सौख्यं स्पर्शोहितं द्रष्टुमिवान्तरङ्गे ॥ ४८ ॥
गन्धर्वदत्ता तत्पाणिस्पर्शेन समजायत ।
वधूरिन्दुकरस्पर्शाच्चन्द्रकान्तशिला यथा ॥ ४९ ॥
तदा वधूटीमवलोक्य सोऽयं ननन्द मन्देतरविस्मयेन ।
निजप्रभापूरतरङ्गमध्ये वक्षोजतुम्बीफलतः प्लवन्तीम् ॥ ५० ॥
सरोजयुग्मं बहुधा तपःस्थितं बभूव तस्याश्चरणद्वयं ध्रुवम् ।
न चेत्कथं तत्र च हंसकाविमौ समेत्य हृद्यं तनुतां कलस्वनम् ॥ ५१ ॥
विभान्ति तस्या नखराः पदांशुरक्ताननाः किंच विरिञ्चिकल्पाः ।
अन्याङ्गनावक्त्रविलोकनाय विनिर्मलाः सन्मणिदर्पणा वा ॥ ५२ ॥
आपाटलैर्नखैरस्या जिग्ये कुरवकच्छविः ।
अशोकपल्लवो नूनमङ्घ्रिपङ्कजरोचिषा ॥ ५३ ॥
जङ्घायुगं खेचरकन्यकाया अवैमि पञ्चायुधतूणयुग्मम् ।
यद्वा निशानाय च वज्रशाणोपलं शराणां कुसुमायुधस्य ॥ ५४ ॥
मनोजगेहस्य तदङ्गकस्य वक्षोजवेषेण विराजितस्य ।
ऊरुद्वयं स्तम्भनिभं विरेजे प्रतप्तचामीकरचारुरूपम् ॥ ५५ ॥

अस्याश्च नितम्बतलं दुकूलस्वच्छजलविलसितसैकतमिव कामाब्धिनिमज्जत्तरुणतरणाय यौवनाग्निनिष्टप्तहैमकलशयुगलमिव कंदर्पवास्तुचक्रयानमिव शृङ्गारमहीपतिक्रीडाशैलवलयमिव व्यराजत । एतस्याः किल रोमराजिः, चन्दनव्याप्तवक्षोरुहभूमिधरमारोहतो दर्पकस्य मरकतसोपानपङ्क्तिरिव, सौन्दर्यतरङ्गिणीवितनुसेतुरिव, नाभिवापिकामज्जनोद्युक्तस्य शम्बरारिपुद्विपस्य गण्डमण्डलादुच्छ्वसन्ती चञ्चरीकमालेव, दुर्वहस्तनभारवहनचिन्तया तानवमुपगतेन मध्येन समाश्रितालम्बनयष्टिरिव, नाभीवल्मीकमुखोद्गता कालभुजगीव, रुरुचे ।

रोमराजिलतागुच्छौ कुचावस्या मृगीदृशः ।
चकर्षतुः कुमारस्य नयनच्छलषट्पदम् ॥ ५६ ॥
पयोधरोन्नतिस्तस्याः पुषोषाङ्गनकेकिनम् ।
हारविद्युल्लतोपेता नीलाम्बरविजृम्भिता ॥ ५७ ॥
स्तनौ सुमेरो रसपूर्णकुम्भौ विमुद्रितौ चूचुकसज्जतुम्याम् ।
तस्या विधात्रा विनिपातभीत्या तौ कीलितावायसशङ्कुना किम् ॥५८॥
सुरापगाशोभितहेमपद्मिनीमृणालतुल्यौ सुदृशो महाभुजौ ।
भुजङ्गबन्धार्थमजेन निर्मितौ विशालपाशाविव तौ व्यराजताम् ॥५९॥
सुतनुननुलताया विस्तृते बाहुशाखे
मृदुलमसृणशोभे स्वाङ्गुलिश्रीप्रवाले ।
नखरुचिरलतान्ते मञ्जुगुञ्जद्विलोल-
न्मरकतवलयालिव्याप्ते ते व्यभाताम् ॥ ६० ॥
शिरोधरे खञ्जनलोचनायाः कम्बुप्रतीपे किल पञ्चबाणः ।
जगत्त्रयं निर्जितमेतयेति रेखात्रयं मङ्क्षु चकार वीरः ॥ ६१ ॥
जगद्धुरधरं तस्याः केचित्तु वक्त्रसुधाकरा-
न्तिकविलसितं संध्यारागं परे नवपल्लवम् ।
कतिचन मुखाभाम्भोराशिप्रवालममी वयं
रदनतिमणीरक्षालाक्षात्तमञ्जुलमुद्रिकाम् ॥ ६२ ॥
वाणी तस्या. पिककुलकलारावनिन्दाधुरीणा
पीयूषाणां वितरति हियं गोस्तनी न्यक्करोति ।
पुण्ड्रेक्षूणां रसघनसितां खण्डितामातनोति
साध्वीं माध्वीमधरयति च प्राज्यमाधुर्यपूरा ॥ ६३ ॥
नासा तदीया मुखचन्द्रबिम्बाद्विनिर्गलन्नव्यसुधोरुधारा ।
घनत्वमासेव रदालिमुक्तामणीतुलायष्टिरिव व्यलासीत् ॥६४॥

वदनसदने तस्यास्तिष्ठञ्जगद्विजयी स्मरः
सपदि कुटिलभ्रूबाणासे दृशौ विशिखौ व्यधात् ।
सकलतरुणश्रेणीमर्मच्छिदाहितरक्तता-
मधिमुखमिते चेतेऽभातां पयोजसलक्षणे ॥ ६५ ॥
जनदृक्पक्षिबन्धाय पाशौ किं वेधसा कृतौ ।
तत्कर्णावुत्पलव्याजाज्जनदृक्पक्षिरक्षिणौ ॥ ६६ ॥
तदाननवसुव्रजं निशि हरन्निशानायको
वियत्सरणिकानने विरचयन्गतिं वेगतः ।
दिवा क्वचन लीनतामुपगतोऽयमालक्ष्यते
न चेत्स वसुहारकः कथमयं कलङ्कोऽन्ततः ॥ ६७ ॥
मुखेन्दुरुचिवारिधेर्विततशैवलो वा घना
वनालिरिव चन्दिरं, मुखमितस्ततः संगता ।
मनोजदहनोद्भवन्निबिडधूमभारोऽथवा
मुखाब्जमधुपोत्करः किमथवा कृशाङ्ग्याः कचः ॥६८॥
किंनरी किमसुरी किमु नारी मन्मथस्य किमु हेमलता किम् ।
चञ्चला किमुत तारकाथवा सा ध्रुवं नयनभाग्यरेखिका ॥ ६९ ॥

क्रमेण विवर्धितरागां संध्याललनामिव सुधासूतिरेष जीवंधरस्वामी गन्धर्वदत्तामाश्लिष्य मारवीरनिक्षिप्तनाराचनवमल्लिकाकोरकायमाणरोमाञ्चप्रपञ्चकञ्चुकिताङ्गः, सुरतनाटकनान्दीपदानीव चाटुवचनानि प्रयुञ्जानः, उत्तरीयापनयनत्रपमाणायाः कोमलभुजवस्तिकापिहितकुचकुड्मलतया वीक्षणमार्गं रुन्धत्यास्तस्या वक्षोरुहपूर्वाचलशृङ्गे कथंनिल्लब्धोदयेन निजलोचनचन्द्रेणाभिवर्धितकामार्णवसलिलपूरैः श्रोणिक्षोणीमण्डलं प्लावयन्, संलापपल्लवितकुतुकामप्यभिधातुमनीशाम्, प्रियवदनचन्द्रोपकण्ठे नयनचकोरविहरणाय स्पृहयालुमपि लज्जया

समुखीभवितुमपारयन्तीम्, कुसुममृदुलदयिताङ्गस्पर्शनलोलुपामपि कम्पमानामेनाम्, भ्रुकुटीकपोलचुबुकरदनवसननयनचूचुकादिपदे परिचुम्बन्, स्वेदसलिलसञ्जातमार्दवैः कररुहैः कठिनतरकुचकलशतटे पदानि विदधानः, नखंपचोम्मलवक्षोरुहशिखरादपकर्ष्य पञ्चशोखपङ्कजं निम्ने नाभिसरसि निदधानः, मदनैकदनारम्भसंसूचककाञ्चीकलापकलकलपटुपटहारवपरिशोभितं नीवीबन्धनभेदनं कुर्वाणः, मदनमत्तदन्तावलालानस्तम्भायमानमूरुस्तम्भं मारमदेभमोचनायेव परिमृशन्, अधिकतरमरमत ।

जायापती तौ जगतां स्तुत्यौ निस्तुलसंपदा ।
आसामासतुरानन्दनिधे परे गिरामपि ॥ ७० ॥

इति महाकविहरिचन्द्रविरचिते चम्पूजीवंधरे गन्धर्वदत्तलम्भो नाम तृतीयो लम्बः ।

चतुर्थो लम्बः ।



मावन्दद्रुममञ्जरीमधुझरीसंपक्तमाध्वीलिहां
झङ्कारैः पिकमञ्जुगानकलितैर्मारोत्सवाशंसिनः ।
प्राप्ताः केचन वासराः कुरवकप्रोन्मीलितैः कोरकै-
र्दन्ताभैर्विहसन्मुखा विरहिणां मर्मच्छिदाकर्मठाः ॥ १ ॥

तदानीं जगज्जयोद्युक्तपञ्चबाणप्रयाणमुचकमाक्षिप्तद्रव्यनिलयनिकाशपल्लविताशोकपेशलं सुवर्णशृङ्खलसंनद्धवनदेवताश्रितपेटिकायमानरसालपल्लवममालीनकोकिलकुलं तरुणजननहृदयविदारणदारुणकुसुमबाणनखरायमाणकिंशुककुसुमसंकुलं मदननरपालकनकदण्डायितेरण्डकुसुमभासुरं विलीनशिलीमुखनगभीरुशरधिमरुपपाटलपटल

वियोगिजनस्वान्तनितान्तकृन्तनकुन्तायितकेतकदन्तुरितं वनमजायत।

मार्गे मार्गे माधवीमानिनीभिः सूनार्चाभिर्मानितो वातपोत्तः ।
मृङ्गस्त्रीणां गीतसक्तं कुरङ्गमारुह्यासावाववौ मन्दमन्दम् ॥ २ ॥
पुरान्निरीयुः प्रमदाजनेन पौराः समस्ता नरपालमुख्याः ।
क्रीडां विधातुं तद्विविधे वनेऽपि मधौ दुरन्ते विरहिव्रजस्य ॥ ३ ॥
तुङ्गं शताङ्गमारूढः स्वामी सहचरैः सह ।
पौरस्त्रीनयनानन्दमातन्वन्निरगात्पुरात् ॥ ४ ॥

ततो जनकोलाहलोद्भ्रान्तशकुन्तवृन्दतया माधवागमनकौतुकेनोत्क्षिप्तमिवैजयन्तीमिव सञ्चरच्चञ्चरीकघोरणीहरिन्मणिमयतोरणमालाविराजितां पल्लवकवलनतत्परपोतबान्धवस्यन्दनगन्धर्ववदनविलनिपतितफेनशकलसंभाव्यकलिकाविलसितोन्नतमहीरुहरानितामभिसारिकामिवोच्चैस्तनशिखरशोभितपत्रविचित्रामनेकविटपसंसृष्टपयोधरतटां चारामवीथीमासाद्य पौरा पुष्पापचयं कर्तुमारभन्त। तत्र निजकान्ता कोपकलुषितस्वान्तामाध्याय कश्चिदाह।

प्रसारय दृशं पुरः क्षणमिदं वनं विन्दतां
स्थलोत्पलकुलानि वै कलय तन्वि मन्दस्मितम् ।
पतन्तु कुसुमोच्चया दिशि दिशि प्रहृष्टालय.
स्फुटीकुरु गिरं पिक सपदि मौनमाद्यौकताम् ॥ ५ ॥

परिफुल्लनवपल्लवतल्लजाधरपुटां विकचकुसुममन्दहासां चञ्चरीकचारुचुकमेचकितगुलुच्छस्तनयुगलां वासन्तीलतामन्यामिव लतान्वीं पश्यन्तमात्मानं प्रति कुपिता प्रेयसीं परिसान्त्वयितुकाम कश्चिदेवमब्रवीत् ।

सञ्चारिणी खलु लता त्वमनङ्गलक्ष्मी-
रम्लानपल्लवकरा प्रमदालिजुष्टा ।

यस्या गुरुच्छयुगलं कठिनं विशालशाखे
शिरीषसुकुमारतमे मृगाक्षि ॥ ६ ॥
उपरिजतरुनार्थं वामहस्तेन काचि-
द्विधृतसुरभिशाखा सव्यहस्तास्तकाञ्ची ।
अमलकनकगौरी निर्गलन्नीविबन्धा
नयनसुखमनन्तं कस्य वा द्राङ्न तेने ॥ ७ ॥
काचिद्वराङ्गी कमितुः पुरस्तादुदस्तबाहोः कुसुमोद्यतस्य ।
मूलं नखाङ्काञ्चितमंशुकेन तिरोदधे मङ्कुकरान्तरेण ॥ ८ ॥
अन्तर्वणं करसरोरुहकान्तिभिन्नं
पत्रव्रजं सपदि पल्लवशङ्क्यान्या ।
संस्पर्शमार्दवकलाविरहाद्विमृज्य
गुरुच्छभ्रमेण नखकान्तिमहो चकर्ष ॥ ९ ॥
वपुषि कनकगौरे चम्पकानां स्रगेषा
वितरति परभागं नेति कश्चित्प्रियायाः ।
उरसि वकुलमालामावबन्धाम्बुजाक्ष्याः
स्तनकलशसमीपे चालयन्पाणिपद्मम् ॥ १० ॥
वक्षःस्थलेष्वत्र चकोरचक्षुषां प्रियैः प्रकल्पाः सुममालिका बभुः ।
अन्तःप्रवेशोद्यतशम्बरद्विषः सूनाततास्तोरणमालिका इव ॥ ११ ॥

एवं वनविहारपरेषु पौरेषु, तत्र सप्ततन्तुमारभमाणैर्द्विजैर्हविः-स्पर्शनजनितकोपैर्हन्यमानमन्तरुत्कूलितदुःखाम्बुधिघोषमिव प्राण-महीपालस्य प्रयाणसंसूचकभेरीभाङ्कारमिवाक्रन्दनारावमातन्वानमन्त-रुज्ज्वलितदुःखाग्निज्वालामिव शोणितधारामुद्गिरन्तं सारमेयमवलोक्य, अपारकरुणाकरो जीवधरो बहुप्रयत्नैरपि अत्युल्बणोवयितुमशक्नुवानः परलोकसमर्थापनपरतन्त्रं पशुमन्तमुपादिक्षत् ।

श्रवसा परमं मन्त्रं मनसा हन्त मा स्पृशन् ।
कुक्कुरो विजहौ प्राणान्दुःखलेशविवर्जितः ॥ १२ ॥
चन्द्रोदयाद्रयगिरौ विमलोपपाद-
शय्यातले रुचिरवैक्रियकाख्यदेशे ।
लब्धौ सदंशुकधरो नवयौवनश्रीः
प्रादुर्बभूव स सुदर्शननामयक्षः ॥ १३ ॥
राकाचन्दिरदत्तदात्यममलं यस्यास्यपङ्केरुहं
नेत्रे वीतनिमेषकेऽकलयतां निष्कम्पमीनश्रियम् ।
पाणी कल्पकपल्लवप्रतिघृणी माणिक्यभीषोज्ज्वला
मूर्तिः पुष्पितकल्पपादपलतास्फूर्तिस्तदाजृम्भत ॥ १४ ॥

ततः कल्पतरुषु प्रमोदबाष्पबिन्दूनिव प्रसूननिकरानवकिरत्सु, दुन्दुभिस्वनितेषु दिगन्तरालविजृम्भितेषु, मन्दारवनकुड्मलगन्धवहस्तनंधये मन्दसञ्चारमन्यरे, रविकोटिसदृक्षेषु यक्षेषु समन्तात्प्रणामदक्षेषु, मञ्जुमञ्जीररवमुखरितदिगन्तरासु सुराङ्गनासु मधुरगानकलाविलसितनर्तनकुशलासु, सुप्तोत्थित इवायं दिशि दिशि दृशं व्यापारयन्, विस्मयसंमदपूरयोः संगमे निमग्नः, तत्क्षणजनितावधिज्ञानतरणिमवलम्ब्य प्रबुद्धजीवकोपदिष्टमन्त्रप्रभावविलसितदेवभूयः, सत्र जयेत्यादिशब्दमुखरमुखैर्निलिम्पैः सम्प्रश्रयमेत्य किरीटमणिघृणिराजिनीराजितचरणनीरैर्जैर्विज्ञापितं मङ्गलमज्जनजिनेन्द्रपूजादिकं यथानियोगमातन्वन्, जीवंधरस्वामिवरिवस्यापरायणः परिवारैः सह तदुपकण्ठमाटिटीके ।

तवार्य मन्त्रप्रभवा ममेदृशी विभूतिरित्यादिनुतिं समाचरन् ।
विधाय पूजामिह जीवकस्य वै प्रादान्मुदा दिव्यविभूषणान्यसौ ॥ १५

अथ ललाटंतपतपनबिम्बे गगनकाननमध्यपुञ्जीभूतदवहुताशन-

सकाशे, सशावकमृगपूगेन सह मूलतलमाश्रिते नमेरुतरुच्छाये, सरो-
राजहंसेषु नलिनमुत्सृज्य पत्रच्छायामाश्रितेषु, दीर्घिकाजलेषु शफरो-
द्वर्तनैरार्कसंतापादिव क्वथत्सु, शिखण्डिषु नृत्तलीलाविरहेऽपि बर्ह-
भारं छत्रीकृत्य केकिनीः सेवमानेषु, मधुकरेषु गजगण्डतलात्कर्ण-
पालीमाश्रितेषु, कुसुमावचयश्रान्ताभिः कान्ताभिः सह व्यायुक्षिकां
कर्तुकामा भर्तारः शनैः शनैर्नवापगामाजग्मुः ।

नवापगेयं नलिनेक्षणानां द्विजारवैर्द्राक्कुशलानुयोगम् ।
विधाय डिण्डीरमनोज्ञहासा चलोर्मिहस्तैर्दिशति स्म पाद्यम् ॥१६

तावद्यौवनदिनमणिप्रकाशपरिवर्धितामोदवक्षोरुहचक्रवाकयुगलासु
कान्तिकल्लोलनिर्लोलासु मञ्जुगुञ्जत्कलहंसकाखपरासिव तरङ्गिणीषु
पुरतरुणीषु दयितैः समं सरितमवगाह्य जलक्रीडामातन्वतीषु—

कश्चिदम्भसि विकूणितेक्षणं हेमयन्त्यविगलज्जलैर्मुहुः ।
कामिनीमुखमसिञ्चदञ्जसा चन्द्रबिम्बमिव द्रष्टुमागतम् ॥ १७ ॥

कान्तन चपलनडापहृतदुकूलपट्टे रुचिविनितस्फटिकपट्टे घननवन-
फलके नखक्षतिव्याजेन मकरकेतनस्य जगज्जयप्रशस्तिवर्णावलिमिव
बिभ्राणा, करनिपीडनोद्गीर्णरक्तिमधारामिव विद्रुमयन्त्यनिर्गलत्पयोधारां
शयकान्तिसंक्रान्तरक्तवर्णतया कुङ्कुमरसानुकारिणीं प्रियतमनखे
महर्षं ववर्ष ।

मुदतीकुचकुड्मलाग्रमारात्तरुणः कश्चिदसिञ्चदम्बुभिः ।
हृदयस्थलनानरागकल्पद्रुमवृद्धये किमु कामुकः परम् ॥ १८ ॥
अन्या काचिदुल्लभं वञ्चयित्वा सख्या साकं वारिमग्ना गृहीतम् ।
तस्या गात्रामोदलोभाद्भमद्भिर्भृङ्गैर्ज्ञाता सागुनालिङ्गिता च ॥ १९ ॥
सरोजिनीमध्यविराजमाना काचिन्मृगाक्षी कमनीयरूपा ।
वक्षोजकोशा मृदुबाहुनाला नालक्षि वक्त्रायतफुल्लपद्मा ॥ २० ॥

च्युतः प्रसूनैर्वनकेशबन्धान्मृगीदृशां तारकिते जलेऽस्मिन् ।
निरीक्ष्यमाणं तरुणैश्चकोरैः कस्याश्चिदास्यं शशभृद्बभूव ॥ २१ ॥

एवं जलक्रीडापरायणेषु पुरतरुणेषु, तटिनीतटालङ्कारभूतयोः कुबेरमित्रकुबेरदत्तनामजलधिसंभूतयोर्गुणमालासुरमञ्जरीनामधेययोः कन्यारत्नयोः, चन्द्रोदयसूर्योदयाभिधपरस्परपटवासचूर्णोत्कर्षस्पर्धया परानिता नवापगाजलस्नाता मा भूदिति कृतसंगरयोः, कुट्टिन्यौ, चूर्णमादाय, तत्र तत्र विचार्य, क्रमेण जीवंधरनिकटमागत्य, चन्द्रोदयसूर्योदययोर्मध्ये कः श्लाघ्य इति पृच्छाञ्चक्रतुः ।

स्वामी च चन्द्रोदयचूर्णमूचे श्लाघ्यं तदन्यद्वनकालयोग्यम् ।
आद्ये किरन्व्योम्नि समावृतालिं निर्दिश्य च प्रत्ययमाततान ॥ २२ ॥

ततः कुमारं कुरुवंशवीरं नत्वा च नुत्वा विनिवृत्य चेट्यौ ।
स्वस्वामिनीसंनिधिमेत्य वेगाद्विज्ञापयामासतुरेवमेव ॥ २३ ॥

उभयोश्चूर्णयोरातगन्धभावे समेऽपि च ।
जीवकेन विनिर्दिष्टे शुशोच सुरमञ्जरी ॥ २४ ॥

उल्लासयामास मुखाम्बुजातं चन्द्रोदयोऽयं गुणमालिकायाः ।
सूर्योदयो द्राक्सुरमञ्जरीश्रीवक्त्राञ्जशोषं व्यतनोद्विचित्रम् ॥ २५ ॥

ततः पराभवजनितदुरासेदर्प्याकलुषितचेतना सुरमञ्जरी सख्या गुणमालया बहुधा प्रार्थिताप्यकृतस्नानैव निवृत्य जीवकादपरं नरं न पश्यामीति निश्वस्य कृतसन्धाबन्धा रोषान्धा कन्यागारं प्रविवेश ।

वयस्याविप्रयोगेन गुणमाला शुशोच सा ।
चन्द्रिकाया वियोगेन प्रातरुत्पलिनी यथा ॥ २६ ॥

तावत्सविधजवप्रभुग्नपवनाटोपोत्कटोत्पाटितैः
शाखानां वलयैर्नरभ्रगगनेऽप्यभ्रभ्रमं भावयन् ।

हाहाकारपराञ्जनान्निरनयद्राज्ञो मदान्धो गजो,
वेगाज्जङ्गमशैलराजगरिमा पौरव्रजं प्राविशत् ॥ २७ ॥

करटोद्यन्मदाम्भोभिः सृजन्कल्लोलिनीयुगम् ।
अधावन्मत्तकुम्भीन्द्रो गुणमालारथं प्रति ॥ २८ ॥

तदा परिजनेषु परिणतकरेणुराजभयेन दूरदूरमपसर्पत्सु, कस्मिंश्चिद्बालिजने समसुखदुःखतया मां हत्वा सा हन्यतामिति गुणमालायाः पुरतः स्थिते, हतेति शब्दमुखरेषु समीपवर्तिषु जनेषु, करुणापरिणाहितहृदयो जीवंधरः समुपेत्य, केसरीव सिंहनादप्रतिध्वनितदिक्तटो हेलयैव सिन्धुरं भीकरमपि सूकरं विधाय तदीयस्कन्धमलङ्कुर्वन्, कुम्भस्थलसाम्यविलुलोकिषयेव कुम्भस्थले करं, तस्याः स्तनकलशे दृष्टिं, मनसि तत्प्रस्तावं च वितस्तार ।

मदकलकलभस्य यानतुल्या गतिरिह यूथपयूथिकाभकेश्याः ।
मृदुकरिनिभमूरुयुग्ममस्याः कुचयुगमातनुते च कुम्भसाम्यम् ॥२९॥

इति मनसि चिन्तयन्नेष पञ्चशरप्रहारपरवशो गजराजमाद्यानमानीय, सहचरैः सह रथमलंकुर्वन्, गजविज्ञानप्रशंसापरैः पौरैः स्तूयमानो निजमन्दिरान्तरं प्रविवेश ।

साक्षात्पञ्चशरं कुमारमतुलं निध्याय रूढान्तरा
कामार्ता गुणमालिका च सदनं गत्वा चिरं विह्वला ।
ध्यायन्ती मनसा तमेव सततं संतापशुष्यन्मुखी
दृष्टाप्यत्र सखीजनैर्बहुतरं नैवोत्तरं सा ददे ॥ ३० ॥

बलवदस्वस्था गुणमाला कंदर्पनिन्दामेवमकरोत्—

कुसुमायुध पञ्च ते फलम्बा नियता लक्ष्यजनस्त्वनेकिकः ।
इति चेदहमेकिका कथं वा गमिनानन्तशरैश्च पञ्चताम् ॥३१॥

इति बहुधा मन्यमाना, तीव्रतरमदनसंतापमसहमाना क्षणं घनसा-

रदीर्घिकापरिसरे क्षणमुपवनतटमञ्जुलनिकुञ्जे क्षणमास्तृतकुसुमतल्पे क्षणं मृदुलमवालशय्यातले क्षणं सुकुमारहंसतूलशयने क्षणं नवकदलीकानने कालं क्षिपन्ती, क्रमेण पत्रिकां विलिख्य, कंचन क्रीडाशुकं जीवंधराय प्राहैषीत् ।

जीवंधरोऽपि बहुधा विरहाग्निलीढ-
मङ्गं दधन्निजगृहोपवने निषण्णः ।
चित्रे विलिख्य कमनीयतमं तदङ्गं
निःश्वस्य विश्वमहितः सुचिरं लुलोके ॥ ३२ ॥

तावदागत्य चाटुवचनचतुरेण कीरेण प्रसंगात्समर्पितं पत्रं फलितमनोरथसुरतरुपत्रमिवादाय तत्क्षणमेव द्रष्टुकामोऽप्यानन्दबाष्पनिरुद्धनयनमार्गतया विप्रितो मोदपरीवाहं कथं कथमपि नियम्य जीवंधरो वाचयति स्म ।

मदीयहृदयाभिधं मदनकाण्डकाण्डोद्यतं
नवं कुसुमकन्दुकं वनतटे त्वया चोरितम् ।
विमोहकलितोत्पलं रुचिररागसत्पल्लवं
तदद्य हि वितीर्यतां विजितकामरूपोज्ज्वल ॥ ३३ ॥
आनन्दबाष्पसंरुद्धकंधरो गद्गदं पठन् ।
तदेवं विलिलेखाशु पत्रं तां प्रति मोदतः ॥ ३४ ॥
मम नयनमराली प्राप्य ते वक्त्रपद्मं
तदनु च कुचकोशप्रान्तमागत्य हृष्टा ।
विहरति रसपूर्णे नाभिकासारमध्ये
यदि भवति वितीर्णा सा त्वया तं ददामि ॥ ३५ ॥

तावदन्तरुज्ज्वलितमनसिजाग्निधूमनिकरेणेव निःश्वासेन नीलमणीकृतनासामौक्तिका, क्षामक्षामाङ्गतया वलयीकृतकनकोर्मिका,

मुखसुधाकरकौमुदीलिप्ततयेव परिपाण्डरतनुवल्ली, भावनाप्रकर्षवशेन दिशि दिशि परिस्फुरन्तं जीवंधरमालोक्य प्रत्युत्थानाय कृतप्रयत्नापि मृणालकोमलैरङ्गैरपारयन्ती, प्रेषितशुकागमनविलम्बासहतया त्रस्तैकहायनकुरङ्गीवापाङ्गतरङ्गान्दिशि दिशि किरन्ती गुणमाला, समागतं जात्या कृत्येन च पतिणं शुकमुद्दीश्य, एह्येहि न सहे विलम्बमिति समालपन्ती, संनिहितं तं तत्समयजातप्रमोदोच्छूनाङ्गतया स्फुटितकञ्चुकेन भुजयुगलेनादाय च पत्रं निरन्तरनिपतितैरपाङ्गैः सर्वत्र मषिलिप्त इव विचित्रे पत्रे रमणीयाक्षरमणीनपश्यन्ती, प्रीतिलतापुष्पायमाणमन्दहासधवलीकृते तस्मिन्विलिखितं पद्यं वाचयन्ती वाचामगोचरमानन्दमभजत ।

तदिदं वृत्तमवेत्य कन्यकायाः पितराविङ्गितचेष्टितादिभिश्च ।
मुमुदाते स्म वरो हि योग्यभाग्यप्रथितो दुर्लभ एव भोभवीति ॥ ३६ ॥

तदनु गन्धोत्कटान्तिकं नीताभ्यां काभ्यांचिदामुष्यायणाभ्यामिमं वृत्तान्तं श्रवणपुटेनाघ्रायाश्चर्यवृत्तिरयं मनस्यामोदमातन्वत्रसनयानुमतिवचनमकरन्दधारामुद्गिरति स्म ।

शुभेयुगुणसंपन्ने मुहूर्ते गुणमालिकाम् ।
पुत्रीं कुबेरमित्रस्य परिणिन्येऽथ जीवकः ॥३७॥

तदा परिणयोचितभूषावेषोज्ज्वलः साक्षात्कन्दर्प इव संतर्पितसकलमनुजनयनः कुरुवंशवीरो जीवंधरः संमदविस्तारितलोचनाभ्यां नयमालानन्दिनीमपि विनयमालानन्दिनीं गुणमालां विलोकयामास ।

कुसुमातिशायि सुकुमारमङ्गकं दधती नभःस्थलनिकाशमध्यमम् ।
कुसुमेषुकार्मुकलतेव भाति या त्रिवली तदङ्गुलिमुसन्धिरेखिका ॥३८॥

यस्याः सुधासमरसाधरपल्लवाग्रे
मन्दस्मितैः कुमुमितैः कुरुवंशकेतोः ।

नेत्राम्बुजे तु फलिते हृदयं रसस्य
धारामसूत सपदीति विचित्रमेतत् ॥ ३९॥
तामेनामुपयम्यायं कुरुसन्तानकुञ्जरः ।
निक्रीडाधित्यकाभागे चिरं मोदमहीभृत. ॥ ४० ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवधरे
गुणमालालम्भो नाम चतुर्थो लम्बः ।

पञ्चमो लम्बः ।

शत्रुजीवकबलीकरणेषु दक्षजीवकबलं मनसैव ।
आलिहन्नथ करी तृणरूपं प्रागिव स्वकबलं विजहौ सः ॥ १ ॥
कुण्डलेन हतः सोऽयं कुण्डलीकृतदुर्मदः ।
रोषं सोर्मिकमातेने कटकाश्रितकुञ्जरः ॥ २ ॥

तदेतन्निशम्य विशांपतिर्विशालक्रोधानलं वनौकःसङ्घविनयेन सञ्जातं वल्लकीविनयेन पल्लवितमनङ्गमालासङ्गेन संदीपितं शुण्डालपतिशिरोमण्डलकुण्डलताडनेन , जाज्वल्यमानं कुमारनिकरेण शिशमयिषु काष्ठाङ्गारः, संगरे भङ्गुरं कुमारं हस्तमाह गृहीष्वमिति मथनमसु खान्नियोज्य, संयोज्य च गजरथतुरगपादातशबलेन बलेन सह प्राहैषीत् ।

बलं पुरोधाय रथाधिरूढः प्रचण्डवृत्तिर्मथनश्चचाल ।
ज्ञात्वा कुमारोऽपि सहायजुष्टो रथी युयुत्सू रिपुमानशे तम्॥३॥
गजा जगर्जुः प्रटहा· प्रणेदुर्जिहेषुरश्वाश्च तदा रणाग्रे ।
कुमारबाहासुखसुप्तिकायाः प्रबोधनायेव जयेन्दिराया· ॥ ४ ॥

कराञ्चितशरासनादविरलं गलद्भिः शरै-
र्लुलाव कुरुकुञ्जरो रिपुशिरांसि चापरमा ।
बिभेद गजयूथपान्सुभटधैर्यवृत्त्या समं
ववर्ष शरसन्ततिं सममिभोद्गतैर्मौक्तिकैः ॥ ५ ॥

ततश्च हतशेषेषु सैनिकेषु तदीयप्रक्ष्वेडनाध्यापक्षदधीतवेगेषु तद्भ्यासायेव दिशि दिशि पलायमानेषु विच्छिन्नशरासनरथादिपरिकरतया कम्पमानमवलोक्य कुरुवीरो गभीरतरमेवमवादीत् ।

भवादृशे भुजोऽयं मे न बाणं मोक्तुमीहते ।
गच्छ गच्छ भयेनालं ब्रूहि राज्ञे कथामिमाम् ॥ ६ ॥
जेतुमस्मान्मृधारम्भे नेतुं कीर्तिं दिगन्तरम् ।
भवान्तरे च चतुरं मन्यते यः स दुर्मतिः ॥ ७ ॥

तावदिदं वृत्तमाकर्ण्य कोपसंज्वलितनयनाङ्गारेण काष्ठाङ्गारेण पुनरपि सर्वाभिसारेण प्रेषितां चमूमवलोक्य करुणार्द्रमानसः कुरुकुलोत्तंसः क्षुद्रप्राणिवधेन किमिति युयुत्सामपास्य सकलापायापनयनदक्षस्य सुदर्शनयक्षस्य सस्मार ।

यक्षाधिपः पृतनया सह तं समेत्य
शान्तिं निनाय नरपालबलानि सद्यः ।
जीवंधरं जयगिरिप्रथितं करीन्द्रं
कौतूहलं च हृदयं कृतकृत्यतां स्वम् ॥ ८ ॥

दन्तावलोऽयं कटदानधारासौरभ्यलोभागतभृङ्गसङ्घैः ।
जीवंधरश्रीपदपद्मसंगाद्वराज पापैरिव मुच्यमानः ॥ ९ ॥

तदनु सुरवारणमारूढः, पार्श्वद्वयविधूयमानाभ्यां मुखकमलभ्रान्तिसमागतंहंसमिथुनशङ्कावहाभ्यामनुरक्तयक्षाधिपराज्यलक्ष्मीमोहनकटाक्षच्छटाभ्यामिवोर्ध्वमुत्तदन्तावलदन्तयुगलनिर्गलत्कान्तिकल्लोलाभ्या-

मिव कमलशशाङ्कयोर्विजयेन मुखमभितः सेवमानाभ्यामिव कीर्तिशावकाभ्यां भुजदण्डवास्तव्यजयलक्ष्मीमन्दहासरुचिपूराभ्यामिव क्षीराब्धिडिण्डीरचयाभ्यामिव चामराभ्यां विभ्रान्तिः, यशोविनिततया सेवार्थमागतेन परितोलम्बमानमुक्ताफलच्छलतारामण्डलमण्डितचन्द्रबिम्बेनेव कीर्तिक्षीरवाराशिफेनपुञ्जेनेव मुखचन्द्रभ्रमसमागतपरिवेषेणेव सुरकराम्बुरुहविधृतकनकदण्डरुचिरधवलातपत्रेण विराजितः, सकलदिविनकुङ्कलीकृताञ्जलिकञ्जपुञ्जमध्यराजहंसायमानः, शिखावलकुलनृत्यकलाविलाससंपादकैर्गभीरतरतूर्यनिनादैर्वाचालितदशदिक्तटः, निरन्तरदह्यमानकालागुरुधूमरेखया धवलातपत्रे शशिशङ्कासमागतविधुंतुदसंभाव्यमानया सुरभितसविधप्रदेशः, निरन्तरनिःसरत्पदनखकान्तिभिर्निजाक्रमणभिन्नकुम्भस्थलविगलन्मौक्तिकनिचयशङ्कामङ्कूरयन्, एकदोदितकोटिसूर्यैरिव विमानारूढैर्यक्षैः परितःस्तूयमानवैभवः, नटन्तीः सौदामिनीलता इव त्रिदशवनिता निःसरदपाङ्गसुधातरङ्गिणीमध्ये भुजोच्छ्वासितलास्यलीलावशेन प्लवन्तीरिव समाकलयन्, शनैः शनैर्वृन्दारकवन्दिसंदोहपापठ्यमानविरुदावलिमुखरीकृतकन्दरतया प्रतिध्वानवशेन स्वयमपि स्तुतिमाचरन्तमिव चन्द्रोदयनामानं भूमिधरमेत्य, तत्र विचित्ररत्नमयमण्डपमध्ये सरभससंनाहैरमृतान्धःसमूहैः समानीतं मूर्तमिव सकलानुरागं पद्मरागमयं सिंहविष्टरमलंचकार ।

प्रणेदुः पटहास्तत्र प्रतिध्वानितकन्दराः ।
गायन्त्यो मञ्जु किंनर्यो ननृतुश्च समन्ततः ॥ १० ॥

ततः कलशवारिधिं प्रति चचाल यक्षाधिपः
सुरैः करसरोरुहाञ्चितसुवर्णकुम्भैः सह ।

सता पथि समावहन्वितततसान्ध्यमेघभ्रम
किरीटमणिकान्तिभि सुरपचापसभावनाम् ॥ ११ ॥
एते देवा पूर्वमागत्य लक्ष्मीं धेनु चिन्तारत्नमन्याश्च हृत्वा ।
आशापाशादागतास्ते पुनश्चेत्येव दुग्धाम्भोधिरार्तं रराम ॥ १२ ॥

ततश्च, कुरुवीर धैर्यगुणेन स्पर्धमानश्चन्द्रोदयगिरिस्तदीयपादस्पर्शेन कृतार्थतामासासाद, अहमपि गाम्भीर्ययशोभ्या स्पर्धमानस्तदीयसर्वाङ्गस्पर्शेन कृतकृत्यतामनुभवामि, इति चलाचलवीचिबाहुभिर्नृत्यत इव फेनकूटेन, घोषकपटेन चाट्टहासमातन्वानस्येव, दुग्धसागरस्य पयोभि पूरितान्कनककलशान्बिभ्राणास्ते यक्षाध्यक्षमुखा, सत्वरमागत्याभिषेकमङ्गल कर्तुमारभन्त ।

यक्षेशमुख्यकरलम्बितहेमकुम्भ
पङ्क्ति पपात कुरुकुञ्जरमूर्ध्नि तोयम् ।
सन्ध्याभ्रसङ्गविगलद्धिमलाम्बुवर्षं
प्रालेयशैलशिखराग्र इवातिसान्द्रम् ॥ १३ ॥
समापिते साध्वभिषेकमङ्गले निलिम्पकान्तानयनान्तवारिभि ।
परीतमूर्ति पुनराबभावसौ पयोऽधिपूरैरिव सिच्यमान ॥ १४ ॥
ततो दिव्याम्बरधरो मणिभूषणमण्डित ।
रेजे जीवधरस्वामी सन्ध्यापशरदभ्रवत् ॥ १५ ॥
यक्षाधिपार्पित कल्पवृक्षाञ्चितफलादिकम् ।
जग्राह जीवकस्वामी निग्राहचतुरो द्विषाम् ॥ १६ ॥

तत क्रमेण यक्षाध्यक्षेणोपदिष्ट कामरूपविधानगानविपद्दान शक्तियुक्त चिरन्त मन्त्ररत्न बहुमन्यमान, 'एकहायनमात्रेण राज्य लक्ष्मीकटाक्षान्प्रेक्ष्यसि' इति तद्वचनेन सतुष्ट, स्तत प्रश्रयवश वैदर्भेण समाध्यमान कुरुवीर, कदाचिद्देशान्तरादिदृक्षामिङ्गितै

र्यक्षाध्यक्षं ज्ञापयामास ।

मनीषितं तस्य कुरूत्तमस्य ज्ञात्वा मनीषी स हि यक्षराजः ।
मार्गस्य भङ्गीं स्फुटतोऽभिधाय संप्रापयामास तदद्रिसीमाम् ॥ १७ ॥

तदनु कुरुवंशकेसरी केसरीव तत्र तत्र निर्भय एव विहरन्, क्वचिदतिविततानोकहकुलविलसितमसूर्यंपश्यं तरक्षुमृगाधिष्ठानम्, क्वचन तरुषण्डे कादम्बिनीभ्रान्त्या दूरोन्नमितकेकागर्भकण्ठं प्रबलपुरोवातसंताडितशिखण्डं नीलकण्ठम्, कुत्रचिन्महागुल्मान्तरकुड्मिशबरकदम्बकम्, कुत्र च नीपपादपस्कन्धनिषण्णशुण्डादण्डं करिणीसहायं शुण्डालंण्डलम्, कुत्रचित्स्तनंधयशिशुसंरुद्धां हरिणीं भुग्नग्रीवमवलोकयन्तं धावमानहरिणम्, कुत्रचन दशनान्तरस्थिततृणकवलच्छेदशब्दं नियम्य ज्याजिह्माङ्गैः कुरङ्गैः श्रूयमाणगानकलाप्रवीणं किरातस्तेणम्, क्वचन गर्जनतर्जितस्तम्बेरमनिचयं मृगेन्द्रचयम्, कुत्राचिद्भूधराकारमजगरनिकरं पश्यन्, क्रमेणातिलङ्घितविपिनपथः, क्वचिदरण्ये समुद्गतधूमपरीताभ्रंकषभूमिरुहतया संजलजलधरश्यामलं तरुनिकरमिव कुर्वन्तं क्षोपचटचटात्कारेणाट्टहासमिवातन्वानमतिवेगसमाक्रान्तकाननं दवदहनं ददर्श ।

असूर्यंपश्येषु प्रचुरतरुषण्डान्तरतल-
प्रदेशेष्वत्यन्तं यदुपितमभूदन्धतमसा ।
तदग्निव्यासेनोद्यतमिव तदा धूमपटलं
तमालस्तोमाभं गगनतलमालिङ्ग्य ववृधे ॥ १८ ॥
दवानलोद्गता धूम्या महती गगनश्रिया ।
धृतनीलपटीवासो बभौ व्याप्तदिगन्तरा ॥ १९ ॥

तदानीं दवहुताशनपरीतं विपिनम्, अनलवृद्धिलिङ्गैः विस्फुलिङ्गैः तरुनिकरमिव, देदीप्यमानकीलाकलापैः संध्यारागरञ्जितमिव, धूम-

स्तोमेन ध्वान्तदन्तुरितमिव, ज्वलज्ज्वलनेन संध्यारक्तचन्द्रबिम्बचुम्बितं नभस्तलमिव, व्यराजत ।

तदा हरिणमण्डलं हुतवहाक्रमत्रासतो
विलोलनयनाञ्चलैर्विनिहतबालनीलोत्पलैः ।
दवानलविनाशनप्रथितवेगकूलंकषां
कलिन्दगिरिनन्दिनीं कलयति स्म कल्लोलिनीम् ॥ २० ॥

तदनु धूमस्तोमचुङ्कारेण ज्वालाकलापफटफटात्कारेण शबरजनहाहाकारेण तन्मध्यनिरुद्धसत्वयूथार्तविरावेण च बधिरीकृतदिशावशावल्लभे हुताशसंत्रासधावमानवनदेवताशिथिलकबरीनिकरपरिशीलितमाप्यया धूम्ययान्धीकृतसकललोके वैश्वानरे विजृम्भिते, भाविमेघपटलशम्पागर्जितानि धूमस्तोमज्वालादहनचटचटात्कारैः परिहसदिव काननमराजत ।

अनेकफुलं तत्र दह्यमानं दवाग्निना ।
त्रातुमैच्छदयापूरजलधि कुरुकुञ्जरः ॥ २१ ॥

तस्याकूतमवेत्य यक्षपतिना वेगेन संकल्पिता
जीमूता वियदङ्गणे परिणता धूमप्रकारा इव ।
उद्यद्गर्जितपाटिताखिलमहादिग्भित्तयस्तत्क्षणं
वर्षं हर्षितजीवका विदधिरे कल्पान्तमेघायिताः ॥ २२ ॥

यक्षेन्द्रकल्पितघनाघनमण्डलं त
च्चक्रेऽभिषेचनमरण्यगजव्रजस्य ।
वारानिधेर्विमलशीतपयःप्रवाहै-
र्यक्षाधिराज इव कौरवकुञ्जरस्य ॥ २३ ॥

तथा हि । सौदामिनीसुभगनर्तकरीवितान-
मग्रं शिखावलकुलं पटुवन्दिवर्गः ।

मेघारव सकलवाद्यरवस्तरूणा
गुच्छा समीरचलिता किल चामराणि ॥ २४॥

तदनु परिरक्षितानि शुण्डालमण्डलानि तरुषण्डानि च विटपस सक्तविन्दृत्करनिपतनव्याजेनानन्दबाष्पमुकुलान्युत्सृजन्ति विलोकमा न, सतोषेण तस्माद्वनान्निर्गत्य, तत्र तत्र मानुषरूपिण्या धर्मरक्षि ण्या यक्षिण्या परिचर्यमाण, तीर्थस्थानानि पूजयन्, क्रमेण कुरुमल्ल पल्लवदेशमानशे ।

सञ्चरस्तत्र सतोषात्पञ्चबाण कुरूत्तम ।
धावमानानभिमुख ददर्श पथि काश्चन ॥ २५ ॥

तेऽपि त कुरुवर प्रभोज्ज्वल वीक्ष्य विस्मयनिमग्नमानसा ।
प्राप्य तस्य सविध प्रमोदत प्रश्रयेण मधुरा गिरमाहु ॥ २६ ॥

कुवलयाह्लादसदायकोऽपि निखिलमहीभृन्महितपादोऽपि भवान दोषाकरतया न सुधाकर, पद्मोल्लासनपटुरपि सन्मार्गाश्रितोऽपि महिरेषाभावेन न प्रभाकर, सुमनोबृन्दवन्दितोऽपि क्षमाभृदनुकूलत या न पुरदर, कुशाग्रनिकाशमतिरपि मौढ्यविरहेण न सुरगुरु ।

इत्यादिस्तुतिविस्तारान्परिपप्रच्छ ताञ्जनान् ।
कृत्या के यूयमित्येव कुरुवीर कुतूहलात् ॥ २७ ॥

इति जीवधरेण पृष्टास्तेऽप्येवमवोचन्त—

अत्रास्ति चन्द्राभपुरी प्रसिद्धा यथार्थनाम्नी धनवज्रसौधै ।
अभ्रलिहैरम्बुजसभवस्य निर्माणनैपुण्यविलासमीमा ॥ २८ ॥

यस्या निशाया मदिरेक्षणाना कपोलदेशे मणिबिम्बदम्भात् ।
मुखाब्जकान्तेरपहारसक्त समागतश्चन्द्र इवावभासे ॥ २९ ॥

यत्मालरत्नकान्तीना पल्लवेनेव तर्जित ।
भानुर्व्वनपटच्छन्नो भाति प्रविरलातप ॥ ३० ॥

तां पालयत्यमरराजसमानकीर्तिः
शौर्याकरो धनपतिप्रथितो महीशः ।
श्रीमानहीनवपुरप्यभुजङ्गलीलो
मित्रानुरागसहितोऽपि कलाधरेच्छः ॥ ३१ ॥
श्रीराजकशिरोरत्नकान्तिजालातपाञ्चितम् ।
यस्य पादाम्बुजं भाति नखचन्द्रिकयोज्ज्वलम् ॥ ३२ ॥
तिलोत्तमेति विख्याता तस्य कान्ता मनोरमा ।
विरामभूमिः कान्तीनामनूनगुणभूषणा ॥ ३३ ॥
कान्त्या विजितपद्मास्ति तयोः पद्मेति नन्दिनी ।
शिरीषसुकुमाराङ्गी कठिनस्तनकुड्मला ॥ ३४ ॥

कदाचिदेषा त्रिभुवनललामवल्ली विहाराय वनमागता तत्र तत्र सखीभिः सह विहरन्ती रोमराजिलतया वेण्या च मामियं निराकरोतीति कृतविद्वेषेणेवाशोविषेण दष्टा विदितवृत्तान्तेन महाचिन्तेन भूकान्तेन कारितामिमां निर्विषीकुर्वते दास्यते सार्वराज्या कन्यकेति वोषणां निशम्य समागतैर्विषवैद्यैश्चिकित्सितापि नोल्लाघतामाससाद ।

पद्मापि गौरी नरपालपुत्री मध्येन हीनापि सुमध्यमा सा ।
भुजङ्गदष्टा बत कन्यकापि विभाति सौख्यादिव मीलिताक्षी ॥३५॥

भवतां विषविज्ञानमस्ति चेन्निस्तुलप्रभम् ।
निर्विषीक्रियतामद्य कन्यारत्नं धरापतेः ॥ ३६ ॥

इति तेषां वचनमाकर्ण्य किंचिदस्तीति प्रत्युत्तरेण तान्कलकलेन केकिन इव जलधरो जीवंधरः संमोदयन्, तैरनुगम्यमानो राजभवनमासाद्य नगरमोहनाङ्गीं सगरमोहनाङ्गीं वयसा विषेण च श्यामाङ्गतया मालतीलतासर्वस्वसाम्यमनुभवन्तीं म्लानाम्बुजसंनिभभालां निष्पिष्टबालमृणालसंमितभुजयुगलां श्वसितकम्पिनघनस्तनकुड्मलां नरपालबालामर-

लोक्य पञ्चशरप्रहारवञ्चितेन मनसा यक्षरानस्य स्मरन्नभिमन्त्रयामास।

तावन्मोहेन मुक्ता नरपतिदुहिता चन्द्रिकेव ग्रहेण
धूमेनाग्नेः शिखेवाचलघनतमसा मुच्यमानेव राका।
आकाशस्येव लक्ष्मीरसितजलमुचा शैवलेनेव गङ्गा
सेयं विद्युन्निकाशा सविधगतजनानन्दिनी द्रागुदस्थात् ॥ ३७॥
पित्रोरानन्दिनी सेऽयं चन्द्रिकेव चकोरयोः।
जीवंधरस्य नयने सुखयामास सादरम् ॥ ३८ ॥

तावदानन्दमकरन्दोद्गारिमनःसरोजेन क्षोणीपालकेन सविधमानीय कृतनुतिवचनेन मणिमयासनमधिरोपितः स्वामी जीवंधरः सप्रश्रयं संभावितस्तत्क्षणमेव रूपलक्षणादिना राजवंश्योऽयमिति संजज्ञे।

आहूय कार्तान्तिकमुख्यवृन्दं क्षोणीपतिः संसदि निश्चिकाय।
शुभं मुहूर्तं स समादिशच्च विवाहसन्नाहविजृम्भणाय ॥ ३९ ॥

तदनु मणितोरणपताकाकलशदर्पणादिभिरलंकृतासु नगररथ्यासु परिकल्पिते विविधरत्नस्तम्भचक्रचकितपरिणयमण्डपे तत्र विचित्रतया विरचितायां मङ्गलद्रव्यसंगतायां मणिवेदिकायां क्षितिपतिरुपयमंमङ्गलं विधातुमारेभे।

नरपालसुतां स्नातां प्रसाधनगृहाङ्गणे ।
प्रसाधयितुमारेभे प्रहर्षेण सखीजनः ॥ ४० ॥
'कलशजलधिवेलालोलडिण्डीरखण्डा-
यितमृदुवसनेनावेष्टिता राजपुत्री।
शरदमलघनाली शोभितेवेन्दुरेखा
सुरतरुनववल्ली पुष्पितेवाबभासे ॥ ४१ ॥
पादाम्बुजोल्लसितहीरकनूपुरश्री-
रार्विर्बभूव नखनन्दिरसेवनाय ।

तारावलिः पदसमीपगतेव तस्या-
स्तारुण्यवीरुध इवापतिता सुमालिः ॥ ४२ ॥

तस्या गुरुजघनशोभितरशना मदनराजधानी कनकप्राकारावलिरिव मारमहानिधिनिधानवेष्टितभुजगीव मीनकेतनोपवनवृतिसुरतरुवल्लीव व्यराजत ।

हारः किं वा सकलनयनाहार एवाम्बुजाक्ष्या
यद्वा वक्षोरुहगिरिपतन्निर्झरस्यैष पूरः ।
किं वा तस्याः स्तनमुकुलयोः कोमलश्रीमृणालो
भाति स्मैवं विशयवशतः स्त्रीजनैः प्रेक्ष्यमाणः ॥ ४३ ॥

नासामणिर्वक्त्रपयोजमध्यविभासुरोऽयं जलबिन्दुरेव ।
आहोस्विदस्या नवमौक्तिकं किं नासाख्यवंशाद्गलितं गरिष्ठम् ॥ ४४
किं काममन्त्रबीजालिः किं वा तद्विरुदावलिः ।
किंचित्कुचाञ्चनभृङ्गालिर्मंकरी संशयं व्यधात् ॥ ४५ ॥

एवमलंकृतां मदनमोहनमन्त्रदेवतामिव साक्षादागतां विषमबाणकेलीमिव तरुणीं रमणीजनचूडामणिं सखीजनः कामदेवस्य वेदिकामध्यविलसितमणिपट्टिकामध्यासीनस्य परिसरं शनैः शनैः प्रापयामास । तदनु सकलतूर्यस्वनितेषु मुखरितदिगन्तरेषु, मन्त्रविदां वचनेषु व्याजृम्भमाणेषु, वेदिकामितो मङ्गलमणिदीपेषु देदीप्यमानेषु, पूज्यमानेषु हव्यवाहेषु जाज्वल्यमानेषु, परिणयमङ्गलदर्शनकुतूहलविवृतनयनेषु पुरंध्रीजनेषु, जनितसंमर्दनेषु परिपत्परिकरेषु, पार्थिवेषु निजभुजाङ्गदपरस्परसङ्घर्षविगलत्कनकशकलव्याजेन बाहुप्रतापकणानिव किरत्सु, प्राप्ते च शुभे मुहूर्ते, जीवंधरस्वामी अनघालिरघातिना वारिधारापुरःसरं सादरादितां तिलोत्तमासुतां पद्मां पाणौ परिजग्राह ।

प्राप्यार्धराज्यं कुरुवंशकेतुः कन्दर्पसाम्राज्यरमां च पद्माम् ।
प्रमोदकल्लोलपरंपराणामाघातहृष्यद्धृदयाम्बुजोऽभूत् ॥ ४६ ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे
पद्मालम्भो नाम पञ्चमो लम्बः ।

षष्ठो लम्बः ।

पद्मां पयोधरभरानतगात्रयष्टीं
पद्माननां कुरुवरो रमयांश्चिराय ।
तद्भ्रातृभिर्गुणमणीकुलरोहणैस्तै-
र्द्वात्रिंशता प्रतिदिनं परिपूज्यते स्म ॥ १ ॥

कदाचित्कुरुवीरस्य सकलभूतसंतापनाशनं निखिललोकदेदीप्यमानं भुजप्रतापमभिवीक्ष्य लज्जयेव संहृतनिजप्रतापे, स्वैराभिसारनिरोधजनितक्रोधानां बन्धकीनामारक्तकटाक्षच्छटाभिरिव संहृतनिकरे समानीतपद्मिनीहृदयानुरागपरंपराभिरिव कुङ्कुमसच्छायमण्डले दिनकरे चरमशिखरिशेखरकनककलशशङ्काकरे, सायन्तनसुगन्धिशीतलमन्दपवनलोलितललितलताङ्गुलितयाह्वयद्भय इव वनविटपिभ्यो व्याकुलारावव्याजेन प्रत्युत्तरमभिधाय धावनव्यासङ्गेषु विहङ्गेषु, सहस्रपत्रेषु सहस्रकराकिरणाक्रमेण निमीलदेकैकदलैर्गणयत्स्विव मुकुलीभवत्सु, सिन्दूरच्छविबन्धुरे संध्यारागे वरुणादिशि विजृम्भिते, आविर्भवत्तिमिरनिकरभीत्येव बम्भरेषु पद्माकरं विहाय कुमुदाकरमाक्रमत्सु, ध्वान्तकदम्बमुदगृम्भत ।

लोकदीपे रवौ लोकगृहमाभास्य निर्वृते ।
तत्कज्जलमिवानीलं तमोवृन्दमजायत ॥ २ ॥
संदष्टं बिसमुत्सृज्य चक्रद्वन्द्वेन मूर्च्छता ।

परिवृत्तमुखाब्जेन तूर्णं विजघटे तदा ॥ ३ ॥
दिनमणिविरहेण व्याकुलाङ्गी. नभःश्री-
स्तिमिरनिकरदम्भात्तूर्णमाकीर्णकेशा ।
उडुमणिगणलक्ष्यादश्रुबिन्दून्दधाना
रमणविपदि .रेजे रोदनं तन्वतीव ॥ ४ ॥
तमःशबरसंरुद्धां यामिनीं निजवल्लभाम् ।
वीक्ष्य कोपादिवाताम्रः शशीः पूर्वाद्रिमानशे ॥ ५ ॥

तदनु निशाकरं पुरंदरदिशाविशालनयनामुखचुम्बनचतुरमालोक्येव पुरतरुणेषु कान्तामुखचुम्बनपरेषु, शशधरकरस्पर्शनविद्रुतशशिकान्ततलमालक्ष्येव युवतीषु दयितकरस्पर्शमात्रेण द्रवन्तीषु, तत्क्षणमुद्वेलजलनिधिमुद्वीक्ष्येव समुच्छसदुच्छोलकल्लोले कामार्णवे, मरसीसमुद्भूतसरोजेष्विव कुलटाजननलपनतटेषु मुकुलितेषु, क्रमेण नृपमन्दिरे निद्राणे निखिलजने, केनाप्यनुपलक्षितः कुरुवीरः पुरान्निश्चक्राम ।

गव्यूतिकाः काश्चिदतीत्य दूरं गतस्य सत्यंधरभूपसूनोः ।
शङ्कावधूटचा हृदयाद्गतायाः सहायतां प्राप निशा किलेषा ॥६॥
पद्मापि कान्तविरहाम्बुधिमध्यभागे
संतापवाडवहुताशनकीलर्लीढे ।
कंदर्पनक्रकलिते कलकण्ठगान-
कोलाहले खलु ममज्ज चिरादपारे ॥ ७ ॥
लोकपालजनाः केचिच्चतुर्दिक्षु गवेषिणः ।
प्राज्ञा अपि कुमारस्य नाज्ञासिषुरिहागतिम् ॥ ८ ॥

तत्र तत्र तीर्थस्थानानि यानंयानं सत्वरं गत्वरः कुरुवीरः, क्वचन वासःसमासक्ततापसकुलरुप्यमाणतरुत्वद्भमंरारावमुखरम्, क्वचि-

तापपिण्डपण्डकरमण्डितकमण्डलुमुखनैर्झरजलपुरणजनितकलकलशब्द-
शोभितम्, कुत्रचिद्बालरुकुलबुटितोज्झितमौञ्जीमेखलाविकीर्णम्, कुत्र
चन कुमारिकापूर्यमाणबालवृक्षालवालम्, क्वचन कापायवसनसेचन
लोहितायमानसरोमलम्, क्वचन संसिक्तवल्कलशिखानिर्गलत्पयोधारा
रेखाञ्चितम्, क्वचन चमूरुचर्मनिर्मितासनासीनतपपरजनसंकुलम्, कुत्र
चित्स्नानकालसंसक्तशैवालच्छटायमानजटापटलधारितया परितो दे
दीप्यमानपावकप्रसृतधूमरेखालिङ्गितैरिवोर्ध्वप्रसारितभुजदण्डैः पञ्चा-
ग्नितपःप्रचण्डैस्तापसैर्मण्डितम्, क्वचन तत्पत्नीजनक्रियमाणनी
वारपाकम्, क्वचित्तत्पुत्रच्छिद्यमानार्द्रसमित्समाकुलम्, तपोवनं ददर्श।

असत्तपो वीक्ष्य कुरुप्रवीरः कृपानटीताण्डवरङ्गचित्तः।
अबोधयत्ताञ्जिनधर्ममार्गमुपेक्षते कः पतितो निकूपे ॥ ९ ॥
तण्डुलस्य विरहे जलानलाद्यागमेऽपि सफलो न हि पाकः।
तत्त्वबोधविगमे तथा तनोर्दण्डनेन सफला न तपस्या ॥ १० ॥
मुधा जटाजूटयुता हि यूयं निटालदेशे तपनेन तप्ताः।
बुधास्तपो हिंसनजुष्टमेतत्कर्तुं सदा नार्हथ निष्फलत्वात् ॥ ११ ॥
जटालाना जलान्ते वो जटालग्ना हि जन्तवः।
पश्यताग्नेो च्युताः पश्चान्नश्यन्ति बहवः क्षणात् ॥ १२ ॥

तस्मादिदं क्लिष्टतपो विहाय नैर्ग्रन्थ्यरूपं परमं भजेत।
यस्मिन्सदा संनिहिता जिनाङ्घ्रिभक्त्यान्विते शाश्वतमुक्तिलक्ष्मीः ॥ १३ ॥

इत्यादिप्रकारेण मुक्त्यङ्गनासंगमचाटुवचनायमानेन संसारवि
शङ्कटकवाटविघटितपटुकुक्षिकाभूतेन धर्मघण्टापथप्रतीहारप्रवेशप्र-
तीहारायितेन निजगम्भीरवचनयुगेन संभावितानमन्मार्गलङ्घनजङ्घा-
लान्सन्मार्गक्रमणप्रवणान्कतिपयतापसानवलोक्य स्तोकेतरसंतोषस
वलितमानसः कुरुकुलोत्तंसः, तद्वनान्निर्गत्य, निसर्गरुचिरं नगर-

प्रमुखे रोचितमपि नरोचितं सर्वोत्तरमपि नाम्ना दक्षिणं देशमासाद्य, क्षेमपुरोपवनमध्यवाभास्यमानं घनमण्डलमध्यशोशुभ्यमानरविबिम्बममानमत्युन्नतप्रमाणमपि भगवतो विमानमवालोकत ।

अभ्रंलिहाग्रै रविदीप्रकूटैः महस्रसंख्यैर्नवरत्ननद्धैः ।
संलक्ष्यते यः फणिराडिवोद्यन्पातालल्लोकात्फणरत्नजुष्टः ॥१४
यत्कूटलग्ना स्फुटतारकालिः सुमावलिश्चामरलोकवृष्ट्या ।
विभिद्यते षट्चरणैर्विलोलैर्गन्धान्वितैर्नैकतमध्रुगानैः ॥१५॥
मन्दमारुतविधूतकेतनो यः सुरासुरगणं समन्ततः ।
आह्वयन्निव विभाति सन्ततं वन्दनाय विततेन बाहुना ॥१६॥

तादृक्षः सकललोकलोचनासेचनकं घटितकवाटकं श्रीविमानमालोक्यातिसंतोषविस्मयाभ्यां परवशो दिनेश इव सुराचलं प्रदक्षिणीकृत्य कृत्यविदामग्रणीः कुरुवंशमणिरेवं स्तोतुमारेभे ।

भवभरभयदूरं भावितानन्दसारं
धृतविमलशरीरं दिव्यवाणीविचारम् ।
मदनमदविकारं मञ्जुकारुण्यपूरं
श्रयत जिनपधीरं शान्तिनाथं गभीरम् ॥१७॥

यस्याशोकतरुर्विभाति शिशिरच्छायः श्रितानां शुचं
धुन्वन्सार्थकनामधेयगरिमा माहात्म्यसंवादकः ।
ये देवाः परितो ववर्षुरमितैः फुल्लैः प्रसूनोच्चयैः
कल्याणाचलमन्ततः कुसुमिता मन्दारवृक्षा यथा ॥१८॥

सकलवचनभेदाकारिणी दिव्यभाषा
शमयति भवतापं प्राणिनां मङ्क्षु यस्य ।
अमरकरविधूतश्यामराणां समूहो
विलसति खलु मुक्तिश्रीकटाक्षानुकारी ॥१९॥

युष्मत्पादपयोजधूलिनिचयैरत्रालयो मामकः
शुद्धः कार्य इति प्रमोदकलिका चित्ते जरीजृम्भते ।
सेयं संप्रति धीमता विकसिता कार्या न चेदेष वै
द्रागाकारखिलीभवत्तदभिधावाच्यार्थमाटीकते ॥ ४३ ॥
सकलभवनवृन्दं सत्पदाम्भोजधूली-
परिचयपरिहीनं नैजनाम्नोऽन्यथार्थम् ।
भजत इति ह लोके सुप्रतीतं सुधीनां
निखिलगुणपयोधे मद्वचोऽङ्गीकुरुष्व ॥ ४४ ॥

तदनन्तरमनुकम्पितचेताः कुरुकुलशशाङ्कस्तद्वचनं बहुमन्यमानः, तपनरथजवनिन्दनेन स्यन्दनेन गोपुरद्वारं प्रविश्य, प्रासादपालिकावातायनप्रसृतपुरन्ध्रिकापाङ्गतरङ्गितनीलोत्पलश्यामलतोरणदामावलीषु प्रतोलीषु रक्तनयननालीको नालीकसायकस्तालीफलस्तनीनां व्यालीनिभवेणीनां रमणीमणीनामक्षिभ्यः पुष्कलसंमदाश्रुलहरीम्, कटितटेभ्यो नीवीबन्धपदवीम्, हृदयेभ्यो धैर्यपरिपाटीम्, युगपल्लिलामादधानो, मन्दमन्दं तन्मन्दिरमविन्दत ।

तत्रालये कनकपीठमलंकरिष्णु-
र्जिष्णुप्रतीपविभवः कुरुवंशकेतुः ।
संप्रार्थितो बहुतरं वणिजां वरेण
कन्याकराम्बुरुहपीडनमन्वमंस्त ॥ ४५ ॥

हुताशने साक्षिणि भद्रलग्ने सुभद्रदत्तां कुरुसिंह एषः ।
क्षमाश्रियं कोमलगात्रयष्टीं जग्राह पाणौ जगदेकवीरः ॥४६॥
पाणिपद्मं गृहीत्वास्याः स्विन्नाङ्गुलिदलोज्ज्वलम् ।
मृदुलं सुकुमाराङ्ग्याः संदिदेशे कुरुकुञ्जरः ॥ ४७ ॥

तथाहि—

अवश्यायाकीर्णः किमु कमलकोशो न हि न हि
प्रभेदक्तस्यास्ते किमु नखसुधासूतिमिहिका ।
न चास्याः सौगन्ध्यं सपदि करनीरेजविगल-
न्मधुस्यन्दः किं वा न हि न हि सुधैव प्रसरति ॥४७॥
तौ दम्पती महाकान्ती मणिभूषणमण्डितौ ।
चक्रासामासतुर्वेद्यां रतिपञ्चशराविव ॥ ४८ ॥
क्षेमश्रीः कुरुकुञ्जरस्य सविधे पाथोजधिक्कारिणी
पद्भ्यामूरुयुगेन सारकदलीकाण्डश्रियं बिभ्रती ।
पाणिभ्यां नवपल्लवप्रतिमतां संसूचयन्ती स्वयं
वक्षोजद्वितयेन कोकयुगलीन्यक्कारधीरा बभौ ॥४९॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे
क्षेमश्रीलम्भो नाम षष्ठो लम्बः ।

सप्तमो लम्बः ।

तदनु कुरुभरिष्टः क्षेमलक्ष्म्या कृशाङ्ग्या
निरवधिसुखनाति नित्यसंयोगहेतुम् ।
अविरतमनुभूय प्रागिवासौ कदाचि-
न्निशि निरगमेदक. काननान्तं क्रमेण ॥ १ ॥

तदनु, प्राणकान्तावियोगेन नान्तां दग्धरत्नुमसकान्तिसंक्रान्ताम्, नयनयुगलं निःश्वासं च दीर्घमादधानाम्, पयोधरभरं संतापं च गुरुं बिभ्राणाम्, करनिचये चित्तं च तम समूहमहायनान्वतीम्. मनुरक्तां सख्यस्तां चानिवनुमाकलयन्तीम्, दुःखसागरनिमग्नां पुत्रीं विलोक्य, सुभद्रोऽपि संतप्तस्वान्तः कान्तारमागत्य, तत्र तत्र

तच्च रत्नत्रये पूर्णं परमं प्राप्यमात्मनः ।
तच्च सद्दृष्टिसंज्ञानचारित्राणि प्रकीर्तितम् ॥ ८ ॥
आप्तागमपदार्थानां श्रद्धानं दर्शनं विदुः ।
तन्मूले ज्ञानचारित्रे भव्यलोकैकभूषणे ॥ ९ ॥
उत्तमाङ्गमिवाङ्गेषु नयनं करणेष्विव ।
मुक्त्यङ्गेषु प्रधानाङ्गं सम्यग्दर्शनमिष्यते ॥ १० ॥
आत्मा हि ज्ञानदृक्मोक्ष्यलक्षणो विमलः परः ।
सर्वाशुचिनिदानेभ्यो देहादिभ्य इतीरितः ॥ ११ ॥
इत्यादि स्वार्थविज्ञानं सम्यक्ज्ञानमसंशयम् ।
सम्यक्ज्ञानवता कार्यः परित्यागः परस्यवै ॥ १२ ॥
परित्यागवतो जीवा द्विविधाः परिकीर्तिताः ।
अनगाराश्च सागाराः पूर्वे सावद्यवर्जिताः ॥ १३ ॥

यतीनां सुधर्मं न शक्नोपि वोढुं महोक्षेण वाह्यं यथा तत्किशोरः ।
अतस्त्वं गृहाण गृहस्थस्य धर्मं यतो मुक्तिलक्ष्मीरदूरे भवित्री ॥१४॥

पञ्चाणुव्रतसंपन्ना गुणशिक्षाव्रतोद्यताः ।
सम्यग्दर्शनविज्ञानाः सावद्या गृहमेधिनः ॥ १५ ॥
हिंसानृतस्तेयवधूव्यवायपरिग्रहेभ्यो विरतिः कथंचित् ।
मद्यस्य मांसस्य च माक्षिकस्य त्यागस्तथा मूलगुणा इमेऽष्टौ ॥१६
दिग्देशानर्थदण्डेभ्यो विरतिस्तु गुणव्रतम् ।
भोगोपभोगसंख्यानं केचिदाहुर्गुणव्रतम् ॥ १७ ॥
सामायिकं प्रोषधकोपवासस्तथातिथीनामपि संग्रहश्च ।
सल्लेखना चेति चतुष्प्रकारं शिक्षाव्रतं शिक्षितमागमज्ञैः ॥ १८ ॥
इत्युक्तव्रतसंपन्नः कश्चिद्देशे कचित्क्षणे ।
महाव्रती भवेत्तस्माद्ग्राह्यं धर्ममगारिणाम् ॥ १९ ॥

इति प्रतिपादितं धर्मं शिरसा मनसा च प्रतिगृह्यानमन्तर्गतप्रताप-कोरकपुञ्जमिव मणिभूषणगणमात्मना वितीर्णमत्यादरमेदुरेण करेण पत्त्रलिमभाग्यवृन्दमिवादाय संमदपयःपूरैः क्षालयन्तमिवातिसंतोष-कोरकितान्तरङ्गं तं धार्मिकमुन्मृज्य तस्य स्मरन्नेव कुरुकुञ्जर-स्तस्माद्वनान्निर्ययौ ।

गभस्तिमाली गगनस्य मध्यं द्रुमालवालं जलमध्यमेणः ।
निद्रां च शोषं समभाप नृणां शरीरमुद्यद्वनघर्मतोयम् ॥२०॥

तदानीं, पत्त्रलिमहेलिसंतापार्ततया मृष्टचन्दनरसपाण्डुगण्डमण्ड-लेषु वनशुण्डालेषु चलाचलनिजकर्णतालपवनसंवीज्यमाननेषु हस्तोज्झितशीकरनिकरसंसिक्तहृदयेषु मन्दमन्दमागत्य सरोवरप्रवे-शनपरेषु, कर्णिकारमुकुलानि निर्भिद्यान्तर्लीयमानेषु षट्चरणेषु, संतप्तजलं विहाय शीतलनलिनीदलं सेवमानेषु कारण्डवेषु, पञ्जरबद्ध-क्रीडाशुकेषु जलं याचमानेषु, त्रिजगदेकातपत्रायितकीर्तिमण्डलेन सकलजनतासंतापनाशनोऽपि कुरुवंशपावनः श्रान्तो विश्रान्तिकृते नमेरुतरुमूलमाससाद ।

निषण्णस्तत्र मधुरं रवं शृण्वन्कुरूत्तमः ।
संदिग्धे सिन्धुगम्भीरः कल्याणाद्रिरिव स्थिरः ॥ २१ ॥

टङ्कारः किं मारवाणासनस्य झङ्कारोऽयं मत्तमाध्वीलिहां किम् ।
हंसानां किं मञ्जुलः कण्ठनादः किंवा लीलाकोकिलालाप एषः ॥२२॥

इति संदेहं पराङ्गनानूपुररवविनिश्चयेन निवर्तयन्परपरिग्रहविरक्त-मानसः कुरुकुलोत्तंसः पराङ्मुखो बभूव ।

संचरन्ती वने तत्र भर्त्रा काचन खेचरी ।
प्रतार्य तं मिषेणाशु पुरस्तादस्य संन्यधात् ॥ २३ ॥
मुखं पर्वविधुं विजित्य भ्रूचापदम्भाज्जयकेतुनद्धम् ।

कर्णोद्भवे तल्लयकीर्तिपत्रं बभार ताटङ्कमणिच्छलेन ॥ २४ ॥
वृषस्यन्ती वरारोहा वृषस्कन्धं कुरुद्वहम् ।
वीक्ष्य तस्याङ्गसौन्दर्यं नातृपत्सा त्रपाकुला ॥ २५ ॥
सत्यांसावि रेजतुर्नेयरमाक्रीडामहीध्राविव
श्रीदेवीरतिवज्रपक्षमिव यद्वक्षःस्थलं व्याबभौ ।
नाभिर्यौवनतटविशालगजतारोधार्थवारीनिभा-
जङ्घे पूर्णगुलुञ्छनिन्दनकरे पादौ जिताम्भोरुहौ ॥ २६ ॥
यद्वक्त्रं वितनान वाग्वरसतीक्रीडास्थलीविभ्रमं
यन्नासा च कलावतारविलसन्निःश्रेणिकामंशयम् ।
यन्नेत्रे ददतुर्विशालकमलाक्रीडातटाकभ्रमं
यद्भ्रूयुग्ममधाचकार निपतं निम्नच्छदाडम्बरम् ॥२७॥
अथस्यन्ती विशालाक्षी विश्वाधिकविभोज्ज्वलम् ।
कुरुवीरमुवाचेदं कुसुमायुधवञ्चिता ॥ २८ ॥
श्रीमन् तवाङ्गकान्त्या मे नयने सफलेऽधुना ।
कर्णौ वचनमाधुर्याद्धृदयं गुणमालया ॥ २९ ॥
ममार्यं विरहानलं शमय शीतलापाङ्गतो
मुखेन्दुरुचिसंपदा सपदि जिन्धि कामान्धताम् ।
सुधासमगिराधरामृतरसप्रदानेन च
प्रणाशय घृणानिधे बहलकामतृष्णामिमाम् ॥ ३० ॥
इत्यादितद्वचनपरिपाटीमाकर्ण्य शम्बरारिविकारसंतमसवासरायमाणमानसः कृत्यविदामग्रगण्यः कुरुवरेण्यः परीतैर्वैराग्यप्रावण्यस्तदरण्यान्निर्गन्तुमारभत । तदनु पञ्चशरनाराचवञ्चितविवेका सा विद्याधरचक्रवालाक्षी किंचिदन्तरमुपसृत्य मदनहुतभुगधिनिकाशतनुलता तादृक्तिनं विज्ञाय तत्प्रणयशीकारकोरकितकुतूहला

निनोदन्तमित्थ मकटयामास ।

अनङ्गतिलकाह्वया खचरकन्यकाह विभो
वनान्तमिदमापिता गगनचारिणा केनचित् ।
अनेन निजनायिकाभयवशेन नि सारिता
दयाविसरवारिधे महित रक्षणीया त्वया ॥ ३१ ॥
अशरण्यशरण्यत्व परोपकृतिशीलता ।
दयापरत्व दाक्षिण्य श्रीमत सहना गुणा ॥ ३२ ॥

"तवता, हा प्रिये हा प्राणकान्ते क्वासि क्वासि, वियोगवेदना विषमिव विसर्पति, पावक इवाङ्गानि निर्दहति, मृत्युरिव प्राणान्नि सारयति, मोह इव विद्या विलुम्पति, कृकच इव मर्माणि कृन्तति' इत्यादि कस्यचिदार्तस्वर निशम्य विद्याधरविशालनयनाया प्रिये णान्तर्हिताया, विस्मयविस्तृतास्त कुरुहर्यक्षं सोऽपि विद्याधर समीपमागत्य सगद्गदमेवमुवाच ।

सतीमुदन्याकुलितान्तरङ्गामत्रैव सस्थाप्य जलाशयाय ।
गतोऽहमागत्य सरोरुहाक्षीं नाद्राक्षमद्य प्रतिकूलदिष्टान् ॥३३॥
नरोत्तम तया सार्धं विद्यापि मम निर्गता ।
मनोवृत्तिश्च तत्कर्तुं चिन्तापि न हि शक्यते ॥ ३४ ॥
इति कर्तव्यतामूढ मामुद्दिश्य नरोत्तम ।
प्रज्ञानामग्रगण्यस्त्व ब्रूहि कर्तव्यमत्र वै ॥ ३५ ॥

इत्यादिविद्याधरदैन्यदन्तुरितवचनरचनामाकर्ण्य पारावारगभीर कुरुवीरो मन्दस्मितरुचिलहरीकपटेन सुधाधारा किरन्निव गम्भीर वचनगुम्भ विजृम्भयामास ।

धैर्यौदार्यविवर्जित क्षितिपति प्रज्ञाविहीनो गुरु
कृत्याकृत्यविचारशून्यसचिव सग्रामभीरुर्भट ।

सर्वज्ञस्तत्त्वहीनकल्पनकविर्वाग्मित्वहीनो बुधः
स्त्रीवैराग्यकथानभिज्ञपुरुषः सर्वे हि साधारणाः ॥ ३६ ॥
वज्रात्कठोरतरमेणदृशां हि चित्तं
पुष्पादतीव मृदुलो वचनप्रचारः ।
कन्यं निजालककुलादपि वक्रमूर्ति
तस्माद्बुधाः सुनयनां न हि विश्वसन्ति ॥ ३७ ॥
वक्त्रं श्लेष्मनिकेतनं मलमयं नेत्रद्वयं तत्कुचौ
मांसाकारघनौ नितम्बफलकं रक्तास्थिपुञ्जाततम् ।
शीतांशुर्विकचोत्पलं करिपतेः कुम्भौ महासेकतं
भातीत्येवमुशन्ति मुग्धकवयस्तद्रागविस्फूर्जितम् ॥३८॥

इत्यादिनिजवचोविलासं विद्याधरनडहृदये सारमेयोदरे सर्पिरिवा-मलप्रभालोक्य विस्तारितकरुणः कुरुचारणः, तस्माद्विपिनान्निर्गत्य, निसर्गरुचिरां नितम्बिनीमिव मुखभागकलितातिलकशोभमानां प्रफुल्लकुचविराजितामम्लतरूपशोभितां मदनाधिष्ठितां चारामस्थली-माससाद ।

यत्र हि—

श्रोत्रं भृङ्गकुलारवः सुखयति प्रत्यग्रपुष्पस्तरु-
र्नेत्रं फुल्लसरोजगन्धलहरी घ्राणं मनो दीर्घिका ।
वायुः स्पर्शनमन्ततो रसभरीपूर्णः फलानां चयः
षष्ठोऽयं रसनां तदिन्द्रियगणः सर्वः सुखं गाहते ॥ ३९ ॥
निर्मला सरसी यत्र निर्मिमीते मुदं पराम् ।
विशाला पद्मरुचिरा वीक्षितेव घनश्रियः ॥ ४० ॥

यत्र चाम्रशिरस्य शकुन्तसन्तानदन्तुरितनीलच्छदस्य मधुलुब्ध-मधुकरकुलान्वीकृतस्य कस्य च रसालरसारूढस्य शाखाग्रभाग-

विराजितं वनदेवतारसपूर्णहेमकरण्डकायमानं परिपाकपाटलफलं पातयितुं प्रयतमानानपराद्धानेकशरनिकरान्नरपतिकुमारानवलोक्य, लोकोत्तरकोदण्डविद्यापाण्डित्यमण्डिता जीवंधरः करकलितकार्मुकलताविस्फारपूरितदिगन्तरः, सरभसप्रक्षिप्तमर्त्स्वेडनलक्षीकृतं तत्फलं सशिलीमुखं करेणोपादत्त ।

उदारः सहकारोऽयं मार्गणाय फलं दिशन् ।
भेजे कल्पकतां नो चेत्सुमनस्सेव्यता कथम् ॥ ४१ ॥

दृष्ट्वा फलं सशरमापतितं कराब्जे
जीवंधरस्य शरकौशलपारगस्य ।
व्यस्मेष्ट मङ्क्षु नरपालतनूजवर्गः
श्लाघावशेन विगलन्निजकर्णपूरम् ॥ ४२ ॥

ततस्तत्समीपमभ्येत्य कलितविनयो राजतनयः, समाध्मं, भो भो महाभाग कार्मुकविद्याकोविद, मामज्ञातभवादृशसज्जनसमुचितसल्लापप्रकारमपि मुखरयति श्रीमदीयचापविद्यावैदग्ध्यनिरीक्षणक्षणजनितविस्मयः काञ्चनगौरतावकशरीरसौन्दर्यावलोकनजातानन्दकन्दलश्च ।

अतस्त्वां प्रार्थये श्रीमन्युक्तं वायुक्तमेव वा ।
मामकीनं वचो नूनं कर्णदेशे विधीयताम् ॥ ४३ ॥

अत्रास्ति हेमाभपुरी गरीयसी यद्वज्रसौधेष्वधिरात्रि संपतन् ।
सुधामयूखः कलशार्णवान्तरे पुनर्निवासं कलयन्निवेक्ष्यते ॥४४॥

कुरुविन्दमन्दिरकुलानि संगता-
न्यरुणस्य बालकिरणैः सहैकताम् ।
तमसीव हस्तपरिमर्शतः मगे
परिनिश्चिनोति पुरि यत्र सज्जनः ॥ ४५ ॥

दृढमित्र इति प्रतीतभूपः पुरमेनां परिपालयत्यजस्रम् ।
नलिना नलिनामलायताक्षी महिषी तस्य महीललामवल्ली ॥४६॥
तयोः सुताः सुमित्राद्यास्तेष्वप्यन्यतमोऽस्म्यहम् ।
विद्याहीना वयं सर्वे नद्या हीना इवाद्रयः ॥ ४७ ॥

अतः कोदण्डविद्याकुशलं नरशार्दूलमन्वेषमाणोऽस्मत्तातपादः, पराक्रमापहृतसामन्तसीमन्तिनीनयनकज्जलकालिकाशङ्कावदान्यमौर्वीकिणश्यामिकालंकृतभुजदण्डस्य श्रीमतः संदर्शनेन, कलापीव बलाहकदर्शनेन, नदीपतिरिव निशाकरदर्शनेन, वनोत्कर इव वसन्तदर्शनेन, कमलाकर इव कमलबन्धुदर्शनेन, प्रमोदसर्वस्वमनुभविष्यति ।

तस्मादस्मत्पितुर्वाञ्छावल्लीं संप्रति पुष्पिताम् ।
सभास्तारदृशश्चापि सफलीकुरु कोविद ॥ ४८ ॥
स तस्य विनयोज्ज्वलां वचनबन्धशैलीं श्रुतौ
मनस्यनुमतिं धरापतिनिरीक्षणाय क्षणात् ।
रथे च चरणाम्बुजं नृपसुतेः पुरः स्थापिते
चकार युगपद्दयाजलनिधिः कुरूणां पतिः ॥ ४९॥

तदनु प्रत्येकमधिष्ठितस्यन्दनैर्नृपनन्दनैः परिवृतशताङ्गः कुरुकुलशशाङ्कः पुरद्वारं प्रविश्य प्रासादवातायनदत्तनयनैर्विलासिनीजनैः सस्पृहमालोक्यमानः क्रमेण नरपतिभवनद्वारि रथादवतीर्य तैः पुररक्षिभिर्दीयमानमार्गः क्षितिपतिमंसदमाससाद ।

भूपोऽपि नन्दनगिरा वपुषा च तस्य
माहात्म्यसंपदमवेत्य चकार वीरम् ।
तं रत्नपीठशिखरे तदुपान्तभूमौ
पुत्रांसदाननविधौ निनटक्करोरम् ॥ ५० ॥

अनामयोक्तेरनुजाय वाणी नृपाननाब्जाद्द्रुतमाविरास ।
फुल्लात्सरोजान्मकरन्दझर्याः पश्चात्प्रभूतेव सुगन्धलक्ष्मीः ॥९१॥

कृत्यास्त्वदीयविरहकातरीकृतमानसाः ।
कृत्यानां नयनानन्दः संभविष्यति दर्शनात् ॥ ९२ ॥

को वा देशः पचेलिमभाग्यः श्रीमदीयप्रवालकोपमपदयुगलस्पर्शसुखमनुभविष्यति । कीदृशपुरप्रासादाङ्गणालंकरणरमणीनां नयनकुवलयेषु श्रीमदीयसंदर्शनकन्दलितानन्दबाष्पनिष्यन्दो मकरन्दशङ्कामङ्कुरयिष्यति । कस्यां वा वंशवल्लयां विमुक्तोपमानोऽपि भवान्मुक्ताफलायते । कः पुनः श्रीमता पुत्रवतां मौलिमाणिक्यतामारोपितो भाग्यवतां माहात्म्यवतां कीर्तिमतां च ।

इत्यादिप्रश्नपदवीं यथायोग्योत्तराक्षरैः ।
लङ्घयामास जङ्घालः स्वामी वचनवर्त्मनि ॥ ९३ ॥

विनयकन्दलितैर्विमलोत्तरैर्नरपतिर्द्विगुणीकृतकौतुकः ।
चिरमयाचत नन्दनसंसदा वरशरासकलाप्रतिपादनम् ॥ ९४ ॥

विज्ञाय तदभिप्रायं प्रज्ञाशाली नराधिपः ।
कौरवस्य वशे चक्रे कुमारानखिलानपि ॥ ९५ ॥

तदनु कोदण्डाभिण्डिपालपरिघमुद्गरपरश्वधादिपरिष्कृताम्, क्षौणीमिव शरधिभिरलंकृताम्, त्रिदशनगरीमिव सर्वतोऽमरसेविताम्, जलधिवेलामिव मधुरस्वरवारिविराजिताम्, वनसीमामिव पत्रिकुलपरिवृताम्, आयुधकान्तिसन्तानद्विगुणीकृतारुण्यरक्तमृत्तिकापरीतभूमिभागतया मूर्तामिव चापविद्याविशारदप्रतापमादधानाम्, मध्ये निखातवज्रमयस्तम्भशोभितत्वेन प्रहरणगणैर्विजित्य बन्दीकृतमिव कुलिशायुधकुलिशं बिभ्राणामायुधशालां शुभे मुहूर्ते प्रविश्य जीवंधरः क्षितिपतितनयानुद्दिश्य कार्मुककौशलं विवरीतुमारेभे ।

नृपात्मजानां निचयस्ततो नु कोदण्डविद्याकुशलत्वमाप ।
तत्कीर्तिकल्लोलपरंपरा च जगत्त्रयं मोदरसं महीशः ॥ ९६ ॥
विद्यावैदग्ध्यपीठीमधिवसति निजे नन्दनानां समाजे
दृष्टिं हेमासनस्थे कुरुकुलतपने प्रीतिमन्तश्च चिन्ताम् ।
किं कुर्यामस्य वीरव्रजमहितकलादानमान्योपकार-
श्लाघ्यस्येति क्षितीशश्रिरतरमतनोद्धीमतामग्रगण्यः ॥ ९७ ॥

तदनु कन्याविश्राणनं करणीयं गणयता नरपालमणिना प्रार्थितं परिणयं वरुणालयगभीरः करुणाकरो जीवंधरः क्रमेणाङ्गीचकार ।

नरपतिपरिदत्तां यौवनारम्भमत्तां
सपदि कनकमालां वक्षसि श्लिष्टमालाम् ।
सकलगुणवरिष्ठां सन्मुहूर्ते वरिष्ठे
कुरुपतिरुपयेमे मण्डपे तत्र हेमे ॥ ९८ ॥

इति श्रीमहाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे कनकमालालम्भो नाम सप्तमो लम्बः ।

अष्टमो लम्बः ।

नीलालकां तामुपयम्य रामां कुरूद्वहः सौख्यपयोधिमग्नः ।
स्यालेषु वात्सल्यवशेन तत्र चिरं न्यवात्सीद्रमयन्मृगाक्षीम् ॥ १ ॥

अथ कदाचिन्मन्दस्मितमकरन्दोद्गारिवदनारविन्दा विस्मयवशप्रमुषितनिमेषनयननीलोत्पलतया मालकाननाच्छोणाधरपल्लवसौरभ्यमभारुष्टो नामाचम्पकदशनेन तत्रैव निश्चलतामुपगतो भृङ्गावलिं सभावनां संपादयन्तीम्, मरकतवलयप्रभावल्लीवलनरोमराजिलतया

न्तिम्, वल्गत्कुचजितमरालगमनकेलीपरवशतया मन्दानिलान्दोलित-गुलुच्छयुगलीं जङ्घमकनकलतां तुलयन्तीम्, संमुखासीनमप्यात्मानं सकलमनुजनयनसरोजकुड्मलीकरणचणेन तेजःप्रसरणेन परीतं द्रष्टुमक्षमतया नलिनान्तिकोच्छ्वासितपल्लवतल्लजभ्रमकारिणा नयनोपरिभागचारुणा पाणिना मुखं व्यवधाय पश्यन्तीम्, प्रान्तमावसन्तीं जीवंधरः कांचिदायताक्षीमप्राक्षीत् ।

किं वक्तुकामासि कुरङ्गनेत्रि किमागता कोमलबन्धगात्रि ।
स्मितावदाता तव वक्त्रलक्ष्मीः संसूचयत्यादरतो विवक्षाम् ॥ २ ॥

इति ष्टष्टा चकोराक्षी मधुरां गिरमाददे ।
अब्जिनी भृङ्गमुखरा मकरन्दझरीमिव ॥ ३ ॥

अत्र चायुधगृहेऽपि चैकदा त्वां निरीक्ष्य परिमण्डितं श्रिया ।
चित्रिते रमति चित्तमन्दिरे संमदो मम विवक्षया सह ॥ ४ ॥

इत्यादिवचनरचनां चन्द्रकलामिव कान्ताजनेकटाक्षलीलामिवेक्षुचापकोदण्डयष्टिमिव च वक्त्रमधुरामाकर्ण्य विस्मितान्तरङ्गः कुरुशशाङ्कः, किमिदमश्रुतदृष्टपूर्वमिति चिन्तयन् क्रमेण नन्दाढ्यः समागतः किमित्यूहाञ्चक्रे ।

वपुषा पथमं विवेश शालां मनसा चैव ततः कुरूद्वहः ।
कुतुकप्रसरे हि निर्निरोधे क्रमभावो न च तत्र लक्ष्यते ॥ ५ ॥

अवलोक्याग्रजन्मानं नन्दाढ्यो मन्दविस्मयः ।
प्रमोदभारगुरुणा वपुषा प्रणनाम सः ॥ ६ ॥

विकसत्कुसुमाञ्चितेन मूर्ध्ना क्षितिभागं स न यावदस्पृशत् ।
रभसेन कुरूद्वहेन तावज्जगृहे कोमलबाहुयष्टिना ॥ ७ ॥

कुरुवीरवक्षसि कवाटविस्तृते न ममौ वपुः प्रमदभारमांसलम् ।
अनुजस्य तत्तदपि बाहुवल्लरीयुगलेन धैर्यगुरुणाभिषस्वजे ॥ ८ ॥

विनयेन वामनमयं सहोदरं शिरसि स्म निघ्रति कुरूत्तमो मुहुः ।
अनुजाङ्गमङ्गमसुखस्य सूनकैर्वनरोमकूपनिचयैर्निरन्तरः ॥ ९॥
आनन्दबाष्पैरभिषिक्तगात्रं सहोदरं हर्षविकासिनेत्रम् ।
आपृच्छ्य सौख्यं कुरुवंशकेतुः कथं समागा इति सोऽन्वयुङ्क्त ॥१०॥

इति आतुरनुयोगशीलां श्रान्तां परिगृह्य मनसा ध्यातप्राक्तन वृत्तान्तः, पुनः प्रत्यावृत्ताग्रजविप्रयोगदुःखतान्त इव सरभसमुद्भूतनिश्वसितमंदीपितस्मृतिपथंगतवियोगवह्निसंगादिव कोष्णान् तत्पूर्वतनानानन्दाश्रुबिन्दूनेव दुःखबाष्पासारतया परिणतान् स्फुटितमुक्तासरमणीनिव परितः किरन्, अमन्दतराक्रन्दनवेगं कथं कथमपि नियम्य नन्दाख्यः स्वहृदयलग्नहृद्यः सगद्गदमुत्तरमादातुमुपचक्रमे ।

भवति रामपुरात्सति निर्गते सपदि पापविपाकवशेन नः ।
सकलबन्धुगणस्य तदोत्थितो मनसि दुःसहशोकहुताशनः ॥ ११ ॥
वाचामगोचरे शोकपारावारे निपातिताम् ।
निरीक्ष्य बन्धुतां दीनां मर्तुं व्यवसिता वयम् ॥१२॥

तदानीं दुरन्तदुःखनिनान्ततान्तस्वान्तौ सन्ततमुद्भान्तबाष्पधारया प्रथमामीतिबाधामिवावहन्तौ मातापितरावेवं प्रलापमातेनतुः ।

अहह बत तनून कामि दैवं दुरन्तं
तनयविपदि सत्यामप्यहो दुःसहायाम् ।
पशुपतिनिलयन्नं जीवितं निश्चलं नो
कथमियमतिदीर्घा दुर्दशा हा विधत्ते ॥ १३ ॥

प्रजावती कथंवृत्तेति स्थाने बोधः समजायत ।

एवं भवद्दर्शनभाविसौख्यसंप्रापकादृष्टवशेन सद्यः ।
प्रजावतीमन्दिरमेत्य सोऽहं विषाददीनाक्षरमेवमूचे ॥ १४ ॥
प्रजावति विजानती सकलपद्धतिं त्वं कथं
निभर्षि नवमालिकां कचकुले हरिद्रां तनौ ।
न युक्तमिदमास्थितं विगतभर्तृवामभ्रुवां
वृथा खलु सुखासिका सकललोकगर्ह्यास्पदम् ॥१५॥
इत्युक्ता सा विशालाक्षी मन्दहासाननाम्बुजा ।
पिकीव मधुरालापा मधुरां वाचमाददे ॥ १६ ॥
अङ्ग तावकसहोदरवर्यस्तुङ्गपुण्यविभवेन मण्डितः ।
क्षेमवाञ्जयति सौख्यपरीतः पापतो वयमिहाततदुःखाः ॥१७॥
देशे देशे सुन्दरीश्चन्द्रवक्त्रः पाणौकृत्य प्राप्तहर्षप्रकर्षः ।
हेमाभाख्ये पत्तने सोऽयमद्य प्रीतां राज्ञो नन्दिनीं संदधाति ॥१८॥

एवमगण्यपुण्यवशेन विपदमपि संपदात्मना परिणतामनुभवन्तं सुखमावसन्तं निरन्तरनिपतद्राजतनूजमकुटराजिनीराजितचरणनीरजं भवदीयाग्रजं द्रष्टुमिच्छसि चेदम्येतेति प्रतिपाद्य, विद्यावैशद्येन स्मरतरङ्गिणीनाम्नि शयनतले शाययित्वा, सपत्नं मामत्रभवति प्राहिणोत् ।

इति करुणमयैर्गिरां प्रवाहैरनुजमुखादुदितैः कुरूद्वहोऽसौ ।
भृशमतनुत तापभारमन्तर्वदनतले न विकारलेशलेशम् ॥ १९ ॥
अवाचयदसौ पत्रं सगर्भेण समर्पितम् ।
गन्धर्वदत्तालिखितं विचित्राक्षरलक्षितम् ॥ २० ॥

आर्यपुत्र गुणमाला विज्ञापयत्येवम्—

कंदर्पो विषमस्तनोति तनुतां तन्वां ज्वरे गौरवं
मृत्युश्चापि दयाकथाविरहितो मां नैव संभाषते ।

आर्ये त्वं च नवाङ्गनासुखवशाद्विस्मृत्य मां मोदसे
जातीपल्लवकोमला कथमियं जीवेत्तव प्रेयसी ॥२१॥
स्वामिन्नङ्कुरितो ममोरसि कुचौ वृद्धिं गतौ तावके
वाचस्तावकवाग्मसे परिचिता मौग्ध्येन सत्यापिता ।
बाहू मातृगलस्थलादपसृतौ स्वत्कण्ठदेशेऽर्पिता
वार्यं प्रेमपयोनिधे स्थितमिदं विज्ञापितं किं पुनः ॥२२॥

इति प्रियाया अन्यापदेशलिखनपरिपाटीं मनसा चिन्तयन्नि यशोकविदीर्णशरीरः कुरुकुमारो, मुहुर्मुहुर्जननीजनवयस्यसतीर्जन, कुशलानुयोगमत्यादरेण विस्तार्य, सगर्भसगमसुद्भूतमतोषेण मुक्त मासासास ।

समया कुरुकुञ्जर निविष्ट कनकाद्रिं निकषेव शीतरश्मिम् ।
अनुज मनुजाधिपात्मजास्ते कुशलप्रश्नपुरःसरं परीयुः ॥२३॥

एव सोदरसमागमसन्तुष्टस्वान्ते कुरुकुमुदिनीकान्तमुपस्थितमोनेषु राजतनूजेषु, कदाचित्सरभसधावनजनितोर्ध्वनिश्वासनिरन्तरानि सरण दनार्घसाहाय्यकभरकम्पिततनुदण्डा प्रचण्डवातचलितबालपादप सरूपा, अन्तरमेयतया बहिः प्रसर्तेरिव भयानकरसपूरै खेदसलिले-र्दैन्यसाम्राज्येऽभिषिक्ता इव गोपा, राजमन्दिरानिरे आर्ततरमेव चुक्रुशुः ।

हेरानाटकघोटकव्रजखुरप्रोद्गुन्नोत्पद्रजो
राज्या रामभृग्रया कचन्तिताशावकाशौ परे ।
राजस्तावकगोधन निखिलमप्याहृत्य नीत स्वना
त्रिनोदञ्चितशिञ्जिनीपटुरवैर्योऽपोऽपि सशोषित ॥२४॥
उद्यत्प्रतापपल्लेन सहस्ररश्मे
र्मोमण्डल तव च भूमिपनोर्निरुद्ध ।

मत्यर्थिसैनिककुलं प्रचुराट्टहासै-
र्लोकस्थितिं शिथिलयत्यरिधीरतां च ॥ २५ ॥

इत्याक्रोशं समाकर्ण्य भूपतिर्बलमादिशत् ।
स्वामी श्वशुररुद्धोऽपि प्रस्थितः परवीरहा ॥ २६ ॥

तदनु रयविनिहतविहगपतितुरगगणविविधगतिविदलितवसुधातल-निर्गलद्धूलिकापालिकाविशेषशोषितनाकमहीसिन्धून्सुदूरमूर्ध्वप्रसारित-शुण्डादण्डसत्वरपूत्कारशीकरपरंपराभिर्गण्डतलयुगलविगलद्दानधारा भिश्च संपूर्य सार्थकनामधेयधरैः सिन्धुरैर्मन्थरगमनपयोनिधिफेनकू टायमानपटपरिष्कृतपताकादण्डमण्डितरथकडचासंघटितं धृतमेचक-कञ्चुकसंपत्तिभि. पत्तिभिः संकुलं बलं पुरोधाय प्रतिष्ठमाना, कुरुविन्दकुण्डलरुचिवीचीकवलितभुजविरावितततया बहिरपि सासा त्प्रसृतमिव प्रताप बिभ्राणा, एते ह्यनेतान्मण्डलीकान्निराकरिष्यन्तीति भयेन सेवार्थमागतास्यामिव शीतोष्णरश्मिभ्यामङ्गदाभ्यां संगता, तुङ्गतममुक्ताहारमनोरमविशालवक्षःस्थलतया नक्षत्रमालालंकृतशार-दाम्बरं तुलयन्त, ते जीवंधरनन्दाढ्यपुरःसरसुमित्रप्रमुखराजपुत्रा. क्रमेण रणाङ्गणमवतेरु. ।

भेरीरवः सकलदिक्पतिसौधशृङ्ग-
वातायनारककुलानि विभिद्य तूर्णम् ।
अन्तः प्रविश्य बहुदूरकदध्वखेद-
विश्रान्तिमाप रणकेलिमुखप्रभूतः ॥ २७ ॥

तदानीमुभयेषां सैनिकानां परस्परमेव वीरवादा बभूवु ।

अस्माकं त्रिजगत्प्रसिद्धयशसामेषा कृपाणीलता
शत्रुस्त्रीनयनान्तकज्जलजलै. श्यामा निपीतै पुरा ।

सम्प्रत्याह्वसीन्नि युष्मदसृना पानेन शोणीकृता
वीरश्रीस्मितपाण्डरा चरिततश्चित्रा भविष्यत्यहो ॥२८॥
गोवृन्दसक्तान्भवतोऽस्मदीयसुना वयस्या इव सयुगेन ।
नेष्यन्ति गामद्य निमेषमात्रान्न तिष्ठतास्मत्पुरतो हठेन ॥ २९ ॥
पशून्वा प्राणान्वा जहत झटिति क्षीबपुरुषा
स्वमूर्ध्नश्चापान्वा नमयत नरेन्द्रस्य पुरत ।
मुखे वा हस्ते वा कुरुत शरवृन्द नरपतिं
कृतान्तागार वा शरणयत तूर्णं प्रतिभटा ॥ ३० ॥
अन्येऽप्येवमाहु ।
किं वाचाविसरेण मुग्धपुरुषा किं वा वृथाडम्बरै
रात्मश्लाघनयानया किमु भटाः सैपा हि नीचोचिता ।
सक्रीडद्रथचक्रकृष्टधरणी भिन्नेभमुक्ताफले-
श्चापाभ्राच्छरवर्षतो विजयिन शुभ्र यशोऽङ्कूरति॥ ३१ ॥
इत्यादि वदतामिषामधरोष्ठपुटाविव ।
सैनिकाना समूहौ द्वौ सगतौ समरोद्यतौ ॥ ३२ ॥

गभीरह्रयहेषितैर्मदगजावलीबृंहितै-
र्नगत्रितयमन्वभूत्परमतोक्तशब्दात्मताम् ॥ ३३ ॥
शब्दैकार्णवमग्नमेतमखिलं लोकं समीक्ष्य क्षणा-
द्देवा व्योम्नि समिद्धिलोकनकलाबद्धादरा मेदुराः ।
युद्धारम्भनिरस्ततन्द्रकुरुराड्बाणासनाकृष्टता-
न्नाराचान्निबिडप्रभान्नभसि ते सान्ध्याम्बुदान्मेनिरे ॥ ३४ ॥
पद्मास्यमुख्यकरकोमलरक्तकान्ति-
कल्लोलपल्लवितकार्मुकवल्लरीभ्यः ।
नामाङ्किता प्रचलिता च शिलीमुखालि-
र्जीवंधरस्य पदपद्मसमीपमाप ॥ ३५ ॥
द्विरेफः शरवारोऽयं तस्य पादाम्बुजान्तिके ।
भ्रमंश्चकार तद्युक्तं मित्रसांनिध्यसूचनम् ॥ ३६ ॥

तदनु नामाङ्किततदीयबाणगणवीक्षणेन समुन्नतध्वजचिह्नसंदर्शनेन च, एते वयस्या इति निश्चित्य, नरपतिना साकं तदभ्याशमागतः समदविकसितरोमकूपकोरकिततनुलतः, कुरुपतिः, सबहुमानं तानेकैकशः संभाव्य, निजानुज्ञया रथारूढैः सहचरनिकरैः पुरस्कृतः, पार्श्वगतस्यन्दनकन्दलितस्थितिना महीपतिना संभाषमाणः, सिन्धुगन्धर्वगताङ्गपदगशबलं बलं पुरतो विधाय पुरतोरणमनीत्य चलितः, चिरतरविलोकने कुतूहलसंमिलितपौरजननिरन्तरे रथ्यान्तरे स्तम्बेरमकदम्बकं कादम्बिनीति मत्वा समागताभिरिव सौदामिनीभिः कनकवेत्रलताभिर्वितीर्णावकाशे विगाहमानः, पटुपटहकाहलीडिण्डिमजर्जरझल्लरीमुरजशङ्खप्रमुखवाद्यरवविहितोपहूतिभिः कामिश्चित्सामिकृतमण्डनकलाभिः करकमलसंरुद्धनीविबन्धनकनकचेलाभिश्चलाभिः कामिश्चित्सरभसकाञ्चीपददत्तमुक्ताहारवल्लरीभिः कङ्कण-

पदसमर्पिततुलाकोटिभिर्वधूटीभिरत्युन्नतहर्म्याङ्गणवातायनदत्तदृष्टिभि-
र्निर्निमेष विलोक्यमानः क्रमेण राजभवनमाससाद ।

कुशलानुयोगमथ कौरव सखी-
न्बहुधा विधाय मुदितान्तर. परम् ।
समशेत सोऽयमयथापुरोदिता-
दुपचारकौशलवशाद्विशेषत. ॥ ३७ ॥

कदाचिदेकान्ते भृशमपूर्वसंमानसमाहितसंशयडोलायमानमन-
स्मरोजेन कुरुराजेन चोदिततन्निदानाना सहचराणा तिलकाय-
मान पद्मवदनः प्रत्युत्तरशैलीमेवमुपादत्त ।

स्वामिस्त्वदीयविरहानलदग्धदेहाः
श्रीमद्भविष्यदवलोकनपुण्यपाकैः ।
आश्वासिताश्च दयया द्रुतदत्तहस्ता-
देव्या वयमूविम वयं ह्रयपाणिवेगाः ॥ ३८ ॥

तदनु निखिलमाश्वीयं पुरोधाय पुरान्निर्याय पर्यायेण
तिलद्वितबहुदूराध्वानः पत्त्रिकुलनिध्वाननिरुद्धदिशावकाशामरण्यानीं
प्रविश्याभ्रलिहतरुषण्डमण्डितदण्डकारण्यभागपरिकल्पितपटसदननि-
कटतटेषु घोटपटलं विधाय विश्रान्तिसुखमनुभवामः स्म । तत्र च ।

सौधावलीमतिशयालुभिरुन्नतैस्ते
शुभ्रैः पटायतगृहैः कलित निवासम् ।
नून भवद्विरहकातरतत्पुरश्री-
रस्माभिरागतवतीति वयं स्म विद्मः ॥ ३९ ॥

तदन्वत्यद्भुतसंनिवेशं दण्डकारण्यप्रदेशमवलोकितुकामा वयम्, तत्र
तत्र विहृत्य, क्वचन विजृम्भितकुम्भीन्द्रकुम्भस्थलमुक्तमुक्ताकुलसि-
कतिल वनविहरणश्रान्तनिमज्जत्पुलिन्दसुन्दरीवदनाम्भोजपरिष्कृत

गभीरमहाह्रदम्, कुत्रचिद्वल्लीमुखकरकम्पितमहीरुहशाखानिपतित पर्णैश्चिरसमावासकुपितसुप्तसमुत्थितशार्दूलघाव्यमानशबरजनसरभसारूढाभ्रंलिहानोकहचयम्, क्वचित्तरुमूलसुखसुप्तानि तमालस्तोमनिभानि भल्लुककुलानि, क्वचित्तपनकिरणसंतप्तवशां पद्माकरसमीपमानीय निजकरनिर्मूलितबालमृणालवलयं तदङ्के निक्षिप्य पयोजरज सुगन्धिशीतलजलशीकरनिकरांस्तन्मुखे संसिच्य शुण्डादण्डविधृतविशालपद्मपत्रमातपत्रीकुर्वन्तं वशावल्लभम्, कुत्रचित्सावज्ञं लोचनयुगलं क्षणमुन्मील्य पुनः सुषुप्सुं पञ्चवदनसञ्चयम्, सविस्मयमवलोकमानाः, क्वचन तापसजनसंकुले प्रदेशे प्रविशमानाः, क्रमेण किंचित्तरुमूलमावसन्तीं पुण्यमातरं पश्यामः स्म ।

यस्या मूर्तिर्मलिनवसनावेष्टिता क्षामभूता
चन्द्रस्यैका कृशतमकला ध्वान्तरुद्धेव भाति ।
वक्त्रं शुष्यत्सरसिजनिभं शोकदीना च वाणी
चिन्तादीर्घश्वसितमनिशं मूर्ध्नि बद्धा जटा च ॥४०॥

तया मात्रा दृष्टमात्रेण कुत्रत्या इति पृष्टा एवमुत्तरं वक्तुमुपक्रम्य,

"कश्चिज्जीवकविख्यातो विपश्चिद्वृन्दशेखरः ।
अभाद्राजपुरे सोऽयमस्माकं जीवनौषधम् ॥ ४१ ॥

अहं खलु राजश्रेष्ठिनः सुभद्रायां जातः पद्मास्यः, अयं सत्यंधरमहाराजसचिवात्सागरदत्तायां जातः श्रीदत्तः, अयं पुनरचलात्तिलोत्तमायां जातो बुद्धिषेणः, एष किल विजयदत्तात्पृथ्वीमत्यां जातो देवदत्तः, इमौ पुनर्जीवन्धरानुजस्य नन्दाढ्यायानुजौ नपुलविपुलौ, इत्यादिक्रमेण सर्वेषां नामधेयान्यभिधाय,

तदुत्पत्तिदिने जाता वयं सर्वे महात्मना ।

तेन सार्धं विशांपत्या पोषिताश्च निजालये ॥ ४२ ॥
तदनु सकलविद्याः शीलयन्व्याधयूथं
पशुगणविनिवृत्त्यै चापपाणिर्व्यनेष्ट ।
तदनु खचरकन्यां प्राप्य गन्धर्वदत्तां
परिषदवरवीणाविद्यया कीर्तिमाप ॥ ४३ ॥

ततश्च वासन्तिकेषु वासरेषु वनविहारान्निवर्तमानेषु पौरेषु, दुरन्तमदद्विरदस्य काष्ठाङ्गारपट्टदन्तावलस्य मदभङ्गं विधाय गुणमालां परिपालयन्नचिरेणैव तां परिणिन्ये । तमेनं कोपवशतः काष्ठाङ्गारः खलाग्रणीः ।
हन्तुं,
इत्यर्धोक्ते, तत्क्षणं हा दावपावकदग्धायां वनवल्लयां कुठारमर्पयन्ति भवन्तः, इति दम्भोलिनिहता भुजगीव मूर्च्छोन्मीलितचेतना भुवि पेतुषी सा माता क्रमेण कथंचिल्लब्धसंज्ञा,
व्यवसितः सोऽयं निजभूम्नैव रक्षितः ॥ ४४ ॥
इति निरवशेषमुक्तापि, शोकरणरणिकाक्रान्तचित्ता प्रलापमेवमातेने ।
हा हा हा बत हा हतास्मि किमिदं दुःश्राव्यमत्याहितं
हा पुत्र क्व गतोऽसि हा हतविधे क्रूरोऽसि मत्पुत्रके ।
हा नाथ त्वमुदारपुण्यचरितो यस्मादिमां दुर्दशा-
मज्ञात्वा सुरलोकसौख्यलहरीं विन्दंश्चिरं मोदसे ॥ ४५ ॥

हा पुत्र, हा कुरुवंशमित्र, सुलक्षणगात्र, हा पयोजविशालनेत्र, एतावन्तं कालं तव मुखचन्द्रदर्शनमपि दुर्लभमभून्मम मन्दभाग्यायाः । अपि च ।

पत्युर्वियोगमधिकं दववह्निकल्पं
वासं च कानननले स्वपुरं विहाय ।

यस्योदयादनुभवाम्यय जीवितं च
सोऽयं यदीदृशकथः कथमद्य वर्ते ॥ ४६ ॥
सत्यंधरस्तव पिता खलशेखरेण
व्यापादितो युधि दृतघ्नवरेण येन ।
तेनैव पुत्र गमितस्त्रिदिवं यदि त्वं
हा हन्त सैष कुरुवंशलताकुठारः ॥ ४७ ॥
पत्युर्वियोगो विपिने निवासो राज्यं च नष्टं तनयस्य शोकः ।
तदद्य दौर्भाग्यहुताशनो मे विनिर्दहेदेव करालवह्निम् ॥ ४८ ॥
स्वप्नो निष्फलतां गतस्त्वयि सुते व्यर्थं वपुर्लक्षणं
सत्यार्थं न बभूव पुण्यवपुषस्तद्देवताया वचः ।
हा मातृव्यसनाम्बुधेर्हि सुतरो नैव त्वया पुत्रक
त्वं यद्येवमवेहि मामपि भवच्छोकं प्रति प्रस्थिताम् ॥ ४९ ॥

इत्यादिप्रलापवशेन शोकलहरीं देवोदन्तं चाम्भोदावलिमिव दम्भोलिमुत्तं च मुञ्चन्तीं पुण्यमातरं बहुधा समाश्वास्य, तन्मुखादुत्पन्नां देवोन्नतिं नभसो निपतितां रत्नवृष्टिमिव बहुमन्यमाना वयं, पुनः पुनस्तामाश्वास्याऽच्छच्च च श्रीमत्सन्निधिमुपागताः, इति" ।

जीवन्मृतां तां जननीं विदित्वा जीवंधरोऽखिद्यत रक्तचित्तः ।
मातुर्गुरुस्नेहवशेन सोऽयं द्रष्टुं क्षणात्तामिह तत्वरे च ॥ ५० ॥

तदनु कुरुकुमुदिनीकान्तस्तत्क्षणमेव सकलबन्धून्विशेषतो भार्यामाऽच्छच्यानुनीय च, अनुगमनकलितकुतुकनृपतनयतिचयं क्रमेण विसृज्य, सहचरमण्डलमण्डितो दण्डकारण्यमानगाम ।

क्षामक्षामतनुं विवर्णवदनां निःश्वासधूमोत्करै-
श्चिन्तादन्तुरितान्तरामविरलैर्बाष्पैर्मिलल्लोचनाम् ।

ताम्बूलादिविहीनविस्तृतमलप्रोतद्विजालिं जटा-
वल्लीवेष्टितमस्तकां कुरुपतिर्देवीं लुलोके धुरि ॥ ९१ ॥
सा पुत्रमालोक्य पयःप्रवाहिघनस्तनी बाष्पनिरुद्धनेत्रा ।
शुशोच तं चेतसि रुग्मणीव प्रसूनबाणं चिरकालदृष्टम् ॥ ९२ ॥
पदाम्बुजाते प्रणतं कुमारमाशीर्भिराकीर्य तदा भुजाभ्याम् ।
आश्लिष्टवत्याः प्रबभूव तस्या आदेशवच्छोकपदे प्रमोदः ॥९३॥

तावद्यशाप्यक्षोऽपि, तयोः समक्षमागत्य, स्नानसुगन्धिलेपन-प्रसूनमालिकामणिभूषणदुकूलवसनादिभिः संपूज्य, प्राज्यतमस्नेहेन कुमारप्रमुखान्देवीं च तैस्तैर्मधुरालापैः समाश्वास्य, भासास्यमानेन विमानेन क्रमेण निजास्पदमाससाद ।

अगण्यपुण्यं तनयं वरेण्यमवाप्य मातानवशीलपूता ।
पितुः पदं ते किमु वत्सरान्ते भवेन्निपतेन रिपोः कृतेन ॥९४॥
प्रसूगिरमिमां श्रुत्वा प्रसूतेष्वुकौतुकः ।
एवमुत्तरमादत्त भावं तस्या विदन्नसौ ॥ ९५ ॥
कुम्भीन्द्रशैलविगलद्घनदानधारा-
सिक्तेरगणि चलसङ्गसमावृतानि ।
कूनद्रथाङ्गकलितानि शराञ्चितानि
सेनावनानि मम चाणदवा दहन्ति ॥ ९६ ॥
मदीयकरकुण्डलीकृतशरासनाकृष्टता
प्रचण्डभुजगावली रिपुमहीशवामभ्रुवाम् ।
दृगस्रिलपयोझरीं सुरभिलां निपीय क्षणा-
द्दधाति हृदयान्तरे प्रसुतशोकरक्षाहलम् ॥ ९७ ॥

भवया ।
स्नोऽन्यरान्नपिते रिपूणां यक्षाङ्कोटीकरणप्रवीणे ।

संयन्निशीथे सति मे कृपाणी शत्रुश्रियं नेतुमुदारदूती ॥ ९८ ॥

गुणाकरे रणाजिरे मयि स्वनच्छरासने
पलायितो बलाधिपो निराकृतो धरापतिः ।
स गूर्जरोऽपि जर्जरो भयाकरश्च खेचरो
धृतव्रणश्च कोङ्कणः क्षणे क्षणे भविष्यति ॥ ९९ ॥

इत्यादितनयवचनेन हस्तस्थमिव राज्यं मन्यमानाया जनन्या रक्षणाय कंचन परिवारं तद्योग्यवस्तुसंचयं च तत्संनिधाववस्थाप्य, कंचन कालं वीतशोकया भवत्यात्त स्थीयताम्, कतिपयैरेव दिवसैस्त्वामानेतुं नन्दाढ्यं प्रहेष्यामि, इति प्रसवित्रीमाश्वास्याऽऽरुह्य च, वयस्यमण्डलैः सह प्रस्थाय राजपुरोपवनमाजगाम ।

मित्राणि तत्र विनिवेश्य सवैश्यवेष-
मादाय राजनगरीं प्रविवेश धीरः ।
रथ्यासु तत्र विचरन्नवरत्नराशि-
संपूरितां प्रविततां विपणिं जगाहे ॥ ९० ॥

तत्र हर्म्याङ्गणे सखीभिः सह कन्दुकविहारमनुभवन्त्याः कस्याश्चिल्लोलाक्ष्या हेलावशेन भुवि पातितं कन्दुकमालक्ष्याश्चर्यविलक्षः कुरुहर्यक्षः प्रासादाग्रावलम्बिनीं नितम्बिनीमुन्नमितवदनो विलोकयामास ।

तां कोमलाङ्गीं कुतुकेन पश्यन्कुरङ्गनेत्रीं कुरुवंशकेतुः ।
उन्मीलदाभां नवयौवनेन पुन्नागसङ्काशकुचामुवाच ॥ ९१ ॥

एवं तस्याः सौन्दर्यलहरीनिमग्नमानसः कुरुवंसः कन्दुकमालोक्यैवमुवाच ।

भाले क्रीडति नीलकुन्तलचये गण्डस्थले कुण्डले
वेण्यां पृष्ठतले स्तनद्वयमुखे हारे चकोरीदृशः ।

मूर्तां मनोज्ञतिमिव स्फुटदिव्यरूपां
मायामिवाम्बुजशरस्य चकोरनेत्रीम् ।
उन्मीलदुज्ज्वलघनस्तनशोभिताङ्गीं
रागादिमामनुबभूव कुरुप्रवीरः ॥ ६८ ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे
विमललम्भो नामाष्टमो लम्बः ॥

नवमो लम्बः ।

ततो लताङ्गीमनुनीय रागां हित्वा स मित्रैः समगच्छतायम् ।
शशीव पाकारिदिशावधूटीं नक्षत्रवृन्दैः कमनीयरूपः ॥ १ ॥
वरचिह्नमेनमवलोक्य बान्धवा मणिभूषणाञ्चिततनुं कुरूद्वहम् ।
बहुमेनिरे मधुमिवाङ्कुरस्फुरत्स्फुटचूतपल्लवकुलं वनस्थिताः ॥ २ ॥
तत्र कोऽपि सहसाब्रवीदिदं बुद्धिवैभवविदितो विदूषकः ।
सप्रहासमतिविस्तृतेक्षणं [illegible] कुरूद्वहम् ॥ ३ ॥

नूपुरवमुखरितदिगन्तराः सत्वरगमनवशेन वल्गत्कुचकलशसंताड्यमानव्यालोलमुक्ताहाररुचिवीचिप्रकाशितमदनभागाः परिचलितकनकनिचयरुचिरसुममालिकानिपण्णोद्दीनमिलिन्दमञ्जुझङ्कारवाचालाः कूजत्काञ्चीकलापाः सुरमञ्जरीसमक्षमेत्य सगद्गदमेवमवादिषुः ।

वृद्धद्विजः कश्चिदपूर्वदृष्टो रुद्धोऽपि गेहान्तरमाविवेश ।
इतीयमालीवचनं निशम्य तं द्रष्टुमागात्कुतुकेन नुन्ना ॥ १० ॥
द्विजातिवृद्धं पुरतो निषण्णं बुभुक्षितं वीक्ष्य सरोरुहाक्षी ।
समादिदेशाथ सखीसमाजं तद्भोजनाय प्रचुरादरेण ॥ ११ ॥

तदनु यथाविधि सहर्षं भुक्तवन्तं सखीजनैरन्तिकमानीतं तमेनमग्रासनमधिरोप्य, 'कुतो भवानागतः पुनः कुत्र गमिष्यसि' इति, सा सुरमञ्जरी मञ्जुलवचनचातुरीविजितपिकस्वरमाधुरी सकौतुकं पप्रच्छ ।

इति गिरं समवेत्य कथंचन स्थविर एवमुवाच शनैः शनैः ।
सुरुचिराधरि पृष्ठत आगतः पुरत एव गमिष्यति मानिनि ॥१२॥

इति वचनं निशम्य, विशालतरहासविशदवदनान्पार्श्ववर्तिजनानवलोक्य, द्विजातिवृद्धः 'किमिति मामकीनवार्धक्यजनितविपरीततां हसन्ति भवत्यः, क्रमेण भवतीनामप्येषा भविष्यति' इत्यवादीत् ।

पुनः पप्रच्छ मोदेन क्व गन्तव्यं त्वयेति सा ।
यत्र कन्यापरिप्राप्तिस्तत्रेत्ययमभाषत ॥ १३ ॥
वयसा वपुषा च वृद्ध एषो मनसा नेति गिरापि मेदुरा ।
खयमभ्यवहृत्य सा कुमारी पुनरागत्य बभाण सादरम् ॥१४॥
इदानीं भवतो यत्र वाञ्छावल्लयधिरोहति ।
तत्राशु गम्यतां भद्र द्विजवर्य महामते ॥ १५ ॥

इति तस्या मन्दस्मितचन्द्रिकामेदुरवदनचन्दिरमुधासारायमाणवचोधारां 'साधु साधु, सुष्ठूक्तम्' इति प्रशंसमानः, करेण यष्टि-

मालम्ब्य कृच्छ्रादुत्थाय प्रस्खलन्, तदीयविकचविचकिलकुसुमकुलसुरभिलहंसतूलशयनाधिरोहाय प्रयतमानः, तत्र हस्तावलम्बनव्याज तन्निवारणपरं चेटीनिकरं निवारयन्त्या सुरमञ्जर्या सहर्षमनुमतः, स द्विजवृद्धः क्रमेण सुष्वाप ।

वृद्धं तं तरुणीविलासरसिकं वीक्ष्येव भासां पति-
र्वृद्धः सन्वरमक्षमाधरगुहाकेलीगृहं प्राविशत् ।
वारुण्याः किलसंगमाय रसिकः स्फाराङ्गरागाञ्चितः
कंदर्पोऽपि शरासनं करतले चक्रे दृषत्केः सह ॥१६॥

तदनु सकलजननादृष्टिरोधकरे तिमिरनिकरे विजृम्भिते, तमालन्ति सकलतरवः, पिकजालन्ति विहंगमाः, नीलाचलन्ति भूमिधराः, भल्लूकन्ति निखिलवनमृगाः, कालिन्दीमनुकुर्वन्ति निम्नगाः, इति लोकस्य विभ्रमो बभूव ।

ततः पूर्वाचलप्रान्ते बभौ कुमुदबान्धवः ।
ध्वान्तसिन्धुरसंक्षोभमृगेन्द्रः कुन्दनिर्मलः ॥ १७ ॥
ततो वृद्धः सोऽयं भुवनमहितां गानपदवी-
मतानीत्सानन्दं मधुररसनिष्यन्दभरिताम् ।
खगेशः (?) कन्यायाः परिणयकलंकालकलितां
निशम्यायं जीवंधर इति शशङ्के सुनयना ॥ १८ ॥

तदनु सा सुरमञ्जरी सहर्षमुत्थाय, अकूजत्काञ्चीकलापमगुञ्जन्मञ्जीरमचलितकरवलयं सखीजनान्पुरोधाय मन्दं मन्दं तदीयशयनोपकण्ठमासाद्य, प्रवयसः पुरतो वयस्यासनं विधाय, स्वयमपि पश्चाद्भागमलंकुर्वन्ती, मालतीलतानां दृष्टतो रत्नवल्लीव विराजमाना, चकोरनयना भुवनमोहनं गानं शुश्राव ।

तावत्समाप्य चतुरः कलगानलीलां
द्राक्सामगीतमुदयुङ्क्त स मञ्जु गातुम् ।
श्रुत्वा कुरङ्गनयनाः कुतुकेन पूर्वं
गीतं पठेति परितः परिवव्रुरेनम् ॥ १९ ॥
कुमारीं मम तोषाय भवत्यः कल्पयन्ति चेत् ।
गायते मधुरं गानमिति वाचमुवाच सः ॥ २० ॥

तदनन्तरं तद्वचनं निशम्य हसन्तीषु सकलासु वामनयनासु यथायथं निवृत्य निद्रामुद्रां दधानासु, सा सुरमञ्जरी जीवंधरस्मरणजनितसंतापेनाक्रान्ततनुलता क्रमेण पल्लवशयनमधिशिश्ये ।

तदनु पूर्णिमे पूर्वधराधरे विलसति मञ्जुरारुणमण्डले ।
द्विजवरस्य समीपमुपागता मधुरवागवदत्सुरमञ्जरी ॥ २१ ॥
शास्त्रेषु केषु भवतः कुशलत्वमार्य
संगीतशास्त्रवदमन्दगुणाम्बुराशे ।
गाने मनोज्ञमधुरे भवतः समानो
लोकत्रये न हि विना खलु जीवकेन ॥ २२ ॥

इति तस्या अनुयोगं द्विजवृद्धोऽप्येवमुत्तरयामास—

मज्ञासिर्मम सर्वशास्त्रनिकषपाषाणोल्लीढधाराधरो
दृष्यद्वादिमदाङ्कुरं न सहते नैर्मल्यनर्मालयः ।
किंचास्माभिरदृष्टपूर्वमिह यच्छास्त्रं तदेतज्जग-
त्याकाशाम्बुनतुल्यमञ्जुवदने विम्बानुविम्बाधरि ॥२३॥

इति तद्वाणीं निशम्य कौतुककोरकितान्तरङ्गा सा सुरमञ्जरी, 'निखिलनयनोत्पलानन्दसन्दायकमुखचन्दिरो जीवंधरः पूर्वं वैरेण सह मदीयमानसमपहृत्य निर्गतः क्वापि न ज्ञायते, तत्प्राप्तिर्मम कथं भविष्यति' इति इच्छामकरोत् ।

इति वाचमसौ श्रुत्वा क्षणं तूष्णीमवस्थितः ।
द्विजातिवृद्धो मधुरमुवाच वदतां वरः ॥ २४ ॥

अपि पयोजनयने, बाह्योद्यानविराजमानस्य कामदेवस्य पूजया प्रसन्नस्य कृपाकटाक्षैः साक्षात्कृतो जीवंधरस्तव मनोरथलतामङ्कुरयिष्यति ।

विचिकित्सा विशालाक्षि नात्र कार्या निरङ्कुशा ।
कामकोष्ठस्य गमने त्वरैव तनुमध्यमे ॥ २५ ॥
तदनु हृदि विदित्वा कामितार्थं करस्थं
कमलविमलनेत्री संगता सा सखीभिः ।
सपदि मधुरशिञ्जन्मञ्जुमञ्जीरपादा
मणिमयमधिरूढा यान्ययानं प्रतस्थे ॥ २६ ॥

ततश्च चकितसारङ्गविलोचना सा सुरमञ्जरी द्विजवृद्धं पुरोधाय कामालयमेत्य वामालकाभिरालीभिः समानीतसुरभिकुसुमादिभिस्तत्पूजां निर्वर्तयामास ।

रहसि कुसुमबाणं प्रार्थयामास तन्वी
मुकुलितकरपद्मा त्वं तथा कल्पयेति ।
मलयजरसलिप्ते मौक्तिकारंकारहारे
मदुरसि कुचभागे जीवकोऽसौ यथा स्यात् ॥२७॥

इति प्रार्थनामनुसरन्ती कचिदन्तर्हितस्य बुद्धिषेणस्य 'लब्धो वरः' इति वाणीमेणाक्षी कामदेवस्य कृपासारविलसितवचोधारां मत्वा, मनोदमेदुरमानसा, किंनिष्कंधरां विनिवृत्य, पुरतो विराजमानम्, बहिरागतमिव साक्षात्कामदेवम्, जङ्गममिव कनकगिरिशृङ्गम्, सञ्चरन्तमिव नयनानन्दम्, साङ्गमिव शृङ्गाररसम्, साकारमिवाद्भुतरसप्रकारम्, सरूपधेयानिः निजभागधेयम्, लक्ष्मीविश्रा-

न्त्यर्थमाकलितहेमशिलातलायमानललाटफलकम्, विशालविवृद्धिरोधाय बद्धसेतुवदायतनासावंशम्, श्रुताङ्गालीलाडोलायमानमणिकुण्डलमण्डितश्रवणयुगलं लक्ष्मीविहारधारागृहशङ्कावदान्यमुक्ताहारकान्तिस्वच्छनलशोभितवक्षःस्थलं रम्भातरुसंभावनासंपादकसुवृत्तोरुयुगलं कोकनदमदहरपदपल्लवं कुरुवीरं विलोकयामास ।

तन्वां रोमाञ्चकम्पौ नयनकमलयोः संमदाश्रुप्रवाहं
वक्त्रेन्दौ मन्दहासं घनजघनतटे घर्मतोयप्रचारम् ।
चित्ते ह्रीभीतिमोदाद्भुतरसमयतां मारसंतापभङ्गे
सेयं सारङ्गनेत्री कुरुकलभमिमं वीक्ष्य तूर्णं बभार ॥२८॥

तदनु पार्श्वतो वृद्धमसमीक्ष्य निरर्गलव्रीलतरलनयनां नमितवदनां जीवंधरस्तत्क्षणमालिङ्ग्य, कपोले परिचुम्ब्य, निजाङ्कमारोप्य, चाटुवचनपरिपाटीभिश्चूर्णवासादिकथाभिश्च प्रीतेः परां काष्ठां प्रापयामास ।

विकचकुसुमतल्पे वृद्धरूपः शयानः
कुरु पदयुगलीसंवाहमित्यब्रवीत्ताम् ।
हृदि विलसितरागां तां तथा कुर्वतीं द्राक्
सहचरकुलमेतं वीक्ष्य तुष्टाव हृष्टम् ॥ २९ ॥

ततश्चतुरन्तयानमारुह्य सखीभिः सह निजमन्दिरान्तरं प्रविष्टायां सुरमञ्जर्यां वयस्याजनमुखविदितवृत्तान्तौ मातापितरौ सुमतिकुबेरदत्तनामधेयौ तत्क्षणकन्दलितानन्दमन्थरौ विवाहमङ्गलं विस्तारयितुमारभेताम् ।

ततः कुबेरदत्तेन मुहूर्ते शुभसंगते ।
विश्राणितां वरश्रोणीं करे जग्राह कौरवः ॥ ३० ॥

बालां शम्बरशत्रुशास्त्रपदवीशालां रसाम्भोनिधे-
र्वेलां श्लाघ्यतमोज्झसद्गुणमणीशीलां मरालीगतिम् ।
नीलाम्भोरुहलोचनां शशिलसत्फालां सुमुक्तावली-
मालां तां रमयन्नयं स्मितसुधालीलापदं प्राप सः ॥३१॥

इति, महाकविहरिचन्द्रविरचिते श्रीमति चम्पुनीवंधरे
सुरमञ्जरीलम्भो नाम नवमो लम्बः ।

दशमो लम्बः ।

ततः कुरुकुमारः सुरमञ्जरीवदनात्कथंचिदुद्भवितानुमतिः, तत्स-दनान्निर्गत्य सकलसहचरनिकरपरिमेदुरपार्श्वभागः, स्वकीयनिकाय्य-मासाद्य, पित्रोर्नेत्राणि पीयूषाञ्जनैरिव रञ्जयामास ।

नतं पादाम्भोजे नयनसुभगं वीक्ष्य तनुजं
परिष्वज्य प्रेम्णा शिरसि पुनराघ्राय च मुहुः ।
दृशा पायं पायं तनयवदनाम्भोरुहसुधां
श्रवोभ्यां वाभ्यां सुखमितमतेनतुरिमौ ॥ १ ॥
वानामभूमिं मुदमाससाद गन्धर्वदत्ता तमिमं समीक्ष्य ।
उपागतं गेहमुदारसत्त्वमुवाच चैवं कमलायताक्षी ॥ २ ॥

आर्यपुत्र, सा खलु गुणमाला भवदीयविरहाशुशुक्षणिकाशित-तनुलता, क्षणे क्षणे ताम्यति मुह्यति मूर्च्छति च; अतस्ताम-म्भोरुहाक्षीं प्रथमतः संभाव्यात्रागन्तुमर्हसीति ।

विवेश गुणमालायास्ततो गेहं कुरूद्वहः ।
एकान्ते तां विलोक्यापमालिलिङ्ग च संगतः ॥ ३ ॥

आर्यपुत्रे मन्त्रित खल्वेतावद्दुःखमनुभूतवानस्यतो मन्दभाग्या मा गा सस्पृशेति सविषादमुक्तो जीवधर, तरुणि तरुणारुणकिरण विकसदम्बुजवदने भवदीयपूर्वकृतसुकृतप्रभावेनवैतादृश सवृत्तोऽन्य था पुनर्बहुतरदुःखमनुभवेयमिति ता समाश्वास्य, क्रमेण गन्धर्वदत्तानिलय निजालय चागत्य, तत्र मन्त्रविदामग्रणीर्गन्धोत्कटेन साक मन्त्रयित्वा, वयस्यवलयविलसितपार्श्वभागो मनोजवगन्धर्वबन्धनेन स्यन्दनेन कामनीयकसीमाकोश विदेहदेशमाशिश्रियत् ।

धरणीतिलकाख्यया प्रतीता नगरीं तत्र जगाम कौरव ।
अधितिष्ठति या स्वमातुल स पति गोविन्दमहीपचन्द्रमा ॥ ४ ॥

तावद्विदितोदन्तेन गोविन्दमहीकान्तेन प्रशासितपुरुषपरिष्कृतासु विकीर्णविकचविमलकुसुमकुलसौगन्ध्यसमाकृतपुन्नागयशङ्कारमेदुरविविधवाद्यरवमुखरासु दिदृक्षापरवशपौरजनसमर्दनिवारणपरराजचरकरचपलकनकवेत्रलताकान्तिबालातपशीलासु हर्म्याग्रनिबद्धपताकापटवितानछन्नचामरादिभिर्निवारितदिनकरकरनालासु प्रतोलीषु स क्रीडद्भि शताङ्गै प्रविशमाना वेलातीतविलोकनकुतूहलचन्द्रशालासमिलितलोलाक्षीजनकटाक्षखेलाकलितनीलोत्पलमालामादधानास्ते जीवधरपुरःसरा कुमारा क्रमेण राजमन्दिरमाविविशु । तत्र च ।

गोविन्दभूपतिरिम कुरुवशकेतु
मालिङ्ग्य मोदविवश स्फुटरोमहर्षं ।
आपृच्छ्य सौख्यमखिलश्च यथोचित ता
न्समान्य साधु विदधे विविधोपचारान् ॥ ५ ॥

अथ सचिवकुलेन जीवधरेण च सहितो गोविन्दमहीपति कुरुवीर पञ्चाननचञ्चदासने काष्ठाङ्गार च मृत्युवदने कदनेन निधत्सु मन्त्रशालामधिष्ठितो मितजनपरिवृतोऽपि रत्नभित्तिसक्रान्तप्रतिमाभि

रनेकपुरुषपरिवृत इव शोशुभ्यमानः समन्त्रयितुमारेभे ।

ततो विदितमेदिनीकमनभावकूलंकषा
नयाम्बुनिधिपारगा जगदुरञ्जसा मन्त्रिणः ।
महीश स हि वञ्चनाकलितचित्तवृत्तौ रिपुः
प्रतारयितुमद्य नो विनयपत्रिकां माहिणोत् ॥ ६ ॥

कदाचिन्मत्तदन्तावलः पाटितालानो निर्मूलितनिगलः संक्षुभितकटकः सकलभटघटादुरासदः सत्यंधरवसुंधरापतिमन्दिरोपकण्ठसञ्चारः, कोपाग्निर्गतं तमेनमस्मत्प्राणायमानं निहत्य, निखिलपौरलोकशोकपारावारे मामकीर्तिपूरे च निमज्जयामास ।

अयेन मयि विस्तृतां मिलदकीर्तिमेतां भवा-
न्प्रभाकर इवाम्बुनाकरवरे हिमानीं ततम् ।
विनाशयितुमर्हति क्षितिपते दयावारिधे
ततः पुरमुपागतो मम च मित्रतां लालय ॥ ७ ॥

इति शात्रवसंदेशमाकर्ण्य कन्दलितमन्दहासो गोविन्दमहीपतिर्नीरंध्रवदनारविन्दनर्तितनयनखञ्जनो बभूव ।

नृप मातुल निःशङ्कं मदुक्तोप्या निरङ्कुशः ।
इमं न सहते शत्रुं तत्कालस्तु प्रतीक्ष्यते ॥ ८ ॥

इति कुरुवीरवननचातुरीनिशमनधीरधीरमना धरापतिश्चतुरङ्गबलेन राजपुरीं प्रति गमनं तत्र निजनन्दिनीस्वयंवरततनं नानादेशनरपतिसमेतनमरातिनिधनं च निश्चित्य काटाङ्गरिगं संनाह्य सत्वं प्रत्यापन्नदिण्डिमं संताडयामास ।

सन्त्रस्तामिव सागरं निजबलं नराणां पति-
र्विन्यस्य स समादिशन्निखिलतः प्रयाणोद्यमम् ।

चकार च जिनेशिनः पदपयोजपूजां मुदा
बहूनि कुतुकान्वितः सपदि पात्रदानानि च ॥ ९ ॥
शुभे लग्ने धीरस्तदनु विचचाल क्षितिपती-
रथारूढो जीवंधरमुखकुमारैः परिवृतः ।
विदूरे सैन्येशाः प्रणतशिरसस्तं परिगताः
पुरस्तात्तत्सैन्यं मुकुलितधराभोगमगमत् ॥ १० ॥
तदा भेरीवोपैर्हयनिचयहेषापटुरवै-
रथानां चीत्कारैर्मदगजघटाबृंहितभरैः ।
जगत्सर्वं तूर्णं स्थगितमभवद्भास्कररथो
रथैरीर्ष्यावेशादिव स पिहितो रेणुनिकरैः ॥ ११ ॥

तदानीं धवलातपत्रडिण्डीरविचित्रा रङ्गत्तुरङ्गमतरङ्गसंगता मत्त-द्विपदृप्तयादःकुलकलिता विलोलासिलतामत्स्यव्रातपरिवृता तद्वाहिनी वाहिनीव प्रजवं निर्जगाम ।

चलति निखिले सैन्ये यद्रेणुपुञ्जमसृम्भत
प्रसृतमभितं व्योम्नि स्फारेभयूथमदाम्बुभिः ।
तदिदमगमच्छान्तिं शुण्डोद्गतैर्नलशीकरै-
र्हयमुखगलल्लालामालाजलैश्च समन्ततः ॥ १२ ॥

तदनु दुरासदमदाकुलतया ईषदामीलितलोचनैर्दण्डकोटिनिष-ण्णशुण्डादण्डैरुभयपार्श्वावलम्बितवर्णकम्बलतया गैरिकधातुसान्द्रा-न्गिरीन्द्रांस्तुलयद्भिः कर्णान्तावलम्बिकनकाङ्कुशतया कृतकर्णपूरैरिव जङ्गमैरिव कुलाचलैः संख्यातीतैर्दन्तावलैराक्रान्तसकलदिशावकाशम्, मुखभागकलितकनकखलिनैः संमुखागतमाकाशमापिबद्भिरिव चला-च्चञ्चोऽपुटैर्मुहुर्मुहुः कम्पितोदररन्ध्रेण परिपूरितभुवनोदरेण हेषारवेण वेगगर्वधूर्वहं गुरुत्मन्तं निर्भर्त्सयद्भिरिव सादिननकृतमवनिरोधक्रोध-

घुर्घुरायमाणघोणैः परिस्फुरत्प्रोथपुटेन पदे-पदे मुक्तफूत्कारेण जवनिपीतमनिलमिव नासिकानिकरेणोद्वमद्भिर्मूर्तिमद्भिरिव रंहःसमूहैर्गन्धर्वैर्वन्धुरम्, अतिदूरोन्नतपताकापटतिरोहितरविरथैः सैन्यसागरावर्तायमानैः संदानितघण्टानगवणात्कारमुखरैश्चक्षुष्णक्षोणीतलैः स्यन्दनैः परिशोभितम्, भिण्डिपालमण्डलाग्रपट्टसपरश्वधद्रुघणप्रमुखायुधधारिणा पादातेन सनाथम्, मायूरातपत्रसहस्रान्धीकृताष्टदिक्सुखमनीकं पुरोधाय, कैश्चित्प्रयाणैर्गोविन्दराजः कंचन राजपुरीं निकषा निषसाद ।

तदनु विदितवार्तो मायया सौ कृतघ्नो
दधदिव बहु मूल्यं प्राहिणोत्प्राभृतानि ।
अयमपि नरपालो लाल्यंस्तानि सद्य-
स्तदतिशयितमेतत्प्रेषयामास तस्मै ॥ १३ ॥

ततः काष्ठाङ्गारेण निजबलशबलेनाभ्यागत्य बहुधा संमानितो गोविन्दमहीपतिः, राजराजपुरीनिकाशां राजपुरीं प्रविश्य, तत्र विविधरत्नमयविचित्रस्वयंवरशालां परिकल्प्य, वराहध्वजशोभितचन्द्रकयन्त्रभेदं कन्याशुल्कतया सकलदेशेषु घोषयामास ।

परःसहस्रं प्रथिता महीपाः प्रापुस्तदा तां नगरीं गरिष्ठाम् ।
भेरीरवाचोलसनस्तलोकाः सेनारजोभिः पिहितप्रभागाः ॥ १४ ॥
स्वर्गेसदस्तूह तत्र महीशाः सानुरागिनः ।
मञ्चेषु मिलिता मेरुशृङ्गेष्विव सुरेश्वराः ॥ १५ ॥

तत्र मञ्चनिवद्धसंभ्रमप्रत्यभिज्ञानमहिमानं युवानमस्मदिन्दौ शशिकलेव प्रदोषे शचीदेवीव पुरंदरमलंकरिष्यतीति गोविन्दराजेन कारितमार्गा निशम्याहमहमिकया चलितेन, वक्षःस्थलनिर्मितपाटीपट्टबन्धनकुट्टमस्थानकरजःपुञ्जविच्छुरितदर्शनेन, आ-

क्षेपडोलायमानमुक्ताकलापेन चलितनवमालिकोड्डीनभृङ्गसङ्गसंस्तूयमानयशोविभवेन, अर्धावलम्बितकर्णपूरचुम्ब्यमानगण्डस्थलेन रानकेन स्वयंवरमण्डपं स्वयमुच्चलितमिवाभवत् ।

वराहयन्त्रमभितो धराधीशाश्चकाशिरे ।
कुलाद्रि परितः कीर्णाः शिलाखण्डलवा इव ॥ १६ ॥

ततश्च मगधाधिपे विदितशक्तिलोपे भृशं
कलिङ्गनरनायके विषयमस्टशत्सायके ।
नृपे च विनतापुरो निहितलक्ष्यधूलीहरे
शरव्यचलनोदरे प्रथितपौदनाधीश्वरे ॥ १७ ॥

अयोध्याभूपाले भुवि पतति धैर्येण विकले
तथावन्तीनाथे वितथभुजशौर्ये मितकथे ।
नृपेष्वन्येष्वेवं कुवलयदृशां हासविषये-
ष्वयं काष्ठाङ्गारः कुतुकवशाच्चित्तः सचलितः ॥ १८ ॥

तदनु काष्ठाङ्गारो दर्पदुर्ललिताकारः कलभनिभचारः, तद्यन्त्राधोभागभ्रमचक्रे पादं निधाय पारवश्येन भुवि पतितः, क्षितिपतिवलयस्य कमलाक्षीजनस्य च हास्यवदान्यो बभूव ।

कुमारेऽस्मिन्धीरे सहचरघटामध्यलसिते
यथा प्रोद्यत्तारागणपरिवृते शीतकिरणे ।
तदानीं गोविन्दक्षितिपतिरदादृष्टिमधिका-
मुदस्थात्सोऽप्येष स्मितविशदवक्त्रः कुरुवरः ॥ १९ ॥

तदनु सखेलं भुवि पदानि निदधानं जयलक्ष्मीनिबन्धननिगल. कटकशङ्कावहमरकताङ्गदशोभितं सञ्चरणसञ्चलन्मुक्तादामत्रयाभास्यमा. नवक्षःस्थले जीवंधरमवलोक्य तत्रत्या एवमेवं विदामासुः ।

कुमारं भूपालाः कतिचन विदुर्भूपतिलकं
परे मत्यौंकारस्यागितममरं संजगदिरे ।
सदेहं कंदर्पं कुवलयदृशोऽवादिपुरमुं
तथा काष्ठाङ्गारप्रमुखमहिता मृत्युमविदन् ॥ २० ॥

एवं सर्वैर्विलोक्यमानो जीवंधरो यन्त्रसमीपमासाद्य विद्युन्मण्डलसुधाकरश्चन्द्रकलानुकारिदंष्ट्राविराजितवराहयन्त्रं चिरं विलोकमानस्तच्छेदनावसरमीक्षमाणः क्षणादधिचक्रमुत्प्लुत्य सज्जीकृतधनुष्टङ्कारकम्पितवसुधातलस्तद्यन्त्रं महीभुजां दर्पं मानिनां खेदं गोविन्दपार्थिवस्य शङ्कां च युगपच्चापसमारोपितरोषेण विव्याध ।

आनन्दोद्रिक्तहृदयो गोविन्दमहिपस्तदा ।
राज्ञां धुरि जगादोच्चैः प्राज्ञानामग्रणीरिदम् ॥ २१ ॥
धीरो वारिधिमेखलां वसुमतीं प्राक्पालयामास यः
तस्य श्लाघ्यगुणस्य मान्ययशसः सत्यंधरस्यात्मजः ।
एष द्वेषिमहीपदावदहनः प्रख्यातदोर्विक्रमः
श्रीमान्मे भगिनीसुतो विजयते वीरश्रिया वल्लभः ॥२२॥
वसुधाधिपा धनुषि पाटवात्तथा
वपुषि स्फुरद्विशदलक्षणात्क्षणात् ।
क्षितिपालसूनुरयमित्यधारमर-
न्नवलोक्य तं ललितमभ्यनन्दिषुः ॥ २३ ॥

एवंविधगोविन्दनरपतिवचनेनाशनिनिर्गर्जनेन भुजग इव भीतमानसविकारः काष्ठाङ्गारो मनसि चिन्तामेवं तरङ्गयामास ।

सत्यंधरस्य सूनुश्चेदयं हन्त हता वयम् ।
नागरूका भवन्त्यस्मिन्वीर्यशौर्यपराक्रमाः ॥ २४ ॥

पुरासदीयामाज्ञां मालामिव शिरसा समादधानो मधनो वणि-

त्पाशयेन कथमाचरेत् । अत सर्वे स्वार्थपरो लोक इति सत्य मेतत् । किं वास्य मातुल. समाहृत । धिक्त्वा मां मदपरिवृढ मात्मघाताय कृत्योत्थापनमाचरन्तम् । किं करिष्यति वा किंनामधेयराजमदोहेन गोविन्दमहीपालेन कृतमाहात्म्यकोऽय समीरपुरस्कृत इव समीरसख. ।

इति चिन्ता कुर्वाणः खेनिरर्गलविजृम्भितक्रोधेन तुमुलमभिकेन कन्यामाहर्तुमना मनागितस्ततश्चलन्मेदुरेण क्षुत्प्रसितीशनिकरेण साक समन्वयितु स दुर्मेधसामग्रणीर्निजनिवेशमाविवेश ।

पराशयविदा तत कुरुवरेण राज्ञा सह-
स्थितेन नयकोविदा सपदि सोपदा केचन ।
पितुर्विषयसगताद्वरपतीन्मति प्रेषिता.
स्तथा परिचितान्नृपान्विशदपत्रिकाभि सह ॥ २५ ॥
सत्यधरक्षितिपतेर्विजयामहिष्या
सञ्जात. एष खलु जीवकनामधेय ।
दैवात्तदा विरहित कुटिलाप्तधात्र्या
वैश्याधिपस्य समवर्धिषि मन्दिरेऽहम् ॥ २६ ॥

अय किल दुराचार काष्ठाङ्गार काष्ठाङ्गारादिविक्रयेण प्राण संधारण कुर्वाण क्रमेण युष्मदुर्वीपतिना मन्त्रिपदवीमारोपित स्तमेव निहतवानिति विदितमेव हि भवताम् ।

अतो मम यथा सोऽयमुच्छेद्यो भवतामपि ।
शत्रुत्वाद्धानघत्वाच्च कृतघ्नत्वाद्दुराशय ॥ २७ ॥
रसातले वा वसुधातले वा महीधरे वा विपिनान्तरे वा ।
तिरोहितश्चेदपि हन्यतेऽसौ तत समागच्छत वाहिनीभि ॥ २८ ॥
सदेशमेव कुरुकुञ्जरस्य सामन्तभूपा शिरसा दधाना ।

सत्यंधरे भक्तिवशेन नुन्नाः सेनासमेता मिलिता बभूवुः ॥ २९ ॥

तावन्नयविशालो नाम कुरुवीरदूतः, सचिववृद्धस्य नयपारगस्य धर्मदत्तस्य निकेतने प्रविश्य, तेन विदितोदन्तेन संधानाय नरेन्द्रमन्दिरं नीयमानः, तत्र परिमितैर्नरपालैः परिवृतम्, अनतिदूरावस्थितेन सविनयमवनमितपूर्वकायेन मथनेन सविस्रम्भमालपन्तम्, क्रोधकृशानुविस्फुरन्निश्वासधूमविवर्णमुक्ताहारं काष्ठाङ्गारमुपजगाम । तत्र धर्मदत्त एवं जगाद ।

जानाति देवः सकलं तथापि श्रोतव्यवाचः सचिवा नृपेण ।
नाकाधिराजोऽपि निरीक्ष्यकर्त्यो बृहस्पतेर्वाग्विसरं शृणोति ॥ ३० ॥

इदानीमुदारसत्त्वैर्गरुडवेगगोविन्दपल्लववल्लभमरुतिभिः खेचरतदितरमहीपालैर्नन्दाढ्यप्रमुखैर्महावीरैः सहचरैश्च परिवृतः कल्पान्तजलधिरिव निरर्गलप्रसरः सकलजगतीतलविख्यातवीरो जीवंधरकुमारः क्रुद्धो युद्धाय बद्धादरो वर्तते ।

व्याधान्दुःसाधबाधान्गजतुरगमुखैर्मद्धलेः संप्रवृत्ते-
र्हेलामात्रेण हत्वा निखिलपशुगणं मोचयामास यः प्राक् ।
वीणाशुल्के न दृप्यन्नरपतिनिचयं धावयामास संख्ये
सोऽयं नैकोऽपि जय्यः किमुत खगनराधीश्वरैः संगतश्चेत् ॥ ३१ ॥

अतः इदमनिदमयमनवृत्तं तदीयरानपदं तदुने समप्यं यथापुरं सचिवपदमधिष्ठातुमर्हति देव इति ।

एवं मन्त्रिगिरं निशम्य समयं तूष्णीं स्थितः सोऽवद-
त्कर्णौ लग्नमुखेन तत्र मथनेनादीपितक्रोधनः ।
रे रे केन मतागमं बहुतरं दृष्टोऽसि वक्तुं पुरो
भीरुस्त्वं यदि निर्वैरमनि मुधा जीवोऽसि किं भाषितैः ॥ ३२ ॥

माद्यद्दन्तिघटापटुस्फुटनटद्घोटप्रहृष्यद्भटा-
टोपाच्छादितदिक्तटे रणतले खड्गोल्लसद्धारया ।
आहृत्य श्रियमाहवोद्यतरिपुक्षोणीभृतामुज्ज्वलां
कीर्त्या कोमलया दिशो धवलयाम्युत्फुल्लकुन्दश्रिया ॥३३॥

किंच ।

आ जन्मतो न लिखितं भुवनाधिपत्यं
यद्भालसीमनि परं तु वणिक्क्रयेव ।
तेनाधमेन वणिजस्तनयेन किंवा
संधानमद्य नरपालमणीशिनां नः ॥ ३४ ॥

ध्वनिनीरुद्धपार्श्वस्य मथनस्य शरावलेः ।
विघसोऽजनि यः पूर्वं कवलीक्रियतेऽधुना ॥ ३५ ॥

इति दर्पदुर्ललितवचनविलसितमाकर्ण्य कोपारुणीकृतभालो नयविशालो गम्भीरमिमां गिरमुज्जगार ।

पुलिन्दवृन्देन गवां कुले हृते बलेन साकं मथने पलायिते ।
पिधाय वेगेन कवाटमन्ततो धृतो वधूभिस्तनुकम्पमत्यजः ॥३६॥

एवंविधपराक्रममण्डितभुजदण्डमण्डितस्य न युक्तमेव कौरवेण संधानम् ।

किं धर्मदलेन हि षण्डवृत्त्या प्रचण्डवृत्त्या भवतापि किंवा ।
कुरुप्रवीरस्य कराग्रनुन्नं राज्यश्रियं चक्रमलं प्रदातुम् ॥ ३७ ॥

इति निगद्य जवान्निर्गत्य यथावृत्तं कुरुवीरं विज्ञापयति नयविशाले विशालतरसमीकसंनाहः कुरुकुमारः पद्मास्यं वरूथिनीनामाधिपत्ये विधाय यथायोग्यं गरुडवेगगोविन्दलोकपालपल्लवमहीपालप्रभृतीनाहूय रणाङ्गणावतरणाय सेनामादिदेश ।

काष्ठाङ्गारोऽपि सेनायाः पतिं मथनमादिशत् ।

पत्तनायाः प्रयाणाय रणरङ्गस्थलं प्रति ॥ ३८ ॥

तदनु विकटकटविगलद्दानधाराप्रवाहानुभयतः सृजद्भिः सनिर्झरैरिव नीलाचलैर्विशददन्तप्रभादन्तुरिताङ्गतया, रजनिकरकरनिकरचुम्बितसंवर्तकालाम्बुदविडम्बकैः कर्णद्वयसंदानितधवलचामरशोभितया पद्मिनामसाम्येन समागतमरालशङ्कामङ्कुरयद्भिः, पादन्यासेन महीं कम्पयद्भिः घनाननवनगर्जितानुकारिबृंहितरवेण गिरिदरीसुखसुप्तपञ्चास्यान्कोपेनोत्थाप्य कुत्रत्योऽयं करिशब्द इति निरीक्षमाणान्कुर्वाणैर्वारणैः सञ्छादितदिग्भागाः, सूर्याश्वशिरस्ताडनायेवोर्ध्वप्रसारितपूर्वचरणयुगलैः प्रलयजलधरविमुक्तवर्षोपलासारपरुषेण जङ्घारयतेव वसुधातलमतिनिष्ठुरेण खरखुरपुटविन्यासेन जनितपांसुपारंपरीभिः सकलनगदन्धंकरणधुरीणैर्हेषितरवेण गगनतलं पूरयद्भिः प्रतिपक्षैरिव गरुत्मतः पर्यायैरिव मारुतस्य प्रत्यादेशैरिवोच्चैःश्रवसो निदर्शनैरिव मनसो मूर्तैरिव जवैर्गन्धर्वैरुपशोभिताः, सुरविमानसकाशैश्चक्षुष्कृष्णसोणीतलैर्मनोरथैरिवामितरथैः परिपूर्णाः, क्ष्वेलारवबधिरीकृतलोकैर्विविधायुधविचित्रैर्विधूततनुत्रैः पदातिभिः परिवृताः, उभयेऽपि सैनिकाः, क्रमेणाजिरङ्गणमगाहन्त । तत्र च,

अभ्रंलिहानां पटमन्दिराणां पङ्क्तिर्बभौ शारदमेघशुभ्रा ।
विचित्रयुद्धस्य विलोकनाय समागता राजपुरीव साक्षात् ॥३९॥

तदनु विनिर्मितविशालविशिखासहस्रविराजमानम्, मदमेदुरसिन्धुरघटान्धकारितदिङ्मुखतया जलधरदिवसायमानम्, अभ्रङ्कषैरपहसितरजताचलशोभैरमलसुधावदातैर्मन्थानगिरिमथ्यमानदुग्धासिन्धुगर्भविलुठत्तरङ्गायमानानिलडोलायितसितध्वजतया उपरिपरिपतदभ्रगङ्गाप्रवाहैरिव तुषारगिरिशिखरैः पटमन्दिरैर्विभ्राजितम्, नीलकवचावगुण्ठितदेहैः सितोष्णीषैरत्युन्नतवेत्रासनोपरिविष्टैर्धर्ममयैरिव धर्माधिकारिभि-

महापुरुषैस्तन्त्यमानसेनासंविभागसंविधानम्, स्फुरितनिशितकर-धृतकरवालनतिविम्बमरोहकरालितातपेनोर्ध्ववरुद्धमौलिकलापेन धवल-चन्दनलिप्तभुजदण्डेन सेवकजनेनाध्यासितद्वारदेशम्, विविध-वस्तुविचित्रितैः पण्याहरणसंमर्दनपरक्रयिकविक्रयिकलोकैर्महाविपणि-पथैरुपशोभितम्, यौवनमदमत्ततरुणजनानुसार्यमाणतरुणीजननिर-न्तरवेशवाटम्, विविधायुधसंस्कारपरैर्नवभ्राम्यमाणशाणचक्रभृति-संस्कारसाधनसंच्छादितं तद्रङ्गस्थलमशोभत ।

युद्धारम्भकेलीपिशुनजयमहावाद्यघोषैरशेषै-
र्हेषारावैर्हयानां मदमुदितकरिव्रातहितैर्नृम्भमाणैः ।
रथ्याध्वानैः पदातिप्रचुरतरगलत्सिंहनादैरमन्दैः
शब्दैकाम्भोधिमग्नं जगदिदमभवत्कम्पमानं समन्तात् ॥४०॥

रेणून्तरायं कुर्वाणा धूल्यो या व्योम्नि जृम्भिताः ।
तन्नाशाय ध्वजा मृत्युसंमार्जन्य इवारुचन् ॥ ४१ ॥

उद्यन्निस्साणराणप्रसरमथ सुरा जृम्भमाणं निशम्य
क्षीवक्षोणीपतीनां कदनविलसितं वीक्षितुं संप्रवृत्तम् ।
पुष्पाण्याहृत्य कल्पस्थितरुहवनतः सौरभाकृष्टभृङ्ग-
व्यूहव्यारावपूराण्यधिककुतुकतः संगता व्योमसीम्नि ॥४२॥

सेनापथ्योर्मिथः समुदितहासौ शनैः शनैः संघट्टितौ व्यभाताम् ।
कल्पावसाने खलु वर्धमानाम्भोनिधी गम्भीरमन्दवेगौ ॥ ४३ ॥

पदातिं पदातिस्तुरङ्गं तुरङ्गो गजेभं गजेभो रथस्थं रथस्थः ।
इयायः क्षणेन स्फुरद्भूरजो ध्वनज्जीवजातादनच्छिन्नजीवे ॥४४

दृप्यद्दन्तिकरोद्यता जलकणा व्योम्नि स्फुरत्तारका-
कोरा रेजुरभूच्च नाकसुदतीवक्त्रं निशानायकः ।

धूलीभि. पिहिते च चण्डकिरणे सग्रामलीला वभौ
निर्दोषापि विभावरीव सततं क्रीडद्रथाङ्गापि च ॥ ४५ ॥

यावन्नास्पति क्षणेन करिणो वक्रच्छदं विस्तृत
हस्त्यारोहवरः प्रतिद्विपगतो वीर. शरैस्तावता ।
शुण्डा तस्य मदं च लोपमनयत्कोपेन सोऽभ्युद्धतः
छिन्नेनैव करेण तं प्रतिभटं मूर्च्छास्पदं द्राग्व्यधात् ॥ ४६ ॥

भल्लैः प्रतिद्विरदमल्लधनुर्विमुक्तैः
कुम्भेषु मर्मशिखरेष्वेलसन्गजेन्द्राः ।
आरावहीनवदनैः शिखिना समूहै
राकृष्टतुङ्गशिखरा इव शैलवर्गाः ॥ ४७ ॥

इह खलु, कौक्षेयक, मत्तद्विपदन्तावलौ, कोपतरलौ, समीककला-कुशलौ परस्परदण्डसघट्टनजनितगम्भीरारावेण बृंहितमेदुरेण च गगन-तल पूरयन्तौ, गण्डतलविसृत्वरमदधारासौरभभ्रुरकर्णतालविगल-त्समीरेरानिरङ्गतले मूर्च्छितान्भटान्प्रबोधयन्तौ, मुग्धवालौ, सविध-नरघटितपदविन्यासेन, वसुंधरा रथपुटितामादधानौ, पूर्वपश्चिम-समीरसमीरितौ सजलजलदाविवापतन्तौ, सकलेक्षणजनतनूरुहसौख्य-शायनिक, भयानक, समीकमितनुतः ।

आयोधन विदधतोर्गजयो. कयोश्चि-
द्दन्तप्रघट्टननिताग्निकणाः स्फुरन्तः ।
हेमप्रदीपवलयावलिखण्डतुल्या
माश्रित्य चामरगताः सुभटैर्न दृष्टाः ॥ ४८ ॥

कश्चिद्भट. प्रतिभट चरणे गृहीत्वा
संभ्रामयन्दिवि रुषा परुषप्रचारः ।

चिक्षेप दूरतरमूर्ध्वमयं च मानी
द्रागेत्य कुम्भयुगलीमसिना विभेद ॥ ४९ ॥
इभोद्गतानां नवमौक्तिकानां वर्षेण संख्ये निरवग्रहेण ।
मुक्तामयत्वं दधती च रङ्गस्थली गदाब्धा बत संबभूव ॥५० ॥
निपात्य कंचिद्भुवि शुण्डयारिं दन्तेन हन्तुं करिणि प्रवृत्ते ।
दन्तान्तरालं प्रविशन्स धीराश्चिच्छेद शुण्डां करवालवल्ल्या ॥५१॥
चक्रेण कृत्तं निजमेव हस्तमग्रप्रदेशाद्धरणौ पतन्तम् ।
पिपेष पादेन रुषा परीतः करेणुराजः स्फुतरक्तपङ्कम् ॥ ५२ ॥
गृहीतो नागेन प्रतिभटवरः पुष्करगतो
वितन्वानो डोलामसिनिहितहस्तेन करिणा ।
पदा पेष्टुं नीतः सपदि पदमध्ये प्रचलितो
गृहीत्वा वालाग्रे व्यसुममुमधान्मुष्टिहतिभिः ॥ ५३ ॥

तत्र फुल्लकुन्दकुसुमावदाता जितवातरंहसो वाजिनो गगनतलोल्लिखिताग्रपादतया नभःस्थलमाक्रमितुमिव प्रवृत्ताः, पुरतः पतितानि महाशैलकुलानीव दन्तावलशरीराणि लङ्घयन्तः, संगरसागरे परस्परं कलहायमानाः कल्लोला इव विरेजिरे ।

खुराघातैः काश्चित्प्रनवनहयः कम्पितधरः
पदत्कैः कीर्णाङ्गोऽप्यविरहितशिक्षानुसरणः ।
पदे खड्गच्छिन्नोऽप्यहितसुभटेनापतदसौ
न तावद्यावत्तं न निजवरसादी निहतवान् ॥ ५४ ॥
छिन्नेऽपि दक्षिणभुजे करवालयष्टौ
वामे करे विचलयन्रिपुमाप सादी ।
वीरस्य तस्य रिपुखण्डनकेलिकाया-
मक्षीणशक्तिरगमत्स हि दक्षिणत्वम् ॥ ५५ ॥

अश्वारोहैः कृतदण्डानि भूमौ पर्यस्तानि स्फारच्छत्राणि रेजुः ।
रूप्यस्थालानीव कलत्रानि मृत्योराहाराय प्रौढचन्द्रद्युतीनि ॥ ९६ ॥
खड्गैः कृत्ता वाजिनां वक्त्रभागा रक्तस्रोतो नीयमाना जवेन ।
मग्नाङ्गानामुन्मुखानां हयानां भ्रान्तिं तेनुः पश्यतामाजिरङ्गे ॥ ९७ ॥

भटानां रोषेण प्रतिभटसमीपं प्रचलतां
समुद्यता रेजुश्चलदसिलताः पाणिकलिताः ।
भुजश्रीखण्डद्रुमकरकुहरोद्यद्विषधरा
रिपूणां प्राणालिं कवलयितुकामा इव तदा ॥ ९८ ॥
समीकपदवीविदः समदसिंहनादा भटा
ववल्गुरमितैः शरैः रचितमण्डपाः पुष्करे ।
निरस्ततपनातपश्रमभराः क्षणाद्भङ्गुरैः
शरीरनिकरैर्यशःस्थिरतनूर्भुवि प्रेप्सवः ॥ ९९ ॥

तत्र समीककलाविपश्चिदाश्चर्यवृत्तिः पदातिः, केनचित्पदेन भुजध्वनतिर्यगर्पितवैजयन्तीतुलितां कृपाणीलतां बिभ्राणेन 'इदं मदीयनामधेयपूर्वभागं बिभर्ति' इति रोषादिव पदद्वये निरुत्तोऽपि, अखण्डितमात्मसत्त्वमिव घनवंशजातं चापमालम्ब्य, शूरो न ववात ।

नीलाभ्रतुल्ये कवचे भटस्य नीते प्रभेदं करवालवल्लया ।
तत्र स्रवत्ता घनशोणितालिः सौदामिनीसाम्यमवाप दीर्घा ॥ १०० ॥
कश्चिद्भटः शत्रुशरैः परीतसमस्तदेहः समिति व्यलासीत् ।
यथा महीनः प्रचुरप्ररोहो यथा च नागाततचन्दनद्रुः ॥ १०१ ॥

वीराग्रेसरः पदचरः प्रपितरिपुभण्डलाग्रखण्डितमस्तकविगलदसृग्धारामयङ्करमुखभागतया बहिःप्रसृतया क्रोधपरंपरया परीत इव मृत्युमूर्तिं दहनरसुरणीपेण प्रभुकार्यापरिसमाप्तौ प्राणोत्क्रमणं

निरोद्धुमिव निधाय करे कृपाण मनसि धैर्यं समपने दृष्टि महीतले रिपुशिर सहस्रपतन च युगपदातन्वान ऋतुभुना श्लाघाना पुष्पवृष्टीना च पात्रमजायत ।

सैन्यद्वये तत्र विमिश्रितेऽपि विशेष एष व्यलसद्गणाग्रे ।
स्वीया पराश्च पदगा पुरस्ताद्ये समुखास्ते रिपुसैन्यवर्गा ॥६२॥

तदानीं रिपुशरनिकृत्तचापलताश्चापलकरवालैर्भनकरवाला पाणिभिश्छिन्नपाणयश्चरणैर्भिन्नचरणा दुर्वचनै क्रोधपरीता योधा परस्परमाजघ्नु । एव शब्दपूरितगगनजयानके भयानके समीके विजृम्भिते मथननिर्मुक्तनाराचधारापातेन दीना निजसेनामालोक्य करकलितकार्मुकलताविस्फारघोषेण द्विविधानपि महीभृत कम्पयन्कोपारुणास्य पद्मास्यो वेगविततचक्रस्पन्दनेन स्यन्दनेन विपक्षवाहिनी दिधक्षन्निवाभिदुद्राव ।

पद्मास्यप्रहिता प्रभूतविशिखा सेनान्तराले रिपो
योधास्तत्र सहस्रशो निपतितान्भूमौ व्यधु पङ्क्तिश ।
घोरान्पाटितविग्रहान्गजरटा प्राणालिभिर्दुर्वटा
कूजच्चापधरान्वहच्छरधिराश्चक्रुर्यमून्सयुगे ॥ ६३ ॥
तस्यामिते शरगणैर्गगन रिपूणा
सैन्य च पूरितमभद्रनसप्रहारै ।
भूमिश्च भग्नभटवाजिगजै परीता
हाहारवैररिबलस्य दिशावकाश ॥ ६४ ॥
द्विषता तत्पतीना च नगास्त्रैर्निम्नगा सृजन् ।
पद्मास्य प्रीणयामास निजसैन्यनदीपतिम् ॥ ६५ ॥
शरास्तदानीं जलजाननस्य नामाक्षराणा मलिता न भूयात् ।
इतीव राज्ञा हृदये प्रविष्टा प्राणानगृह्णन्त न रक्तलेशम् ॥ ६६ ॥

एवं निजध्वजिनीक्षोभमालोक्य तत्क्षणकन्दलितकोपौ मगध-मागधभूपौ कुटिलीकृतचापौ निर्निरोधप्रचारेण रथेन क्षोणीतलं क्षोभयन्तौ निजसैनिकशिखावलवनगर्जितायमानसिंहनादेन वैरिजन-धैर्यमुन्मूलयन्तौ जवेन पद्मास्यमापतताम् ।

तं मागधमहीपालं स्वर्भानुरिव भास्करम् ।
दुधाव रथिनं वीरो देवदत्तो धनुर्धरः ॥ ६७ ॥

तदनु करलाघवकोरकितधनुर्लतारिनिरन्तरानिर्मुक्तशरनिकरदूरो-त्सारितनभःस्थलसंमिलितामरलोकं पाणिपात्रस्थकीलालपाननिरुत्सुकै-र्विस्मयस्तिमितलोचनैस्तृणोत्तालैर्वैतालैर्विलोक्यमानशरसंधानमोक्षणम-न्योऽन्यास्त्रसंघट्टसञ्जातप्रोच्चलत्प्रचुरविस्फुलिङ्गपरंपराविभासितकुञ्जर-कुलं वैमानिकजनसीमातीतश्लाघाविषयभूमाश्चितं सकलवीरजनोत्साह-दानशौण्डं प्रचण्डतरदोर्दण्डयोर्मथनपद्मास्ययोर्मागधदेवदत्तयोश्च वा-चामगोचरं समरमुदजृम्भत ।

मथनदलितान्बाणान्दृष्ट्वा निजान्बहुशस्तदा
कमलवदनः सोऽयं कर्णान्तनर्तितशिञ्जिनिः ।
विततविशिखैः सूतं केतुं च तस्य विभेदय-
न्निनगलगलत्सिंहध्वानैर्नभः समभेदयत् ॥ ६८ ॥

ततश्च दुर्धर्षप्रतापाटलवदनेन मथनेनार्धचन्द्रेण निकृते निजज्या-मुक्तगुणे, पद्मास्यः, करतलताडनितकोदण्डान्तरसमारोपितकाण्ड-प्रकाण्डे रिपुमण्डलानि खण्डयन्, तस्य सपत्नस्य शरासनं समरोत्साहं च युगपद्विदारयामास ।

ततोऽदेवदत्तमचलकरतलात्पत्रिणो युद्धरङ्गे
पेतुः प्रोद्भूतपक्षाः कतिचन गगने तस्युरुच्चड्डयाल्याः ।

श्लो. ६९. उच्चड्डयाल्याः, आविर्भवन्त्या कान्त्या पूर्णाः ।

लेखानां मेघमार्गे पिहितपरिलसत्सौरभाणि प्रकामं
तस्थुः पेतुश्च जीवंधरनिखिलबले कानिचित्पुष्पकाणि ॥६९॥
यत्र यत्र रिपुवाहिनीतले पुण्डरीकमुदयत्कबन्धके ।
आविरासत बहुधा शिलीमुखास्तत्र तस्य जयिनः समापतन् ॥७०॥

एवं देवदत्तस्य रणमत्तस्य दुर्ललितदोर्दर्पविजृम्भितमसहमानः किरीटखचितकुरुविन्दमणिवृन्दप्रभापुनरुक्तवदनवननकोपारुणकान्तिप्रसरः परंतपप्रतापो मागधभूपः करनर्तितचापलतानिर्मुक्तबाणगणाक्रान्तविपक्षपक्षदुर्मदः पञ्चभैः पञ्चभिर्देवदत्तस्य रथघोटान्पाटयामास ।

निशितविशिखवर्षैर्विश्रुतो देवदत्तः
कवचमथ विभिन्दन्मागधेशस्य कोपात् ।
उरसि निहितशक्तिस्तस्य शार्ङ्गं विलुम्प-
न्नमिति विमलकीर्तिः पातयामास शत्रुम् ॥ ७१ ॥

ततश्च प्रभोः प्रतापमिव भुवि पातितं महावीरं मगधभूपालमवलोक्य क्रोधसंज्वलन्नयनविगलद्विस्फुलिङ्गः कलिङ्गभूपालः कुटिलितभ्रूभङ्गभीषणवदनः कर्णान्ताकृष्टचापनोदितशरोपवर्षेण धर्षितपरभटो हर्षितनिजचतुरङ्गबलः पातितघोटगजघटाभटपटलः सरभसमेव कौरवसेनां क्षोभयामास ।

विहायसि विहारिभिः शरगणैः कलिङ्गेशितु-
र्भयाद्द्रुतमपासरन्न परमाकुला निर्जराः ।
क्षितौ च रिपुसैनिका दिशि दिशि क्षणाद्धाविताः
स्वसैनिकभयोद्यमा निजगशस्तरङ्गास्तथा ॥ ७२ ॥

विस्फारयोर्पैर्गगनं पूरयन्हर्षयन्बलम् ।
श्रीदत्तोऽभिनगामैतं मृगेन्द्र इव कुञ्जरम् ॥ ७३ ॥

---

७०. पुण्डरीकम्, श्वेतच्छत्रं सिताम्भोजं च ।

तदानीं सकलवीरजनकर्णाभरणायमानभुजप्रतापयोः श्रीदत्त-कलिङ्गभूपयोः परस्परनिकृत्तविशिखमनिमेषैरप्यलक्ष्यशरसंधानमोक्ष-णमगोचरनयपरानयगट्टपूर्वं दिविषदामद्भुततरं समरमुदजृम्भत ।

श्रीदत्त एष करनर्तितचापदण्ड-
माकृष्य संयति तथा विशिखान्मुमोच ।
एको यथा दशगुणक्रमतः सवीरा-
नाक्रम्य कृन्तति जवाद्रिपुसैन्यवर्गं ॥ ७४ ॥
श्रीदत्तो रन्ध्रमन्विष्य शरैस्तस्य महीपतेः ।
पातयामास मकुटं सगर्नञ्छिरसा सह ॥ ७५ ॥
तदीयमकुटोद्गतैरमितमौक्तिकैः पातितै-
रराज समरानिरं पतितभूमिभृन्मस्तकम् ।
कलिङ्गवसुधापतिप्रथितराज्यलक्ष्म्यास्तदा
विकीर्णमिव विस्मृतैर्नयनबाष्पबिन्दूत्करैः ॥ ७६ ॥

तदनु भासां निधौ पश्चिमपयोनिधौ निमज्जति शोकहर्षपारावा-रनिमग्नाः, कमलेषु मुकुलीभवत्सु मुकुलीकृतसमरविलासाः, जग-देकवीरे मरे समधिरोपितशरासनगुणे क्षणादवरोपितचापगुणाः, उभयेऽपि सैनिकाः स्वकटकभुवमासेदुः । अपरेद्युः काष्ठाङ्गारेण रिपुजनगहनाङ्गारेण बहुधा प्रोत्साहिनविजयकथनो मथनः प्रतिफलि-ततपनबिम्बप्रभापिञ्जरितदिशावकाशः कवलयन्निव रिपुसेनासमुद्रमा-जिरङ्गमाजगाम ।

अनीकिनीं पुरोधाय पद्मास्योऽपि रणाङ्गणम् ।
आससाद धराधीशसेनराधीशसंगतः ॥ ७७ ॥

तदनु मथनपद्मास्याभ्यां तिलकितमुत्तमाङ्गाः कोणताडितनिस्त्राण-प्रभूतनिर्घातप्रायप्रहरणनिरन्तरान्तरिक्षदेशाः, कोलाहलविनृ-

म्भितसिंहगर्जनभयतर्जितदिशावशावच्छभाः, नूतननिकषकषणनिर्मूलीकृतकरचलितकरवालवल्लिकाप्रतिबिम्बितरविबिम्बतया मूर्तीकृतमिव निजप्रतापमाबिभ्राणाः, उपयेऽपि वीराः श्लाघ्यायोग्यं युद्धं विधातुमारभन्त ।

कदनदुर्दिनमत्तशिखावलः करतलोद्धृतकार्मुकभीकरः ।
स मथनः मचचाल रणाजिरे विपिनदेश इवोद्धतकेसरी ॥७८॥
विपाट्य घोटान्गजतां निपात्य भटान्विभिद्य क्षितिपैः सहायम् ।
संक्षोभयामास कुरुद्वहस्य बलाम्बुधिं मन्दरवत्पयोब्धिम् ॥७९॥
प्रधाव्य वेगाद्रथमाजिसीम्नि पद्माननस्तस्य पुरो बभूव ।
काम्पिल्यकेशस्य स पक्षवेशो लाटाधिराजस्य च बुद्धिषेणः॥८०॥
महाराष्ट्रमहीशस्य गोविन्दधरणीपतिः ।
अन्येषां पुरतस्तस्थुर्नन्दाढ्यविपुलादयः ॥ ८१ ॥
समापतन्तीः सहसा समन्तादनीकिनीः पद्ममुखवीरः ।
प्रत्यग्रहीदेष शरप्रचारैः स्रोतस्विनीरेक इवाम्बुराशिः ॥८२॥
सैन्यमानते कुर्वन्नन्यमुद्धृतशत्रुषु ।
शरान्मुमोच पद्मास्यो न परान्मार्गणलाघवम् ॥ ८३ ॥
मयेन शरावलिं तमिस्रां सृजता तत्र निशामुखायितम् ।
विशिखैः किरणैर्विभिन्दता तां जलनाथेन निशाकरायितम्॥८४॥

एवं परस्परशरखण्डनेन व्रणकथानभिज्ञगात्रयोः, विस्मयविस्तारितलोचनैः श्लाघोन्मुखैर्वीरमुखैर्निरन्तरं निरीक्ष्यमाणयोः, दिगन्तविसारिभिः शरासारैराकाशं मूर्तमिवादधानयोः, प्रवीराभिलाषिणोभयोः समीपं मुहुर्मुहुर्गतागतक्लेशमविगणय्योत्सर्पन्त्या जयश्रिया दत्तमालिङ्गितवपुषोः, साहसविलोकनसमयसुरवृष्टकल्पतरुकुसुमसुरभितभुजयुगलयोः, चक्रीकृतचापलीलामध्यविराजमानशरीरतया परिवेष-

मव्यगयोः परस्परसंमुखयोरिव दिवाकरयोः, प्रवीरयोरनयोः समर-क्रीडामातन्वतोः, कुपितवदनो मथनः, पद्माननस्य कार्मुकगुणं विभिद्य हर्षेण प्रगर्जन्, इमं व्याहारमुररीचकार ।

चापस्य जीवविच्छेदात्क्व धावसि भयाकुलः ।
ननु रे भवतोऽप्येवं जीवमेष हरिष्यति ॥ ८५ ॥

इति लपितमवेत्य पद्मवक्त्रः स्फुटतरमाह गिरं गभीरनादः ।
अयि मथन ममास्ति चन्द्रहासः परिहृतशत्रुसतीमुखेन्दुहासः ॥८६॥

इति कृपाणमुत्पाट्य करे विचलयन्, शताङ्गोत्सङ्गादुत्प्लु-त्यामन्दतरलाघवाक्रान्तशात्रवानीकः पद्माननप्रत्यानीकपराक्रमः प-द्माननः, कदनदुर्मदविलासितस्य मथनस्य शिरसि समुत्खातकर-वालं निचखान ।

मथने भुवि पातिते रणाग्रे जलजास्ये निपपात पुष्पवृष्टिः ।
रिपुसैनिकनेत्रतोऽम्बुवृष्टिः कुपिताद्रानगणाच्च बाणवृष्टिः ॥ ८७ ॥

तदानीं कोरवचलकोलाहलमाकर्ण्य प्रवृद्धकोपौ कुटिलीकृतचापौ तपननिकाशप्रतापौ लाटकाम्पिल्यकभूपौ बुद्धिपेणपछवराजयो-रभिमुखं तस्थिवांसौ दिशावकाशनिबिडितसायकं हर्षितनिजनायकं वैमानिकजनसीमातीताद्भुतहर्षदायकं भयानकं समीकमाकलय्य क-ल्पान्तदहनसकाशे तयोः शरनिकरहुताशे पतङ्गौ बभूवतुः ।

महाराष्ट्रविदेहेशोः समरं समजृम्भत ।
दारुणं शरसंभिन्नवारणं जयकारणम् ॥ ८८ ॥
प्रदीप्तशरसङ्कटं प्रचुरदीर्णटप्यङ्कटं
निलिम्पजनलालितं निखिलशस्त्रलीलायितम् ।
प्रदर्शकनिदर्शनं मथितयुद्धविद्याविदां
विनेतुरिमौ तदा विविधसंगरे भीकरम् ॥ ८९ ॥

गोविन्दराजस्य शरेण लूनं शीर्षं रणे तस्य धराधिपस्य ।
राहुभ्रमं तीव्रकरस्य कुर्वंस्तत्कीर्तिनुत्यै दिवि केतुरासीत् ॥९०॥

एवं निनष्टतनायां महतां राज्ञां निधनं निशम्य विशालतरामर्षः काष्ठाङ्गारः, सर्वाभिसारेण निजबलं पुरोधाय, तेजोविभवविजितविकर्तनप्रतापान्भूपानहितजनमृत्युसरूपान्कौरवजनसंक्षोभाय प्रेषयामास ।

कारं कारं बलोत्साहं तेषां क्षोणीशिनां रुषा ।
पुरो बभूव नन्दाढ्यः करिणामिव केसरी ॥ ९१ ॥

ततश्च यदुचितं सकलवीरश्लाघानाम्, यद्युक्तं जीवंधरानुजस्य, यदुदाहरणं पाण्डवयुद्धानाम्, यत्समुचितं नीतिमार्गाणाम्, यदासेचनकं लेखलोचनानाम्, यदानन्दनं निजसैनिकानाम्, यन्निदानं कुन्दनिर्मलकीर्तिकल्लोलानाम्, यद्रङ्गस्थलं जयलक्ष्मीताण्डवस्य, यदधिकरणं कल्पद्रुमानल्पपुष्पवृष्टीनाम्, यदगोचरपदं कविवचनविलासानाम्, तादृशमायोधनं नन्दाढ्यः कन्दलयामास ।

वीरस्य तस्य निशितैर्धनकङ्कपत्रैः
संपूरिते नभसि युद्धमपश्यमानाः ।
जोषं निषेदुरमरा युधि वीतदेहा
वीराश्च सूर्यमनिरीक्ष्य चिरं ववल्गुः ॥ ९२ ॥

तस्य मार्गणविभिन्नशरीरैरुत्पलायितमरिव्रजवीरैः ।
शोणितप्रसृतवाहिनीगतैरुत्पलायितमिभावलिखण्डैः ॥ ९३ ॥

अनासया तेन निपीड्य मुक्ता विलक्षतां प्रापुररिप्रवीराः ।
न पत्रिणस्तत्र महाहवाग्रे सुरासुराणामपि दुर्निरीक्ष्ये ॥ ९४ ॥

तदानीं मन्थानाचलमिव रिपुबलजलधिं क्षोभयन्तमतिविस्मयनीयकरलाघवं रणरङ्गे निर्निरोधशताङ्गप्रचारं निस्तुलसेनासंपदमप्य-

द्वितीयम्, निरस्तदोषमपि महादोषम्, अमितगजतुरगादिसहायमपि चापैकसहायम्, रथगतमपि धनुषि निषण्णम्, समुत्सारितविद्विडिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि सूक्ष्मदर्शनम्, नन्दाख्यं एकमपि द्विधा त्रिधा चतुर्धा च वीक्ष्य बहवो मेदिनीपतयस्तत्क्षणमन्यसूययेव स्वयं पञ्चत्वमाजग्मुः ।

नपुले विपुले च चापवल्लीं भृशमाकृष्य किरत्यतीव रोषान् ।
खगमण्डलमेदुरं बताभ्रं पिहितोद्यत्खगमण्डलं बभूव ॥ ९५ ॥

तावत्कोङ्कणभूपतिर्द्रुततरं धावद्रथेनागतः
क्रोधान्धो नपुले ववर्ष विशिखासारं महागर्जनः ।
यद्वद्दुर्धरवज्रपातमधिकं संवर्तकालोद्यतो
नीमूतो वसुधाधरस्य शिखरे निःसीमघोरारवः ॥९६॥
दिशं प्रतीचीमिव पद्मबन्धुं मूर्ध्नां गतं मन्दतरप्रतापम् ।
अपासरत्संगरभूमिभागविहायसो वीरामिमं नियन्ता ॥९७॥

तदिदमाकर्ण्य शोककातरं निजजामातरं कोपारुणवदनं कुरुपञ्चवदनं समीक्ष्य विद्याधरक्षोणीपतिर्गरुडवेगः प्रथितनिजबलकोलाहलव्यालोललोकः स्तोकेतरपराक्रमः क्रमेण संग्रामसीमामवनगाहे ।

संग्रामोपरि जृम्भितः खगपतिः कोपात्करालाननः
शक्तीस्तोमरशूलजालपरिघान्कुन्तानसीन्पर्वतान् ।
वर्षन्भीममदाट्टहासरभसक्षुभ्यद्दिशामण्डल-
श्रिक्रीडाम्बरसीम्नि संगरकलातुङ्गीभवद्दोर्मदः ॥ ९८ ॥
दृष्ट्वेमं रुधिराणि तत्र ववमुः केचिद्भटाः शत्रुषु
प्राणान्केचन तत्यजुर्भयभरात्पेतुः क्षितौ केचन ।
केचिद्धावनलालसा वसुमतीपालाश्च दिग्मोहतो
भ्राम्यन्तो रणसीम्नि शिक्षितहयाभ्यासप्रकर्षं दधुः ॥९९

रे रे कुत्र पलायितोऽसि समरे मा कम्पनं प्राप्नुया-
स्तिष्ठाग्रे हत कोङ्कणेश शमनस्त्वामीहते भक्षितुम् ।
शीर्षं ते विनिपात्य कर्णविगलद्रक्तप्रवाहैः परां
तृप्तिं कल्पयति क्षणात्क्षितिपतिर्भूतावलीनामिह ॥१००॥
एवं जगर्जुः खचरसैनिकाः सिंहविक्रमाः ।
सपत्नैकण्ठकदलीकाण्डताण्डवितासयः ॥ १०१ ॥

तदानीं पुष्पितकिंशुककाननमिव पल्लविताशोकवनमिव पारिभद्रद्रुमविपिनमिव च परितः क्षतं निजबलमवलोक्य कृताभिषेणनं कोङ्कणमहीपतिं कर्णपूरसौरभ्यसमाकृष्टभृङ्गावलिशङ्कावहशिञ्जिनीविगलद्विशिखधाराभिर्गगनतलं पूरयन्तमेनममन्दवेगो गरुडवेगः क्षणेन वक्षसि शक्त्या विव्याध ।

भेत्स्यन्ति मे मण्डलमद्य वीरा विद्याधरेन्द्रेण विदीर्णदेहाः ।
इतीव वेगेन पयोजबन्धुरस्ताचलोदग्रदरीं विवेश ॥ १०२ ॥

तदनु गरुडवेगविक्षिप्तगण्डशैलखण्डिताङ्गेन हतशेषेण सैन्येन काष्ठाङ्गारसेनाधिपे कटकं प्रविष्टे, गरुडवेगमहीपालोऽपि समरावलोकनसंमुखबर्हिमुखकरवृटकल्पकतरुप्रसूनसुरभिलभुजदण्डघटितकोदण्डः, सहर्षपरस्परसल्लापकल्लोलकोरकितकुतुकेन समरकलाविलासविजयसंस्मरणजनितनिजस्वामिश्लाघापरेण सैनिकनिकरेण प्रतिक्षणमीक्ष्यमाणः, पल्लवक्षितिवल्लभगोविन्दमहीपाललोकपालप्रभृतिभिः संभाष्यमाणो, ग्रहोन्मुक्तेनेव चन्द्रेण मूर्च्छोन्मुक्तेन नपुलेन पुरस्कृतं स्वकटकभुवमाससाद ।

अपरेऽहनि वाहिनीपतीनां मणिमालामकुटाङ्गदाम्बरादीन् ।
रथसूततुरङ्गकङ्कटादीन्प्रतिपाद्याशु कृतप्रकः प्रतस्थे ॥ १०३ ॥
एवं पारितोषिकप्रदानपरिवर्धितोत्साहेनाहमहमिकापरवशेन सर्वो-

भिसारेण बलेन स्थगितक्षितितलाभोगः, पर्वतनिकाशं विजयगिरिनामधेयं गन्धसिन्धुरमधिरूढो, माविचक्रपातसूत्रन्यासरेखाशङ्कावदन्यरेखात्रयशोभितं गलमभितो लम्बमानेन चक्रपतनसंप्रतीक्षस्य स्कन्धगतस्य मृत्योः करविततीर्णेनेव पाशेन मुक्ताहारेण भासुरवक्षःस्थलः, कोटीरमणिगणप्रतिबिम्बितमार्तण्डमण्डलतया 'कुरुवीरशरसमाच्छादिते गगने सोऽयं न मत्संनिधानमागन्तुमर्हति' इति करुणाकरेण दिवाकरेण पूर्वमेव गृहीतमस्तक इव वाभास्यमानः, कुटिलितभ्रुकुटीघटितवदनः काष्ठाङ्गारः स्वयमेव संग्रामाङ्गणमाजगाम ।

कुरूणां वीरोऽपि प्रचुरबलकोलाहलकला-
विलासव्यासाशापतिसदनवातायनमुखः ।
क्रमात्क्रामन्गन्धद्विपमशनिवेगाभिधमयं
रणाग्रं संप्राप क्षितिविदितदोर्दण्डमहिमा ॥ १०४ ॥
जडीकृतश्रवःपुटे दिवौकसां जयानका-
रवे सुराचलोल्लसद्दरीर्विशत्यनेकशः ।
सुपर्वकामिनीजनप्रहर्षगीतकौशलं
बभूव निष्फलं तदा प्रतिध्वनद्धुहारवैः ॥ १०५ ॥
रथक्षुण्णक्षोणीतलगलितपांसून्मुखगता-
न्दिशानागाः शुण्डोद्धृतजलकणैः शान्तिमनयन् ।
रहः स्त्रीणां रूप्याचलकुहरतल्पेषु खचराः
विनस्राणामङ्गेष्वतिबहलमान्वसनतः ॥ १०६ ॥
अदृष्टचरमाहवं सुरगणैरथोज्जृम्भितं
क्षणेन मदमेदुरं प्रचुरवीरवादोत्कटम् ।
चलाचलकृपाणिकाप्रतिफलद्दिवस्वत्प्रभा-

दुरीक्षमतुलं तदा जयरमातुलारोहणम् ॥ १०७ ॥
वीर्यश्रीप्रथमावतारसरणौ तस्मिन्कुरूणां पतौ
बाणान्मुञ्चति हस्तनर्तितधनुर्वल्लीसमारोपितान् ।
दीर्णक्षत्त्रभटच्छटाभिरभितः संभिद्यमानान्तरं
भास्वद्बिम्बमहो बभार गगनश्रेणीमयुच्छत्रताम् ॥१०८॥
दृप्यत्सिन्धुरदीर्णकुम्भयुगलीमोन्मुक्तमुक्ताफले-
र्बाणावासिजयश्रियः प्रविगलन्मोदाश्रुबिन्दुप्रभैः ।
लेखानां कुसुमोत्करं सुरभिलं द्राग्वर्षतां हर्षतां
प्रत्यर्चां चतुरश्रकार समरे सोऽयं कुरूणां पतिः ॥१०९
एवं भिन्दन्बलं वीरः कृतघ्नमभियाय सः ।
वीरश्रियानुधावन्त्या समालिङ्गितविग्रहः ॥ ११० ॥

एवं जयश्रीताण्डवरङ्गस्थलायमानभुजयुगलं कुरुवीरमवलोक्य काष्ठाङ्गार एवमुवाच ।

क्व वैश्यपुत्रस्त्वमतीव भीरुर्वयं क्व चापागमपारनिष्ठाः ।
अथापि ते संपति संप्रवृत्तावनात्मवेदित्वमवेहि हेतुम् ॥ १११ ॥
तुलादण्डधृतौ वैश्य तव यत्करकौशलम् ।
विस्तारयसि तच्चापे विकापलमहो तव ॥ ११२ ॥
साहसेन रणे तिष्ठन्मुमूर्षुरसि मुग्धधीः ।
त्वत्प्राणवायोः कः पाता मत्फणाहिना विना ॥ ११३ ॥

इति काष्ठाङ्गारदर्पविलसितदुर्वचनमाकर्ण्य कुरुवीरोऽप्येवं जगाद ।

त्रपां विना मे पुरतः प्रजल्पसे
कृतघ्न वीर्यं तव दृष्टपूर्वम् ।
त्वया समः कोऽपि न लक्ष्यते क्षितौ
नूनं प्रभुद्रोहविधौ समर्थः ॥ ११४ ॥

विरम विरम शत्रो विश्रुतोऽसि त्वमेक-
स्त्रिजगति परिशुद्धः पातकिभ्योऽगण्यः ।
प्रसरति मम बाणः प्राणहारी पुरस्ता-
च्चमपि कुरु समीके जीवरक्षाप्रयत्नम् ॥ ११५ ॥

इति वदतः कुरुवीरस्य विस्फारघोषेणाशनिगर्जनशङ्कावदान्येन दृढार्तिसंघटितं* कम्पमानजीवं चापभुजगमाकुन्य विषज्वालाय-मानान्मुञ्चान्काष्ठाङ्गारः कौरवं प्रति दुर्धर्षामर्षेण ववर्ष ।

विच्छिद्य विच्छिद्य शरानने कात्रिपोः शरासाद्गलितान्गभीरान् ।
अलक्ष्यसंधानविकर्षमोक्षान्बाणान्सपत्ने स ववर्ष वीरः ॥ ११६ ॥

गृहीतपक्षाः पटवः पुङ्खाः कौरवचापतः ।
प्रसस्रुः संगरे शब्दा वादिनो वदनादिव ॥ ११७ ॥

विपाठवर्षेण कुरूद्वहस्य नभःस्थली द्राक्षिपहिताऽनबन्धुः ।
तिरोहितारिक्षितिपालसेना बभूव धात्री युगपद्रणाग्रे ॥ ११८ ॥

विपाठपञ्जरेणासौ विद्विषत्पक्षिणां कुलम् ।
बबन्ध स्पन्दनायोग्यं मन्देतरपराक्रमः ॥ ११९ ॥

तदानीमुदारपराक्रमग्रथितभुजदण्डयोः समकालमिव गीर्वाणगण-लक्ष्यमाणमार्गणग्रहणसंधानविकर्षणमोक्षयोरन्योन्यं विजयाशा-विजृम्भितरन्ध्रान्वेषणयोराश्चर्यकर्मकलाविलोकनसमयसंतुष्टवृन्दारकजन-करारविन्दसंदीयमानमन्दारकुसुमतुन्दिलसविधप्रदेशयोः मध्यप्रसृत-मृत्युनासायमानबाहुदण्डविधृतचक्रीकृतकोदण्डतया कोपकुटिलित-मृत्युभ्रूयुगलशङ्कासंपादकयोः प्रवृद्धोत्साहयोर्भयानकसमरमादधान-योः कुरुवीरकाठाङ्गारयोः परस्परशरवदनजनितविस्फुलिङ्गपरंपरा-मेघमालासु प्रविष्टापि न शान्तिमाससाद ।

पङ्क्तिः ६. *दृढया धनुष्कोट्या सहितम् । श्लो. ११८. विपाठवर्षेण, शरवर्षेण ।

तादृक्षे समरे प्रसन्नमनसो वीरस्य सात्यंधरे-
र्बाणालीशरदा विभिन्नवपुषि क्षीणे क्षणेनाखिले ।
द्वेषिक्ष्मापशिलीमुखाभ्रपटले स्वीया तदा वाहिनी
प्रोन्मीलन्मुखवारिजा प्रविलसच्छ्रीराजहंसा बभौ ॥१२०

जीवंधरस्य करपद्मगतं सपत्न-
शस्त्रालिवारणपरं घनदीप्रखेटम् ।
अर्धे विभिद्य युधि राहुनिगीर्णचन्द्र-
बिम्बार्धवत्प्रविदधत्स जगर्ज शत्रुः ॥ १२१ ॥

कोपेनाथ कुरूद्वहः प्रतिदिशं ज्वालाकलापोर्मिलं
चक्रं शत्रुगले निपात्य तरसा चिच्छेद तन्मस्तकम् ।
देवाः पुष्पमवाकिरन्नविकलं श्लाघासहस्रैः समं
लोकान्दोलनतत्परः कुरुबले कोलाहलः कोऽप्यभूत् ॥१२२॥

तदानीं संत्रासपलायमानं शात्रवबलमवलोक्य, कुरुवीरः करुणाकरः क्षणादभयघोषणां विधाय, तद्बन्धुतां दीनामाहूय, तत्कालोचितसंभाषणादिभिः परिसान्त्वयामास ।

विजया विजयाधिकेन पुत्रप्रवरेणाद्य बभूव वीरमाता ।
अधुना विधुना समानवक्त्रा मम पुत्री च चिराय वीरपत्नी ॥१२३॥

इत्युक्त्वा मातुलः सोऽयं गोविन्दधरणीपतिः ।
कुरुवीरं कुलोद्धारं कुतुकादभ्यनन्दयत् ॥ १२४ ॥

वसुंधरा क्षुद्रकुलप्रसंगात्संमार्ष्टुकामा समवेतदोषम् ।
कुरुप्रवीरस्य विशालदोषमुपाश्रिताभूदिति चित्रमेतत् ॥ १२५ ॥

तदनु जीवंधरो मुकुलिताञ्जलिकजानां समन्ततः सामन्तवसुमतीपालानामानतीरालोकनेनाङ्गीकुर्वाणः, पूर्वाचलमिव पयोजबन्धुर्गन्धसिन्धुरमधिरूढो, दूरादनुगच्छद्भिः सेनाध्यक्षैरनुक्षणं प्रतिपाल्य-

मानेक्षणावसरः, सामन्तविराजितैर्गरुडवेगगोविन्दपल्लवपतिलोकपाल-
प्रभृतिभिर्महीपालैः परिवृतसविधप्रदेशः, शताङ्गसंगतैर्नन्दाढ्यप्र-
मुखैः सहोदरैः पद्मास्यप्रभृतिभिः सहचरैश्च परिशोभितः, प्रस-
न्ननिजमुखसुधाकरालोकैरुल्लसता बलजलधिना मेदुरपुरोभागः, सह-
र्षोद्वेगमहमहमिकया सरभसापनीतातपत्रान्परस्परोत्पीडनकुपिततुर-
ङ्गनिवारणायाससहानेकैकशः प्रतिनामग्रहणं समीपगतैः काष्ठा-
ङ्गारबन्धुभिरावेद्यमानान्प्रणामसमयप्रचलितमकुटतटघटितपद्मरागप्रभा-
प्रसरणकैतवेन प्रकटीकृतानुरागाञ्छत्रवपक्षलक्षितक्षोणीपतीन्यथार्हं
बहुमन्यमानः, समरसमानीतसपत्नलक्ष्मीनिवासविकचपुण्डरीकाय-
मानेन निजबलजलधिफेनकूटशङ्कावहेनातपत्रेण विभ्राजितः, पार्श्व-
द्वयसमुद्धूयमानचामरसमीरनर्तितकर्णावतंसः, पुरतो 'जय जय'
इति मधुरमुच्चैः पठता वन्दिवृन्देन पाठ्यमाननिजविरुदवैभवः,
क्रमेण समासाद्य तत्र ध्वजकलशतोरणवितानाद्यष्टशोभाभिरलंकृतासु
रथ्यासु प्रविशमानः, सकलपुरतरुणीजनबाहुवंशगलितमुक्ताफलाय-
मानैः पुष्पलाजोपहारैः संभाव्यमानो राजमन्दिरमाससाद । तत्र च,

विसृष्टनिखिलावनीपतिचयः कुरूणां पति-
र्मितैः परिजनैर्युतः प्रविशति स्म सोऽन्तःपुरम् ।
निमग्नमरिकामिनीजनमतीव शोकाम्बुधौ
निरीक्ष्य करुणाकरः सपदि सान्त्वनायोद्यतः ॥ १२६ ॥

ततः कुरुवीरः शोकसन्त्रासदीनमन्तःपुरिकाजनं समीपमानीय
तत्र कुररीमिव क्रन्दन्तीं काष्ठाङ्गारमहिषीं तत्पुत्रांश्चावलोक्य कृपा-
तरङ्गितः परिसान्त्वनकलाप्रवीणः पीयूषमधुराभिर्विचित्राभिर्गिरां पर-
म्पराभिः समाश्वासमानिन्ये ।

पङ्क्तिः १. सामन्तविराजितैः, गदाख्यैः ।

तदनु जलधौ भासां पत्यौ निमज्जति पश्चिमे.
करधृतमणिश्रेणीदीपैर्जनैः परिसेवितः ।
सखिपरिवृतः सोऽयं कोशं विवेश शनैः शनैः
धनमणिगणैर्वस्त्रैरन्यैश्च वस्तुभिरुज्ज्वलैः ॥ १२७ ॥

तदनु कोशधनादिकं निजमुद्रया मुद्रयित्वा निद्रासुखमनुबुभूषुः कुरुवीरः प्रासादमधिरुह्य मणिमञ्चोपरि हंसतूलशयने सुष्वाप । ततश्च निशायामवसन्नायां प्रातोधिकजनहृद्यपद्यालापैर्मङ्गलविचित्रवादित्रारावैश्च प्रबुद्धोऽसौ जीवंधरः कृतप्रभातिककृत्यः सकलपरिवारसहितो गोविन्दराजेन सह भगवज्जिनभवनमासाद्य तत्र पूजां विस्तारयामास ।

ततः सर्वैः साकं नृपभवनमासाद्य सहसा
विदेहक्षोणीशः सचिवगणमानीय पुरतः ।
समादिश्य श्रीमान्प्रजवमभिषेकमयतनं
समाष्टच्छत्रैवं कुतुकितमनाः कञ्जनयनः ॥ १२८ ॥

किं नवरत्नप्रभापरिहसितपुरंदरसभामण्डपमभिषेकमण्डपं विनिर्मितम् । किं वा तत्र सर्ववर्णवृद्धाः संमिलिताः । कच्चित्सज्जीकृतानि सुरभिशीतलप्रसन्नतीर्थपूर्णानि कनककलशकुलानि । कच्चित्तत्र संभृतानि तदुपयुक्तोपकरणानि । किं कार्तान्तिका मङ्गलमुहूर्तकृतावधानाः । कच्चिन्नानादिशनरपालाः सज्जीकृतोपायनाः संनद्धाः । किं वा नगररथ्याः परिष्कृताः ।

इति प्रश्नं समाकर्ण्य सचिवाः साञ्चितादराः ।
सर्वं सुघटितं देवस्याज्ञयेति वभाषिरे ॥ १२९ ॥

क्षीराम्भोधिपयःप्रपूर्णकलशानाहृत्य यक्षेश्वरो
यक्षैः स्वानुचरैस्तदा परिवृतः सूर्यप्रतीपच्छविः ।

संप्राप्तकुरुकुञ्जरं पितृपदे राज्येऽभिषेक्तुं मुदा
तत्रत्यक्षितिपावलिः स्म भजते वैलक्ष्यवीक्षारसम् ॥१२०॥

ततश्चाभिषेकमण्डपमध्यस्थापितरत्नपीठोपरि विराजमानं कौरवं क्षीरवाराकरवारिभिर्यक्षराजगोविन्दमहाराजप्रमुखाः सहर्षमभिषिषिञ्चुः । तदानीमनेकप्रहतपटहमृदङ्गशङ्खझल्लरीप्रभृतिवाद्यारावस्तर्जयन्निव घनावनमण्डलमास्फोटयन्निवाखिलजनश्रुतिमान्दोलयन्निव लोकमाह्वयन्निवाभिषेकदिदृक्षुजनमाक्रमन्निव भुवनोदरमुदपादि ।

तदनु दिव्यदुकूलविभूषणाञ्चितशरीरकुरुद्वहमूर्धनि ।
मकुटमुज्ज्वलरत्नविभासुरं करधृतं निदधे स हि यक्षराट् ॥१२१॥

आपृच्छ्य कुरुभूपालमारुह्य व्योमयानकम् ।
आदिश्य परिवारं स्वमयाद्यक्षोऽपि मन्दिरम् ॥ १२२ ॥

तदानीं निखिलनरपालकुलविलसितसद्भावं गोविन्दमहीवल्लभमग्रतो विधाय सप्रश्रयमवनतपूर्वकायेन पद्मास्येन दीयमानहस्तावलम्बः, सुरस्तम्बेरमसकाशं महान्तमौपवाह्यं गजराजमुदयधराधरमिव सरोजबन्धुरारावणमिव गीर्वाणपतिरधिरूढः, प्रकृतिजनकुमुदषण्डचन्द्रमण्डलेन क्षीरोदपिण्डीरधवलेन स्थूलमुक्ताफलजालकावृतेनातपत्रेण परिष्क्रियमाणोर्ध्वभागः, पार्श्वद्वयोद्धूयमानाभ्यां राज्यलक्ष्मीकटाक्षतरङ्गाभ्यामिव पयःपारावारपरिलोलदूर्मिसंकाशकनकदण्डविलसितचामराभ्यां किञ्चिच्चञ्चलवसनाञ्चलः, सर्वतः समपावृतकवाटपुटमकटवातायनतया कुरुपतिदर्शनकुतूहलसमुन्मीलितलोचनस्येव तत्पुरस्य हर्म्याग्रावलम्बिनीनां पौरनितम्बिनीनां कासांचिदर्घपरिसमाप्तप्रसाधनव्यापाराणां वामहस्तगतमणिदर्पणानां परिलसत्कोकारिपूर्णमण्डलानामिव राकारजनीनाम्, कासांचन सरभसगमनविगलितमेखलकलापाकुलितचरणपल्लवानां

शृङ्खलावटितचरणमारमदपट्टकरिणीनामिवापरासाम्, आर्द्रलाक्षारसारुणचरणसरोजानां कमलपरिपीतबालातपानामिव कमलिनीनामन्यासाम्, मरकतमणिखचितवातायनदत्तवदनारविन्दानां सुन्दरीमणीनां विकसितैकशतपत्रशोभितां गगनतलविलसितां कमलिनीं तुलयन्तीनाम्, करारविन्दगलितमरन्दबिन्दुशङ्कासंपादकैर्नखसुधाकरपरिगलत्पारशीकरसंदेहसंदायकैः सकुसुमैर्लाजाञ्जलिभिरवकीर्यमाणः, पुरःसरविविधवाद्यरवविमिश्रितेन पुरोयायिनां मङ्गलपाठकानां 'जय जय' इति मधुरवचनरचनानुयातेन, संक्षोभसमुत्पतत्पुष्पलीनपुष्पंधयझंकारमेदुरेण प्रासादपुञ्जसञ्जातप्रतिध्वानेन दीर्घतरतामुपगतेन कोलाहलेन मुखरितदिगन्तरः, तां पुरीं प्रदक्षिणीकृत्य द्वारदेशमवतीर्णः, प्रज्वलद्दीपशोभितकनकपात्रं वहन्तीनां वारवनितानां निचयेन विरचितनीराजनमङ्गलः, सत्यंधरात्मजो, विततवितानविलम्बिमुक्तादामविस्तारिते दन्दह्यमानधूपसुरभिले मणिमण्डपे प्रविश्य, कुलक्रमागतं सिंहासनमलंचकार ।

मोदाम्बुराशिर्व्यलसत्प्रजानां कुरुध्वरीन्दुमहोदयेन ।
पौराङ्गनानां नयनोत्पलेषु मरन्दधाराश्रुलवच्छलेन ॥ १३३ ॥

क्षुद्रक्षितीशेन कृतं प्रजानां संक्षोभमालक्ष्य दयालुरेषः ।
राजा समा द्वादश नैजकीर्तिगौरां धरित्रीमकरां चकार ॥१३४॥

वृद्धक्षत्रपदे निषण्णमकरोन्नन्दोत्कटं भूपतिं-
नन्दाढ्याय च यौवराज्यपदवीं प्रादात्कुरूणां पतिः ।
तत्तद्योग्यपदे चकार निखिलान्पद्मास्यमुख्यान्सखी-
नन्यांश्चापि धराधिपान्करुणया स्वे स्वे पदेऽस्थापयत् ॥१३५॥

विद्याधरविशालाक्ष्या भाले चन्द्रार्धकोमले ।
पट्टबन्धनमातेने सोऽयं वसुमतीपतिः ॥ १३६ ॥

राज्ञामुपायनान्येषः गृहीत्वा कुरुकुञ्जरः ।
ततो द्विगुणरत्नादिसार्थं प्रादान्मुदा नृपः ॥ १३७ ॥
यथार्हं मन्त्रिवृद्धानां बहुमानं धरापतिः ।
ततान वर्णवृद्धानामपि प्रत्येकमादरात् ॥ १३८ ॥
औदार्यप्रथमावतारसरणौ जीवंधरे भूपता-
वर्थिभ्योऽभिमतप्रदानपदवीबद्धादरे जाग्रति ।
नाकानोकहदेवधेनुविलसच्चिन्तामणीनां कथा
हास्याय प्रवदन्ति सम्यविबुधाः शास्त्राब्धिपारंगताः ॥१३९॥

तदनु चतुरङ्गबलसंगतेन नन्दाढ्येन समानीतां निजजननीं विजयामहादेवीं पादयोः प्रणिपत्य, तामानन्दपयोनिधिमग्नामाधाय, तया सह समागतस्य तापससंदोहस्य वाञ्छितादधिकं द्रविणजातं प्रदाय, मुदा तेषां पुण्यैकलभ्यां मोक्षपदवीमुपदिदेश । अन्यैः समानीताः पद्मादिदेवीः समागत्य रहसि समालिङ्ग्य परिचुम्ब्य च सकलमनोव्यथानामवसानभूमिं हर्षातिभूमिं प्रापयामास ।

गोविन्दक्षितिपालकस्य तनुजां सल्लक्षणां लक्ष्मणां
कान्त्या काञ्चनवल्लरीसहचरीं वृत्ताब्जकोशस्तनीम् ।
राकाशीतकराननां रतिपतेश्चापायमानभ्रुवं
लब्धे सद्गुणगुम्भिते क्षितिपतिर्जग्राह पाणौ मुदा ॥१४०॥

तदानीं सरभसमितस्ततः प्रधावितस्य परिजनस्य करधृतवेत्रलतापरस्परघट्टननिनदितशब्दभेदुरेण विशृङ्खलमन्त्रविदूषणारावविजृम्भितेन सभास्तारजनकृताशीर्वादविस्तृतेन घूर्णमानान्तःपुरजनाभरणझङ्कारमनोहरेण पुरतो जननिःसारणपरकञ्चुकिजनशब्दबन्धुरेण निर्दयप्रहतदुन्दुभिप्रभृतिवाद्यध्वनिनिर्भरेणानेकसहस्रकलकलबहलेनोत्सवकोलाहलेन त्रिभुवनमपूर्यत ।

जयश्रिया साकममन्दकीर्तिं विन्दन्कुरूणां पतिरेष धीरः ।
राज्यश्रिया सार्धमिमां कुमारीं लब्ध्वा प्रजानां वलयं जुगोप ॥१४१॥

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवंधरे
लक्ष्मणालम्भो नाम दशमो लम्बः ॥

एकादशो लम्बः ।

दीप्ता कुन्दसमानकीर्तिविसरैरामोदिनीं मेदिनीं
वाचा सत्यविलासमुत्तममधुस्यन्दन्तीपश्रिया ।
चित्तेन क्षितिपालनीतिपदवीं नेत्रेण सर्वप्रजा-
योगक्षेमकलां वभार नृपतिर्हस्तेन दानोदकम् ॥ १ ॥
तस्मिन्नरपतौ तत्र प्रजापालनतत्परे ।
रानन्दवती च भूरासीद्भृगभौ वसुंधरा ॥ २ ॥

तस्य च यशोमण्डलं शिशिरमपि शात्रवजनसंतापकारणम्, स्थिरमप्यनवरतभ्रमणशीलम्, निर्मलमपि मलिनीकृतारातिमुखकमलम्, धवलमपि प्रजानुरागपरिमेदुरम्, निन्दितरानमण्डलमप्यानन्दित-महाराजमण्डलमुदजृम्भत । तस्य च प्रतापाङ्कुरा दिक्सुन्दरीणां केशपाशेषु कल्हारशङ्काम्, कर्णदेशेषु किसलयस्तोमविभ्रमम्, स्तनकुचकुम्भेषु काश्मीरशोभाम्, कटिप्रदेशेषु कौसुम्भपटसंभावनाम्, कराम्बुजेषु कुरुविन्दमयकङ्कणविलासम्, पादतलेषु लाक्षारस-विच्छित्तिं संपादयामासुः ।

वह्निप्रतप्तद्रुतहेमवर्णैः प्रतापलेशैः कुरुकुञ्जरस्य ।
लिप्तेषु सर्वेष्वपि भूमिभृत्सु मेरुभ्रमोऽभूत्सुरसुन्दरीणाम् ॥३॥

पद्माकराञ्चितस्यास्य राजहंसस्य सन्ततम् ।
बहुधावननिग्नत्वमद्भुतं च न चाद्भुतम् ॥ ४ ॥
इयं सुमधुराकारा लक्ष्मणा वरलक्षणा ।
राजहंसस्य पत्नीति परमाद्भुतमीक्ष्यते ॥ ५ ॥

अयं खलु लक्ष्माञ्चितोऽपि पद्माभिख्यानिराजितोऽपि सुमित्रानन्दनो, विनयानन्दनोऽपि कुण्डलाञ्चितकर्णो, धृतराष्ट्रोऽपि धर्ममयो, गन्धर्वदत्ताधिकहर्षोऽपि देवदत्ताधिकहर्षो, महिषीसंभवोऽपि वृषोत्पादी विरराज ।

लक्ष्मणाञ्चितगात्रोऽपि निर्मलः कुरुचन्द्रमाः ।
सदा कुवलयाह्लादी पद्मानन्दीति चाद्भुतम् ॥ ६ ॥

कदाचिदसौ धरापतिर्विविधरत्नराशिभिर्महार्घैर्महनीयकान्तिकन्दलितमानन्दकरं सकलभव्यजननानामासेचनकं लेखलोचनानामकृत्रिमचैत्यालयप्रतिमं भगवज्जिनमन्दिरं शिल्पशास्त्रपारंगतैः शिल्पकैर्निर्मापयामास । तत्र च भगवतो नित्योत्सवपक्षोत्सवप्रमुखोत्सवपरंपरानिरन्तरनिष्पत्तये तत्समुचितानि प्रशस्तक्षेत्राणि प्रतिपादयितुकामे शास्त्रवचनविरामे निखिलगुणाभिरामे साक्षात्कामे विनयादेवी पूर्वकृतोपकारस्मरणजनितहर्षेण तत्क्षेत्राधिपत्यं तापसजनाय प्रदापयामास ।

नृपस्य जननी ततो निखिलशीलमालासनि-
व्यैरज्यत निशालपीः कुटिलसंभृतावेकदा ।
अपश्यमिह पैतृकं पदमनन्दकीर्तौ सुते
पराक्रमजिताहिते किमधुनेति सा जानती ॥ ७ ॥

ततश्च सा देवी, अष्टापि स्नुषाः समीपे विधाय, हे वामालका हेमाभिलषणिकरूपमानतनुलताः सीमातीतगुणगुम्फिता मराल-

गामिन्यः पूर्वमेव यूयमष्टमालारूपेण मम स्वप्ने दृष्टाः, इदानीं धृतनवमालारूपेण, इत्युत्तरोत्तरं भवतीनां वैभवातिशयो विजृम्भतामिति प्रतिपाद्य, मनुक्तमर्थमेवं प्रकटयामास ।

अपरे घोरसंसारे विरक्तिर्विस्तृता हृदि ।
दीक्षायै त्वरयत्यद्य मां राकेन्दुनिभाननाः ॥ ८ ॥

यूयं खलु कुरुवंशलतामुक्ताफलायमानान्पुत्रानुत्पाद्य सन्ततं कान्तेन साकं सौख्यमनुभूय वयोऽन्ते दीक्षामुपागन्तुमर्हथेति ।

श्वश्रूगिरमिमां श्रुत्वा शोकविह्वलमानसाः ।
देव्यस्तस्याः पुरस्तस्थुर्नमितानंनपङ्कजाः ॥ ९ ॥

ततश्च देवी विनया कुमारं समीपमानाय्य धराधिराजम् ।
कादम्बिनी हंसमिवारभव्या वैराग्यवाचा विधुरीचकार ॥ १० ॥

तदनु वैराग्यपदवीमनुगच्छन्त्या सुनन्दया सह महादेवी महीनाथं कृच्छ्रायमाणं कृच्छ्रेणानुज्ञाप्य यथाविधि श्रमणीवर्यायाः पद्मार्यायाः सकाशेऽदीक्षिष्ट । श्रमणीनामग्रगण्या पद्मार्या विनया-सुनन्दाभ्यां विश्राणितश्रमणीपदा नभसो निपतिता रत्नवृष्टिरिव प्रव्रज्या न प्रतिषेध्येति महीनाथं बोधयामास ।

इति मधुरगिरा प्रबोधितोऽसौ नरपतिरानतमातृपादपद्मः ।
विनयभरवशाद्विवेश धीरो निजसदनं परिवारसंपरीतः ॥ ११ ॥

तदनु कतिपयदिवसापगमे क्रमेण देवीनामुदराणि सरसीनां जलानीव शशिबिम्बा गर्भा विविशुः ।

गर्भच्छलेन संक्रान्तं प्रतिबिम्बं धरापतेः ।
ऊहुर्गन्धर्वदत्ताद्याः संनिभा दर्पणश्रिया ॥ १२ ॥

देवीजनस्य विकचोत्पलशोभि वक्त्रं
कोकद्वयस्य सदृशं कुचयुग्ममासीत् ।

आनीलचूचुकतलं विलसत्तमाल-
पत्राश्रिताग्रनवहेमघटप्रतीपम् ॥ १३ ॥
मणिकाञ्चीकलापेन दूयमानो दिने दिने ।
महिषीणां मध्यभागः क्रशिमानं जहौ तदा ॥ १४ ॥

तदनु प्राप्ते प्रसवसमये शुभदिवसे सावधानैर्नाडिपरिज्ञान-साधनस्वाधीनचित्तैर्गणकैर्गृहीते लग्ने देवीततिः कादम्बिनीवेरमदान्पुत्रानसूत । ततः प्रहर्षविस्तारितलोचनः पृथ्वीकमनः पुत्रान्दृष्ट्वा शुभदिवसे कल्पितमहोत्सवस्तेषां गन्धर्वदत्ताप्रभृतिदेवीपुत्राणां सत्यंधर-सदर्शन - धरणि - गन्धोत्कट - विनय - दत्त - भरत - गोविन्द-नामधेयानि प्रकटीचकार ।

एवं सौख्येन वसतः पाकारिसदृशश्रियः ।
धराधिपस्य धीरस्य त्रिंशद्वर्षाण्ययासिषुः ॥ १५ ॥
ख्यातो श्रीभरताधिराजसदृशो नीतौ च रामप्रभो-
स्तुल्यः संपदि पाकशासनसमः पृथ्वीपतिः कौरवः ।
धर्मे धर्मतनूभवेन तुलितस्तुल्योऽर्जुनेनाहवे
सोऽयं भाग्यनिधिः शशास वसुधां भूत्वा चिरं बाहुना ॥१६

कदाचिद्वसन्ते विरहिजनदुरन्ते प्रसाधितवनान्ते वनप्रियाविरुत-मुखरिताशान्ते संप्रवृत्ते, पुष्पफलादिकमुपहारीकुर्वता वनपालेन वनविहाराय विज्ञापितो वसुधापतिः, अष्टाभिः कान्ताभिः समं नगराद्निर्गत्य, पर्याप्तफलकुसुमपल्लवतरुघनमासाद्य वनपालेन तत्र निवेद्यमानानेकैकशः पल्लवितपुष्पितफलिततरुनिकरान्निरीक्ष-माणश्चिरं विजहार ।

बलात्कुन्तं सपदि भजुरमध्यभागं
स्विद्यत्कपोलमलकाकुलमक्षिबिम्बम् ।

व्यालोलकङ्कणझणत्कृति तत्र देव्यः
पुष्पग्रहं करतलैः कुतुकादकार्षुः ॥ १७ ॥

एवं चिरं विस्तारितविविधवनक्रीडाश्रान्तानां क्रीडासंमर्दविलुलितलतान्तानां व्यालोलनयनान्तानां संदोहेन सह कचन निषण्णस्तत्र गन्धर्वदत्ताकुचकुम्भयुगले मारमदेभमदधारायमाणां कस्तूरीधारां निपातयन्, गुणमालावक्षःस्थले सुरभिलमृगमदमेदुरमलयजरसं लिम्पन्, सुरमञ्जर्या नाभिकुहरादारभ्य काश्मीरपङ्केन लतां विलिखन्, पद्मायाः कपोलयोर्मकरिकां विस्तारयन्, क्षेमश्रियो वदने मृगमदतिलकं विरचयन्, लक्ष्मणायाः स्तनमुकुलयुगले मकरिकापत्रं विचित्रयन्, अन्यासां च यथोचितं प्रसाधनानि विदधानो जीवंधरः सहर्षमवर्तिष्ट ।

वृक्षाद्वृक्षमुदारशाखमचिरादाक्रम्य भूमीरुहा-
न्व्यालोलान्निदधानमाहितभयादुद्दीनपक्षिव्रजान् ।
कीशानां निचयं ददर्श वसुधापाले वनाभ्यन्तरे
शश्वद्बालकगृह्यमाणजठरोद्यद्वानरीभिर्वृतम् ॥ १८ ॥

तत्रान्यसंपर्कमवेक्ष्य रुष्टां स्वां वानरीं कोऽपि युवा प्लवङ्गः ।
दीनस्वभावो विविधैरुपायैः शान्तां विधातुं न चिरं शशाक ॥ १९ ॥

तदनु रोषोत्कटमर्कटीं प्रकृतिस्थां कर्तुमक्षमतया बहुदीनदशामापन्नं मृतमिव भूमौ पतितं मायाविनं शाखामृगमवलोक्य भयविह्वलाङ्गी प्लवङ्गी समीपमासाद्य तदवस्थामपाचकार ।

प्लवङ्गतरुणस्ततः पनसपक्वपुष्यत्फलं
ददौ वनमृगीमुदे विततहर्षनद्धान्तरः ।
जहार वनपालकः सपदि तत्फलं पेशलं
करप्रनलयष्टितो मुदितवानरीं भर्त्सयन् ॥ २० ॥

इति सदयमशेषं वीक्षमाणो धरायाः
पतिरथ विषयेषु व्याहताशाविशेषः ।
अंतनुत हृदि चिन्तामेवमानानधीरः
कृतमुकृतविपाकः काललब्ध्या समेतः ॥ २१ ॥
काष्ठाङ्गारायते कीर्शो राज्यमेतत्फलायते ।
मद्यते वनपालोऽयं त्याज्यं राज्यमिदं मया ॥ २२ ॥
या राज्यलक्ष्मीर्बहुदुःखसाध्या दुःखेन पाल्या चपला दुरन्ता ।
नष्टापि दुःखानि चिराय सूते तस्यां कदा वा सुखलेशलेशः ॥ २३ ॥
कल्लोलिनीनां निकरैरिवाब्धिः कृपीडयोनिर्बहुलेन्धनैर्वा ।
कामं न संतृप्यति कामभोगैः कन्दर्पवश्यः पुरुषः कदाचित् ॥२४॥
राज्यं स्नेहविहीनदीपकलिकाकल्पं चलं जीवितं
शम्पातत्क्षणभङ्गुरा तनुरियं लोलाभ्रतुल्यं वयः ।
तस्मात्संसृतिसन्ततौ न हि सुखं तत्रापि मूढः पुमा-
न्नादत्ते स्वहितं करोति च पुनर्मोहाय कार्यं वृथा ॥२५॥
विक्षिप्यमानो विषयैर्वराको भङ्गुरैर्भृशम् ।
नारम्भदोषान्मनुते मोहेन बहुदुःखदान् ॥ २६ ॥
ममेयं मृद्धद्धी मम तनय एषः मनुरधी-
रिमे मे पूर्वार्पा इति विगतबुद्धिर्नरपशुः ।
अणुमध्ये सौख्ये विहितबहिरारम्भवशगः
प्रयाति प्रायेण क्षितिधरनिभं दुःखमधिकम् ॥२७॥
ये मोक्षलक्ष्मीमनपायरूपां विहाय विन्दन्ति नृपाल्पलक्ष्मीम् ।
निदाघकाले हिमशीतलाम्बुधारां हित्वा भजन्ते मृगतृष्णिकां ते ॥२८॥
तस्माज्जैनेश्वरपादभक्त्या मानुष्यं जन्म दुर्लभम् ।
प्रसादः स्वहिते कर्तुं न युक्तः खलु धीमता ॥ २९ ॥

कान्तामवन्नृपालस्य कर्णान्तायतलोचना ॥ ३४ ॥
यशोधर इतीरितो नरपतेः कुमारो भवा-
न्बभूव जितमन्मथः स्ववपुषा धनश्रीपुषा ।
तवाष्ट सुदृशो बभुः कमलनेन निष्पादिता
गिरिद्वयधुरा स्थिरा इव मनोहरा विद्युतः ॥ ३५ ॥

कदाचिद्भवान्यौवनपरिपुष्टाभिः कान्ताभिः करिणीभिरिव करीन्द्रः सहर्षमुपवनविहाराय चलितः, पुरतः परिस्फुरन्तं पद्माकरमागत्य, तत्र कान्ताजनगतिनिरीक्षणलज्जितेष्विव मञ्जुलमञ्जीरवानुकारिविरावमुखरितारामेषु क्षणादुड्डीनेषु राजहंसेषु, निरवशेषमसञ्जातपक्षतया गगनोद्गमनायासमर्थम्, विकचवारिजे सत्रासं विलुठन्तम्, पक्षिनीमुखकमलचलाचलनासामुक्ताफलायमानम्, पद्माकरवास्तव्यपद्मावदनसरोजविगलन्मन्दहासखण्डसंभाव्यमानम्, वनदेवताविकचकुसुमकन्दुकशङ्काकरम्, अतिपेशलं राजहंसशावकं केनचिदनुचरेण भवनमानाय्य, कनकशलाकाकलितपञ्जरे निवेश्य, मधुरक्षीरौदनाद्युपचारेण निरवद्यं विवर्धयामास ।

कदाचित्कान्तानां कुचकलशसीम्नि प्रियतमो
भवान्बालं हंसं नरवर निधायैवमवदत् ।
अये त्वं पद्मानां विरहमनुभोक्तुं न हि पटु-
र्यतस्तद्लोलाम्बुनमुकुलयुग्मेऽद्य विहर ॥ ३६ ॥

एवं मरालपोतमरालकुन्तलाभिः कान्ताभिः सह सन्ततं क्रीडयति भवति सहर्षमास्थिते, धर्मविदामग्रणीस्ते पिता, हंसार्भकबन्धनोदन्तमाकर्ण्य कुपितस्त्वामाहूय बहुधा धर्मपरिपाटीं प्रकटयामास । तदनु कर्णामृतायमानधर्मबोधनविजृम्भितनिर्वेदः पित्रा निवारितोऽपि भवान्वैराग्यसमासादितनिनदीक्षादुश्चरतपश्चरणदक्षः,

कान्ताभिरष्टाभिः साकं लोकोत्तरं तपःप्रकारमासाद्य, कृतसुकृतविकासितं सहस्रारकल्पे देवभूयं चिरमनुभूय, महीतले महिलाभिरेताभिरष्टाभिः सह महीपतिरजायत । इति ।

राजहंसशिशोः पूर्वं मातापितृवियोजनात् ।
पित्रोश्चिराय विरहं राजहंस त्वमास्थितः ॥ ३७ ॥

एवं योगीन्द्रवाणीमनुजनिजसतीस्निग्धबृन्दैः समेतः
श्रुत्वा राज्याद्विभीतः कुरुपतिरशनेः पातनाद्वा भुजङ्गः ।
आनर्च्यानम्य चैनं पुरवरमगमत्संसृतिव्यञ्जचसौख्यं
मन्वन्हालाहलाभं तपसि निजमतिं सुस्थिरां संदधानः ॥३८॥

तदनु वसुमतीवल्लभेन राज्यपरिपालनाय समादिष्टे युवराजे नन्दाढ्ये तपःसाम्राज्यमेव वरीतुकामे, कुरुवीरः पुनः संगतगङ्गलमुहूर्ते भगवत्पूजापुरःसरं विस्तारितमहोत्सवः मथितपराक्रमलक्ष्मीविहारप्रसादायमानभुजं गन्धर्वदत्तानन्दनं सकलकलाविलासनिधिं चापविद्यापारीणगुणं कीर्तिप्रतापविभवेन रूपसंपदा चात्मानमनुकुर्वन्तं सत्यंधराह्वयं राज्यभारेऽभिषिच्य तमेवमवादीत् ।

असत्या वाणी ते तनय रसनाग्रे न वसता-
च्छ्रुवःप्रान्ते वक्रं पिशुनवचनं नेत्रसरणौ ।
परस्त्रीणां रूपं मनसि च कुमार्गे व्यवसिति-
र्मुखे कोपावेशः सकलशशिबिम्बाभवदन ॥ ३९ ॥

मनसि भगवतो जिनस्य पादौ श्रवसि धर्ममयामृतं विधेहि ।
प्रकृतिचयहिते च नेत्रवृत्तिं तनय सुखेन महीं प्रपालयेति ॥ ४० ॥

एवं प्रकारेण निजनन्दनं सत्यंधरं बोधयित्वा, इतरानपि तनयान्यथायोग्यं पदेषु प्रतिष्ठाप्य, श्रीवीरजिनचरणसरोजभक्तिभरेण वैराग्यवशेन च प्रेरितो महीपालः, सकलसहचरनिकरपरिवृतपार्श्वभागः,

तुष्टाभिरुष्टाभिः कान्ताभिर्दन्तुरितसविधप्रदेशः, पश्चादनुधाविन्या सत्यंधरप्रमुखनन्दनपुरस्सरया वेलामतिक्रम्योद्गच्छन्त्येव वारिनिधिवारिवाहिन्या निर्दयसंताडितपटहप्रभृतितूर्यघोषविशेषप्रतिध्वानितकुलाचलकन्दरया मन्थरया पृतनयानुगम्यमानः, क्रमेण सप्रणामं तया विसृष्टः, श्रीसभासमीपमासाद्य तां त्रिः प्रदक्षिणीकृत्य प्रमुदितमना मनागितरनिस्मयविस्तारितास्यः प्राविक्षत् ।

यस्याः पार्श्वे रत्नरेणुप्रनलघ्नो धूलीजालः शक्रचापानुकारी ।
अर्हन्नाथं मुक्तिलक्ष्म्या वरीतुं क्षिप्तं रेजे कङ्कणं वा समीपे ॥ ४१ ॥

यस्यां च गगनतलचुम्बिनः स्पन्दमानमन्दपवमानकन्दलवलमानध्वजाग्रमानस्तम्भाः क्रोधादीनां चतुर्णां निरसनाय प्रसृतसंमुखश्रीतर्जनीकार्यधूर्वहा व्यराजन्त ।

सालकान्तं मुखाभोगं दधत्यास्तत्समाश्रियः ।
लीलादर्पणतां प्रापुः सरस्यो यत्र निर्मलाः ॥४२॥

यत्र च विकचपुण्डरीकपण्डमण्डिता स्फटिकस्वच्छसलिला सतारकेव व्योमलक्ष्मीः, महामहिमविराजितं विभुं विलोकितुमागतेव खर्लोककल्लोलिनी सुराङ्गनानेत्रविलासविजिताभिरिव ह्रियान्तर्हिताभिः शफरीभिर्विराजिता खातिका विभाति स्म ।

पङ्क्तिः ७—१३.

"नेदीयस्याः प्रेयसा विप्रभव्याख्यादक्षा तेन वेणीं विमोच्य ।
धूलीजालच्छद्मना पार्श्वतोऽस्याः क्षिप्तं मुद्राकङ्कणं मुक्तिलक्ष्म्याः ॥ २० । ७० ॥
ते प्रत्याशं वायुवेलद्ध्वजाग्रा मानस्तम्भास्तत्र चत्वार आसन् ।
क्रोधादीनां ये चतुर्णां निरासे संसल्लक्ष्म्यास्तर्जनीकार्यमीयुः ॥ २० । ७१ ॥
आस्य तस्याः सालकान्तं दधत्याः शोभामङ्गे संपदं स्वा दिदृक्षोः ।
तच्चत्वारि स्फाटिकस्वच्छनीराण्यापुर्लीलादर्पणत्वं सरांसि ॥" २० । ७२ ॥

इति धर्मशर्माभ्युदये.

प्रसूनानां वाटी सुरभिलतमा यत्र विलता
ततः साली लोलन्मणिगणपरीतः समलसत् ।
चतुर्द्वारप्रान्तान्तरविलसिते नाट्यसदने
ततो मार्गे धूपाञ्चितकनककुम्भो व्यलसताम् ॥ ४३ ॥

या खलु तत्र संमिलितभव्यसंदोहतो भगवद्दर्शनेन निर्गच्छत्पापपरंपराभिरिव धूपघटनिर्यद्धूमरेखाभिः परीताभ्रभागा, ककुप्कामिनीननकर्णपूरायमाणपल्लवतल्लजविराजितानामिन्द्रोद्याननयार्थमुद्यत्तहस्तानामिवाभ्रंकषशाखानां चैत्यवृक्षाणां चतुष्टयेन विभ्राजितैर्विविधविचित्रधारायन्त्रलतामण्डपकाञ्चनक्रीडाशैलपेशलैश्चतुर्भिरुपवनैरुपेता, नानाविधमणिगणखचिततोरणया सुवर्णवेदिकयालंकृता, शिखावलदन्तावलदन्तिवैरिप्रमुखलाञ्छनलाञ्छितताभिर्गगनतलोद्वेजनसमारुष्टसुरतरङ्गिणीतरङ्गसंभावनासंपादकव्यामुक्तमुक्ताफलरुचिनिचयरुचिराभिर्वैजयन्तीभिर्विलसिता, भगवन्मुखसरसिनविगलद्दिव्यध्वनिश्रवणकुतुकेन कुण्डलीभूयोपतस्थुषा मेरुणेव कनकमयसालेन विलसिता, सकलचित्तहारिणा पुष्पितकल्पकवनेन परिशोभिता, निखिलजगदानन्दकन्दलसंदायिन्या चतुर्गोपुरनारुममाज्यवेदिकया संघटिता, जिनपतिदर्शनकुतूहलेन प्रादुर्भूतान्नवपदार्थानिव नयनर-

स्तूपानर्चासनाथान्धारयन्ती, भगवद्दिदृक्षया समागतेन मूर्तेन वायुमार्गेणेव स्फाटिकप्राकारेण परिवृता, सन्ततपरिस्फुरन्निशाकान्तकान्तिविनिर्मितैर्भव्यसंदोहाध्यासितैर्द्वादशकोष्ठैः प्रतिष्ठिता विरराज ।

तत्र प्रविश्य स च गन्धकुटीसमाख्ये
स्थाने मणिस्फुरितसिंहहटासनाग्रे ।
पूर्वाचले रविमिव प्रविराजमानं
वीरं ददर्श कुतुकेन जिनाधिराजम् ॥ ४४ ॥

प्रदक्षिणीकृत्य धराधिराजो भक्त्या जगत्पूज्यमथैष वीरम् ।
इयाज पूजाविधिना विधिज्ञस्तुष्टाव चैवं परितुष्टचित्तः ॥ ४५ ॥

स्वामिन्नम्बुदमार्गचुम्बिविटपैरुद्भाम्बराशान्तरो
गायन्भृङ्गरवैस्तवामलगुणान्मृत्यैश्चलैः पल्लवैः ।
रक्तस्तावकदर्शनेन विविधैः पुष्पप्रवालोत्करैः
मूर्तो वा मधुरेव वीर भवतो राजत्यशोकद्रुमः ॥ ४६ ॥

वृष्टिः पौष्पी वरजिनपते तावकी सातिशुभ्रा
संद्रष्टुं त्वां गगनसरणेरागता चन्द्रिका किम् ।
यद्वा भीत्या कुसुमधनुषो हस्तपद्माच्च्युता द्रा-
ग्बाणश्रेणी नियतमखिलस्पष्टविज्ञानवार्धे ॥ ४७ ॥

केयं लक्ष्मीरपारा क खलु जिनपते निश्चलं निःस्पृहत्वं
कासौ सुस्पष्टबोधः सकलविषयकः केदृशानुद्धतत्वम् ।

श्लो. ४६—४८.

"गायद्भिरेव भृङ्गाङ्गनाना मृत्यैश्चलैः पल्लवानामिवौघैः ।
किं भूतोऽन्यस्तस्य वृत गुणैर्यैर्जज्ञे रक्तो यस्य वृक्षोऽप्यशोकः ॥ २० । ९३ ॥
वृष्टिः पौष्पी सा कुतोऽभूत्समस्तः संभाव्यन्ते नात्र पुष्पाणि यस्मात् ।
यद्वा शातं द्रागनङ्गस्य हस्तादर्हद्भीत्या तत्र बाणा निपेतुः ॥ २० । ९४ ॥
केयं लक्ष्मीः केदृशं निःस्पृहत्वं केदं ज्ञानं कास्यनौद्धत्यमीदृक् ।

रे रे सर्वे कुतीर्थी वदत निजधियेत्येवमामन्द्रनादो
भोः स्वामिन्दुन्दुभिस्ते वदति जलधरध्वानपूरानुकारी ॥ ४८ ॥

सकलजगदीश्वर विश्ववेदनचतुर सुरधराधरधीर श्रीवीर, भवदीयातीतानागतवर्तमानविज्ञानमसमानं भुवनत्रयैश्वर्यमहिमानं प्रकटीकुर्वाणम्, अमर्त्यैः स्वप्राभवप्रकाशनाय चक्रीकृत्य गगने त्रिधा विन्यस्तमिव क्षीरवाराशिसलिलम्, अत्यच्छस्वभावमपि भव्यौघानुरागमादधानं छत्रत्रयं विराजते ।

भामण्डले जिनपते तव दर्शनार्थं
संप्राप्ततिग्मरुचिमण्डलशङ्कचमाने ।
स्वातीतजन्मसरणिं मणिदर्पणाभे
संपश्यति प्रविशदं खलु भव्यसङ्घः ॥ ४९ ॥

स्वामिञ्जिनेन्दो त्वयि जृम्भमाणे व्यर्थीकृतानामुडुराजभासाम् ।
द्राग्वेधसा दण्डनियन्त्रितानां राजीव ते राजति चामरालिः ॥ ५० ॥

कुरङ्गैरुद्गतग्रीवैः श्रूयमाणा निरन्तरम् ।
जितपीयूषधारा ते दिव्यभाषा विराजते ॥ ५१ ॥

सन्ततनिनदमदमरनिकरमकुटतटघटितमुक्तारुचिपुनरुक्तनखचन्द्रिकानन्दितनिखिलजननयननीलोत्पल श्रीवीर, तव पञ्चाननासनम्, उपवनमिव नानापत्रलतान्वितं व्याजृम्भमाणतरुनैः पञ्चवदनैरञ्चितं च,

---

रे रे ब्रूत द्राक्कुतीर्थी इतीव ब्रूते भर्तुर्दुन्दुभिर्व्योम्न्यवादीत् ॥" २०।९९ ॥

श्लो. ५०—५१.

"रेजे मुक्तिश्रीकटाक्षच्छटाना पार्श्वे पङ्क्तिश्चामराणां जिनस्य ।
ज्ञानालोके निष्फलानामिवेन्दोर्भासामुच्चैर्दण्डनियन्त्रितानाम् ॥ २०।९७ ॥
अप्युद्वीवैः श्रूयमाणा कुरङ्गैः कर्णाभ्यर्णस्फारपीयूषधारा ।
आ गव्यूतिद्वन्द्वमभ्युल्लसन्ती दिव्या भाषा कस्य नासीत्सुखाय ॥" २०।९८ ॥

इति धर्मशर्माभ्युदये.

वाराकरनीरमिव सरत्नमकरम्, हेमाचलशृङ्गमिवात्युन्नतम्, सकल-
जगदानन्दं कन्दलयति ।
एवंभूतैरष्टाभिः प्रातिहार्यैर्जुष्टः श्रीमन्मां भवाब्धौ निमग्नम् ।
वीर स्वामिन्नुद्धरेति क्षितीशो भक्त्याधिक्याद्देवदेवं ननाम ॥ ५२ ॥

अनुज्ञां लब्ध्वासावथ जिनपतेर्मातुलमुखैः
समेतो भूपालो गणधरमिहानम्य कुशलः ।
गृहीत्वा निस्सङ्गं जिनपगदितं संयमवरं
तपस्तेपे जीवंधरमुनिवरस्तस्य सविधे ॥ ५३ ॥
कुरूपशोभितोऽप्येष सुरूप इति विश्रुतः ।
मदनोऽपि बभूवाद्य शिवसौख्यकृतादरः ॥ ५४ ॥

आस्तां तावदिदमन्यदद्भुततममालक्ष्यते ।

संगीतिव्यपदिष्टो यः सुदृग्भिरभिनन्दितः ।
सोऽयं सुदर्शनेष्वासीदसंगीति यथां गतः ॥ ५५ ॥
देव्यो गन्धर्वदत्ताद्याः सहिताः स्वस्वमातृभिः ।
समीपे चन्दनार्यायाः संयमं जगृहुः परम् ॥ ५६ ॥
जीवंधरोऽयं तपसि प्रवीणो यथाक्रमं नष्टघनाष्टकर्मा ।
रत्नत्रयं पूर्णमवाप धीरो महामुनिर्मान्यगुणाभिरामः ॥ ५७ ॥
अष्टाभिः स्वगुणैरयं कुरुपतिः पुष्टोऽथ जीवंधरः
सिद्धः श्रीहरिचन्द्रवाङ्मयमयुस्यन्दिप्रसूनोच्चयैः ।
भक्त्याराधितपादपद्मयुगलो लोकातिशायिप्रभां
निस्तुल्यां निरपायसौख्यलहरीं संप्राप मुक्तिश्रियम् ॥५८॥
प्रजानां क्षेमाय प्रभवतु महीशः प्रतिदिनं
सुवृष्टिः संभूयाज्जनतु शमनं व्याधिनिचयः ।

पा. ५४. सर्गी, सर्गीतकलामनयः । अगुणी, सगणितः.

READY FOR SALE.

THE GADYACHINTAMANI

OF

VADIBHASIMHA,

A TEXT-BOOK IN SANSKRIT FOR THE B. A. DEGREE

EXAMINATION OF 1905.

Price, 1 rupee 12 annas.

SELECT PRESS OPINIONS.

DR. E. HULTZSCH REVIEWS IN THE INDIAN ANTIQUARY BOMBAY:—THE GADYACHINTAMANI OF VADIBHASIMHA, by T. S. KUPPUSWAMI SASTRI and S. SUBRAHMANYA SASTRI, Madras, 1902. (*Sarasvativilasa Series*, No. 1)

THIS is the *editio princeps* of a romance in Sanskrit prose, which resembles in style the *Kadambari* of Bana. The first of the two editors is favourably known to students of Sanskrit literature by his valuable article on Ramabhadra Dikshita and his contemporaries (printed in the *Kavyamala* as a preface to the *Patanjalicharita*.) He is one of the small band of native scholars who combine a Pandit's erudition with a keen appreciation of modern Oriental research.

Odayadêva, surnamed Vadibhasimha, the author of the *Gadyachintamani*, was a Southern Digambara and the pupil of Pushpasêna. He also composed a poem entitled *Kshatrachudamani*, the beginning of which was printed at Bangalore a few years ago in an—unfortunately extinct—magazine of Jaina works. Both the *Gadyachintamani* and the *Kshatrachudamani* have for their subject the legend of Jivaka or Jivandhara and seem to be based on the *Jivandharapurana*.

The same legend has been treated in two other works—the *Jivandharachampu* of Harichandra and the Tamil poem *Jivaka-chintamani*.

The *Gadyachintamani* is divided into eleven *lambas*. The first *lamba* relates that king Satyamdhara of Rajapuri in Hemangada lost his life and kingdom through the treachery of his minister Kâshthângâra. Following the example of the *Kâdambari*, the author devotes 2¾ pages to the description of Hemangada 4 pages to that of Satyamdhara, and 2¼ pages to that of his queen Vijaya. The pregnant queen escaped on a sort of flying-machine which had the shape of a peacock, and gave birth in a cemetery to prince Jivaka or Jivamdhara, who was adopted by a merchant named Gandhotkata and, as the second *lamba* narrates, educated by Aryanandyâchârya. In the meantime the usurper Kâshthangara despatched an army against robbers who had carried away cattle. As this army was repulsed, Nandagopa, the owner of the cattle, proclaimed publicly that he would give his daughter Govinda in marriage to the recoverer of the cattle. Prince Jivaka accomplished this feat and received, as promised, Nandagopa's daughter, whom he made over to his companion Padmamukha. In the third *lamba* we are told that a merchant of Rajapuri, named Sridatta was shipwrecked on an island and thence carried away on a flying camel by a man who turned out to be Dhara, the minister of the Vidyadhara king Garudavega of Nityaloka. This king possessed a daughter Gandharvadatta, at whose birth it had been foretold that she would become the wife of a prince at Râjapuri. Thither the king sent his daughter on a *vimâna* along with Sridatta, who gave her out for his own daughter and had it proclaimed that she would be given in marriage to any one who surpassed her in playing the *vînâ*. As will be expected, prince Jivamdhara succeeded in this competition, and the fair Gandharvadattâ chose him for her husband from the midst of all royal suitors. Here ends the third *lamba*.

The above hasty notes will, I hope, induce others to peruse the interesting Sanskrit work which has been made accessible through the disinterested labours of Mr. Kuppuswami Sastri and his collaborator. It may be added that the text of *Gadyachintamani* is based on six MSS, and is edited and printed in a most scholarly manner. The rules of division of words and of interpunctuation are as carefully observed as in the standard European editions of Sanskrit books—a point which adds greatly to the usefulness of the new work and recommends it for adoption as a text-book for University examinations. Mr. Kuppuswami Sastri is now editing another unpublished prose work *Viranarayanacharita* of Vâmanabhattabâna.

(Sd) E. HULTZSCH.

Camp, 2nd February, 1903.

THE INDIAN REVIEW, MADRAS:—GADYACHINTAMANI of Vadhibhasimha in Devanagari, Edited by T. S. Kuppuswami Sastri and S. Subrahmanya Sastri of Tanjore (G. A. Natesan and Co., Madras).

This is a rare work in Sanskrit prose which now appears for the first time in print. Its author is one Vadhibhasimha, who belonged to the Jaina sect. His original name was Odayadeva, a word commonly met with in the nomenclature of Southern India. His erudition and literary fame brought him the appellation of "the vanquisher of opponents, as a lion of elephants." The Editors, in a well-written preface, fix his date to be subsequent to 650 A. D.

The story itself is very simple. It tells us of a king Satyamdhara who transferred the burden of his state to his scheming minister, and lived with his queen in retirement without bestowing a thought on his subjects. The minister usurps the kingdom, the king dies, and the queen, after giving birth to a son named Jivamdhara, follows her husband to heaven. The boy is bred up by a merchant and educated, and is also informed as to the details of his birth and position. His wrath

The same legend has been treated in two other works—the *Jîvandharachampu* of Haricbandra and the Tamil poem *Jivaka-chintamani*.

The *Gadyachintamani* is divided into eleven *lambas*. The first *lamba* relates that king Satyamdhara of Rajapuri in Hemangada lost his life and kingdom through the treachery of his minister Kâshthângâra. Following the example of the *Kâdambari*, the author devotes 2¾ pages to the description of Hemangada 4 pages to that of Satyamdhara, and 2¼ pages to that of his queen Vijaya. The pregnant queen escaped on a sort of flying-machine which had the shape of a peacock, and gave birth in a cemetery to prince Jivaka or Jîvamdhara, who was adopted by a merchant named Gandhotkata and, as the second *lamba* narrates, educated by Aryanandyâchârya. In the meantime the usurper Kâshthangara despatched an army against robbers who had carried away cattle. As this army was repulsed, Nandagopa, the owner of the cattle, proclaimed publicly that he would give his daughter Govinda in marriage to the recoverer of the cattle. Prince Jivaka accomplished this feat and received, as promised, Nandagopa's daughter, whom he made over to his companion Padmamukha. In the third *lamba* we are told that a merchant of Rajapuri, named Sridatta was shipwrecked on an island and thence carried away on a flying camel by a man who turned out to be Dhara, the minister of the Vidyadhara king Garudavega of Nityaloka. This king possessed a daughter Gandharvadatta, at whose birth it had been foretold that she would become the wife of a prince at Râjapuri. Thither the king sent his daughter on a *vimâna* along with Sridatta, who gave her out for his own daughter and had it proclaimed that she would be given in marriage to any one who surpassed her in playing the *vînâ*. As will be expected, prince Jîvamdhara succeeded in this competition, and the fair Gandharvadatta chose him for her husband from the midst of all royal suitors. Here ends the third *lamba*.

The above hasty notes will, I hope, induce others to peruse the interesting Sanskrit work which has been made accessible through the disinterested labours of Mr. Kuppuswami Sastri and his collaborator. It may be added that the text of *Gadyachintamani* is based on six MSS, and is edited and printed in a most scholarly manner. The rules of division of words and of interpunctuation are as carefully observed as in the standard European editions of Sanskrit books—a point which adds greatly to the usefulness of the new work and recommends it for adoption as a text-book for University examinations. Mr. Kuppuswami Sastri is now editing another unpublished prose work *Viranarayanacharita* of Vâmanabhattabâna.

(Sd.) E. HULTZSCH.

Camp, 2nd February, 1903.

THE INDIAN REVIEW, MADRAS:—GADYACHINTAMANI of Vadhibhasimha in Devanagari, Edited by T. S. Kuppuswami Sastri and S. Subrahmanya Sastri of Tanjore (G. A. Natesan and Co., Madras).

This is a rare work in Sanskrit prose which now appears for the first time in print. Its author is one Vadhibhasimha, who belonged to the Jaina sect. His original name was Odayadeva, a word commonly met with in the nomenclature of Southern India. His erudition and literary fame brought him the appellation of "the vanquisher of opponents, as a lion of elephants." The Editors, in a well-written preface, fix his date to be subsequent to 650 A. D.

The story itself is very simple. It tells us of a king Satyamdhara who transferred the burden of his state to his scheming minister, and lived with his queen in retirement without bestowing a thought on his subjects. The minister usurps the kingdom, the king dies, and the queen, after giving birth to a son named Jivamdhara, follows her husband to heaven. The boy is bred up by a merchant and educated, and is also informed as to the details of his birth and position. His wrath

I have read with special interest your notes on the authors of the age and their works. My only regret is that, while exceedingly valuable, they are so brief. I hope you will write a separate essay on these Sanskrit writers. In the Antiquary, there is a mention of a forthcoming paper of yours on Ramabhadra Dikshitar and the poets of his time. I suppose that essay will give me what I want.

I am very much delighted to learn that your Sanskrit scholarship and powers of research are leaving such ripe and valuable fruits. Your truly admirable patriotism is shown in your use of the vernacular as the medium for conveying your learning and wisdom to the public. * *

M. R. Ry V. VENKAYYA AVERGAL, M. A., Offg. Epigraphist to the Madras Government.—Many thanks for your very interesting booklet on the Nayakas of Tanjore.

M. R Ry. S. RADHAKRISHNA AIYAR AVERGAL B. A., PRINCIPAL MAHARAJA'S COLLEGE, PUDUKOTAH.—I thank you for your kindness in sending me a copy of "A Short History of the Tanjore Nayak Princes," which I have read with much interest. It is well written and shows historic research. I hope that your book will have an encouraging sale and that you will publish other works showing similar research.

THE SOUTH INDIAN MAIL, MADURA.—The public are indebted to Mr. Kuppuswami Sastrial Assistant Master, Government Upper Secondary Training School, Tanjore, for a vivid and interesting treatise on the Nayak Kings of Tanjore. The Inscriptions to be found in some of the temples and other public places and the works of various Sanskrit authors who were occupying responsible position in the Raj, during the reign of the Nayak Kings, supply Mr. Kuppuswami Sastrial with a lot of information which he has presented for the deletaction of the public in a very readable form in Tamil.

தெரிவோரிலடங்கா கலெக்ட தமிழ்ப்படிக்குஞ் பூரீ வே, ரமணி ஐயங்கார்:- தக்கனுபடனுப்பிய தஞ்சாஜி மகாராஜன்

சரித்திரச் சுருக்கம் வரப்பெற்று முற்றும் படித்துப்பார்த்து அதிலுள்ள சிறந்த விஷயங்களையறிந்து மிகவு மகிழ்ச்சியடைந்தேன்.

இதுபோன்ற சிறந்த காரியங்களே தங்களைக்கொண்டு எப்பொழுதும் செய்வித்தருளும்படி யீசுவரனைப் பிரார்த்தித்துக்கொண்டிருக்கிறேன்.

மகா-ரா-ஸ்ரீ கே. சுப்பராமய்யரவர்களும் மிஸடர் நெல்ஸனெனவர்களும் இப்புத்தகம் வரப்பெற்று மிகுந்த சந்தோஷமடைந்ததாகச்சொன்னார்கள். இதுபோலவே இனி தாங்களெழுதும் புத்தகங்களையுமனுப்பும்படி மிகவும் பிரார்த்திக்கிறேன்.

மதுரைச் சேந்தமிழ் :— சிலகாலமாக மேற்றேயக் கல்வியின் பெரும்பயனை, தக்காட்டறிஞர் சிலர், முற்காலவரசர முதலியோர் சரிதங்களைப் பலகருவிகள்கொண்டு ஆராய்ந்து வெளியிட்டு வருதல் பலரும் அறிந்ததே. இப்பொழுது தஞ்சாவூர்க் குப்புஸாமிசாஸ்திரிகளை என்பார், தஞ்சாவூரையாண்ட நாயகவரசர சரிதங்களை எழுதிவெளியிட்டுள்ளார்கள் என்றறிந்து மகிழ்வுறுகின்றோம். இந்நூலில் தஞ்சாவூர் நாயகவரசரில் முதல்வரான சேவப்பநாயகர், அச்சுதப்பநாயகர், இரகுநாதநாயகர், விஜயராகவநாயகர் என்னும் அரசர்களைப்பற்றியும், அவர் காலத்து விளங்கிய அருஞ்செயல்கள், தர்மங்கள். அவரவரசரால் அபிமானிக்கப்பெற்ற வித்வான்கள், அவர்கள இயற்றிய நூல்கள் முதலியவற்றைக்குறித்தும் பல சாதனங்களைக்கொண்டு நன்கெழுதப்பட்டுள்ளன. அந்நூலினிறுதியில், எத்திராயணதீட்சிதர் முதலியோரால் இயற்றப்பட்ட நூல்களில் அவ்வரசர் சரிதங்களை விளக்கும் சுலோகங்கள் காகாலிபியிற்றொகுத்துக் காட்டப்பட்டுள்ளன. விலை அணா 2—6.

IN PREPARATION.

CRITICAL AND EXPLANATORY NOTES

ON

Gadyachintamani.
